THE
ŚRAUTA SÚTRA OF ÁPASTAMBA

BELONGING TO THE

TAITTIRÍYA SAṂHITÁ

WITH THE

COMMENTARY OF RUDRADATTA

EDITED BY

DR. RICHARD GARBE,

PROFESSOR OF SANSKRIT IN THE UNIVERSITY OF KÖNIGSBERG.

VOLUME I.

PRAŚNAS 1—7.

CALCUTTA:

PRINTED BY J. W. THOMAS, BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57 PARK STREET.

1882.

DEDICATED TO

DR. REINHOLD ROST,

LIBRARIAN OF THE INDIA OFFICE,

THE SELF-DENYING PROMOTER OF ORIENTAL

STUDIES,

AS A SMALL TOKEN OF THE EDITOR'S GRATITUDE.

PREFACE.

This edition of the A'pastamba S'rauta Sútra will be complete in four volumes. At the end will be added the indices necessary for such a work. The detailed investigation of the sources of the A'pastamba Sútra and its position among the ritual-books of Ancient India I shall reserve for the introduction to the last volume, the publication of which will place the entire material in the hands of Sanskrit scholars for criticism. By that time, too, we may hope for the completion of Dr. Schroeder's edition of the Maitráyaṇí Saṃhitá, a highly important work, and one which has had a decided influence on A'pastamba, although—curiously enough—he does not mention the name of this Saṃhitá, as he does that of many other Vedic writings. I shall accordingly limit myself here to the description of the manuscripts to which I have thus far had access.

I. *Manuscripts of the Text.*

A. India Office Library, No. 1651. Praśnas 1-7 and 9-15, on 227 paper-leaves. In Devanágarí characters. The place and date have been expunged after completion of the MS. It is ancient, very carefully made, and has been corrected several times. At the end of every praśna, there are given first the beginnings of each kaṇḍiká in reversed order, and then the beginnings of each paṭala in the actual order. This system or a similar one is also followed in most of the other MSS. The leaves 96—110 inclusive, which contained praśna 8, are missing. A later interpolated leaf—about two thirds of it covered with writing—which, like the first leaf

after the lacuna, is numbered 111, contains the missing beginning of praśna 9 and the last part of the paṭala-beginnings of praśna 8.

B. India Office Library, No. LXX of Burnell's "Catalogue of a Collection of Sanskrit Manuscripts." Praśnas 1—18, kaṇḍiká 8, on 120 palmyra-leaves. In Grantha characters. Undated; but according to Dr. Burnell's statement, copied about A. D. 1800. A good MS.

C. India Office Library, No. LXXI of Burnell's "Catalogue." Praśnas 1—15, on 202 palmyra-leaves. In Grantha characters. Undated; but according to Dr. Burnell, "copied about 1750" and "in a large and good hand." A correct MS.

The smaller Grantha MSS. of the first four praśnas (Nos. LXXII, LXXIII, and LXXIV of Burnell's "Catalogue") I have not collated, because the other MS. material at my disposal for this part of the work was more than amply sufficient for the determination of a trustworthy text.

D. Bombay University Library, No. 16. Praśnas 1—24, on 395 paper-leaves. In very large and beautiful Devanágarí characters, but abounding in errors of the copyist. Undated; modern. At my request the use of this MS. was very kindly allowed me by the Director of Public Instruction, K. M. Chatfield, Esq.

E. Royal Bavarian Court and State Library at Munich, Codex Haug. 51. Praśnas 1—24, on 405 paper-leaves. In Devanágarí characters. Undated. Twin brother of the preceding MS., sharing the same internal and external peculiarities, and agreeing with it in the copyist's errors.

F. India Office Library, No. 1733. Praśnas 1—5, on 79 paper-leaves. In Devanágarí characters. Undated, but not so old as A.

G. India Office Library, No. 122*c*. Praśna 8, on 14 paper-

leaves. In Devanágarí characters. The handwriting shows that this is not the missing part of A. Copied in Benares, Samvat 1636 (= A. D. 1580).

H. India Office Library, No. 1541*a*. Praśnas 15, 16, and 17, on 22, 24, and 15 paper-leaves respectively. In Devanágarí characters. Undated.

I. Text of praśnas 1—15 in the commentary-manuscript *i*.

K. Text of praśnas 1—15 in the commentary-manuscript *k*.

L. Text of praśnas 1—3 in the commentary-manuscript *h*.

M. Text of praśnas 1—3 in the Prayogaratnamálá by Chauṇḍappáchárya, in the Palace Library at Tanjore, Burnell's "Classified Index," Part I, No. CIII. Dr. Burnell had the great kindness to have this MS. copied for me. The copy covers 275 quarto pages.

In connection with this list of MSS. it ought to be mentioned that many passages of the A'pastamba S'rauta Sútra occur also in the commentaries to the Taittiríya Saṃhitá, Bráhmaṇa, and A'raṇyaka. Sometimes A'pastamba is cited by name (thus, तथा चाहापस्तम्बः) as authority for these quotations; but often also they are referred to in a general way as कल्पः, or with the remark उक्तं सूत्रकारेण.

II. *Manuscripts of Rudradatta's Commentary.*

a. India Office Library, No. 51. Praśnas 1—9, on 195 paper-leaves. In Devanágarí characters. Undated. An ancient, excellent, and accurately corrected MS.

b. India Office Library, No. 1142*b*. Praśnas 10—15, on 163 paper-leaves. In Devanágarí characters. Undated. A good MS.

c. India Office Library, No. 1142*a*. Praśna 14, on 30 paper-leaves. In Devanágarí characters. Undated. This has come from the same source as the preceding MS.

d. Calcutta manuscript. Praśnas 6 and 7, on 46 paper-leaves. In Devanágarí characters. Samvat 1631 (= A. D. 1575).

e. Manuscript belonging to the Government collection deposited with the Asiatic Society of Bengal; No. 1204. Praśna 8, on 31 leaves (numbered 46—76). In Devanágarí characters. Samvat 1631.

f. Sanskrit College Library in Calcutta, No. 2602. Praśna 9, on 44 paper-leaves. In Devanágarí characters. Undated.

I received the three MSS. *d*, *e*, and *f* in copies, which Dr. Hoernle was so good as to cause to be made for me. The originals of *d* and *e* are certainly copies of MS. *a*, but were written *before* the above-mentioned correction of that MS. took place.

g. India Office Library, No. LXXVII of Burnell's "Catalogue." Praśnas 10—13, on 55 talipat-leaves. In Grantha characters. According to Dr. Burnell, it was "copied about the beginning of this century."

Note. In the preceding 7 MSS., the text of the Sútra is given each time only by the first and last word of the passage to be commented upon. In the following 3, it is given in entirety, with the exception that the mantras quoted are often abbreviated.

h. Palace Library at Tanjore, Burnell's "Classified Index," Part I, No. XCVIII. Praśnas 1—15, on 207 talipat-leaves. In Grantha characters. "Recent," according to Dr. Burnell. A Devanágarí transcript of the first three praśnas of this MS. was prepared for me through the mediation of Dr. Burnell, and to him my thanks are due for this kind service.

i. Bombay University Library, Nos. 17*a* and *b*, two volumes. Praśnas 1—15, on 565 paper-leaves. In Devanágarí characters. Undated; modern. Of the same general nature as MS. *D*. The use of this MS. was granted me by the liberality of K. M. Chatfield, Esq., Director of Public Instruction.

k. Royal Bavarian Court and State Library at Munich,

Codex Haug. 52, two volumes. Praśnas 1—15, on 657 paper-leaves. In Devanágarí characters. Undated; modern. This MS. is related to *i* precisely as *E* to *D*.

Since Rudradatta has commented on only the first 15 praśnas of the A'pastamba S'rauta Sútra (see Burnell, "Classified Index," note to MS. XCVIII), I shall be compelled to give a different commentary for the text of the remaining praśnas, *i. e.*, from the beginning of the third volume of the present edition. This procedure occasions indeed a certain want of uniformity; but it did not seem to me an adequate reason for abstaining from printing the best attainable commentary, and as such Rudradatta's must certainly be considered. Dr. Burnell ("Catalogue of a Collection," p. 21, note to MS. LXXVII) says of it: "This commentary is a very excellent one; the Bháradvája, Baudháyana, A'çvaláyana, Dráhyáyaṇa, Satyáshádha, and 'other' sútras are constantly quoted." The reader will find that Rudradatta quotes many other works also. But while he takes account of the allied literature so extensively, on the other hand, as the reader will observe, he strives after the greatest possible brevity and terseness, so much so that, sometimes after a lengthy discussion, he accuses himself of prolixity with अलं विस्तरेण or some similar phrase (so in i. 1. 3; viii. 1. 2; 16. 5).

The text of the A'pastamba S'rauta Sútra, as is well-known to be the case in all Vedic works, does not show any real variants, except in a very few cases; and these have been given in footnotes. Errors of copyists, as well as omissions and additions in the more modern MSS., which are easily recognized as such, have not been noted. As for the commentary, it shows indeed no lack of *variae lectiones;* but I came to the conclusion that to register them would be of little use and would unduly increase the extent and size of an already sufficiently bulky work. In printing the commentary, I have almost always given the text of the good MSS. *a* and *b*; I have also followed these two MSS. in the violation of the rules of

saṃdhi, so far as these violations served in lieu of a slight punctuation, or marked a break in the sense, or were intended to secure greater clearness.

It may be well to mention, that the MSS. of the commentary for the most part read बोधायन, while I have uniformly written बौधायन in the edition.

Unfortunately, as the list of errata shows, a number of typographical errors have remained uncorrected. These, I hope, the reader will excuse in view of the great distance of my abode, Königsberg, from the place of printing, Calcutta. I found that I must either content myself with the revision of a single proof, or face the unpleasant alternative of an indefinite postponement of the completion of the publication. Even under these circumstances, the present edition is—I venture to hope—satisfactorily correct. And for this I have to thank the carefulness of the skilful compositor, and especially the great kindness of Dr. Hoernle, who voluntarily assumed the labour of regularly reading the second proof.

R. GARBE.

Königsberg, May 1882.

LIST OF ERRATA.

Page 1 line 13 disjoin एतं एतमिति
„ 4 „ 9, 10 read इदं तावदग्रे विदांकुर्वन्तु तत्रभवन्तः
„ 7 „ 2 transpose the strokes ॥ from behind ०करणी-यत्वात् after पृथक्करोति
„ 8 „ 3 प्रतियोगिकेन is to be conjectured for प्रतियोगित्वेन
„ 14 „ 8 disjoin विना युग्मानां
„ 18 „ 16 read स्थविष्ठा instead of स्तविष्ठा
„ 22 „ 14 „ हव्ययोधने „ „ हव्ययोधन
„ 24 „ 7 disjoin पिण्डपितृयज्ञं कुरुते
„ 28 „ 5 „ कशिपु शयनीयम् । उपबर्हणमुपधानम् ॥
„ 35 „ 17 read वहन्तीर० instead of वृहन्तीर०
„ 45 „ 3 insert जीवो between च and जीवन्तोरुप
„ 62 „ 3 read ०स्रुतमसि instead of ०स्रुतमसि
„ 91 „ 21 „ हवींषी— „ „ हवीषी—
„ 107 „ 12 „ मूलेभ्यः „ „ मूलेभ्य
„ 109 „ 7 „ विष्ठामनु „ „ निष्ठामनु
„ 112 „ 17 „ चौंसृचानि० „ „ चौंसचानि० (in part of the impression)
„ 141 „ 3 put a stroke after होतोत्तरम्
„ 150 „ 7 read द्विवे instead of द्विवे
„ 156 „ 19 „ मध्ये „ „ मध्य
„ 170 „ 16 „ ०तर्भुयामिति „ „ ०तर्भयामिति
„ 216 „ 11 „ ब्रह्मण „ „ बह्मण
„ 223 note expunge the point after ‘others’
„ 226 „ 4 read निचुक् instead of नि क्
„ „ „ 19 „ ०यासमि० „ „ ०यासुमि०
„ 229 „ 15 „ यज्ञो „ „ यज्ञा
„ 249 „ 13 „ दुवस्यतेत्येषा „ „ दुवस्यतेत्यषा
„ 257 „ 20 „ मघुमत्वं० „ „ मघमत्वं०

Page 258 note 16 read प्रथमं instead of प्रथम
„ 264 „ 13 „ स्वम्
„ 286 „ 3 „ ०न्केयान्स्यादिति „ „ ०न्केयान्स्यादिति
„ 305 „ 6 put a stroke behind ०हरति
„ 310 „ 1 read पुनरुर्जैति instead of पुनरुजति
„ 333 „ 14 „ पूर्णां „ „ पूण
„ „ „ 19 „ पूर्णं० „ „ पुर्णं०
„ 353 „ 5 „ उत्तरामाङ्कति० „ „ उत्तरामङ्कति०
„ 357 „ 2 „ ०धर्षं „ „ ०घष
„ 391 „ 14 „ बभ्रुः „ „ बभ्रः
„ 410 „ 2 disjoin वि म्रधो
„ 412 „ 13 read शाखापवित्रं instead of शाकपवित्रं.



गतः ॥ एवमग्न्याधेयं व्याख्यायानन्तरं कालप्राप्तस्यारम्भप्रकारमाह ॥

अग्निहोत्रमारप्स्यमानो दशहोतारं मनसानुद्रुत्याहवनीये स्रुग्रहं हुत्वाथ सायमग्निहोत्रं जुहोति। १०।

पवमानहविषामुत्कर्षे ऽग्निहोत्रादेरप्युत्कर्षः अग्न्याधेयस्यापरिसमाप्तत्वात् सर्वेष्वन्ते विधानाच्च। अतो यस्मिन्नहनि सेष्टिकमग्न्याधेयं संतिष्ठते तस्मिन्नहन्यग्निहोत्रकालः तस्मिन्नेवास्य प्रदिके ऽस्मावध्वर्युणा दशहोतरि कृते सायमग्निहोत्रं जुहोति यजमानः। यथा चैतदेवं तथोपरिष्टाद्व्यक्तं भविष्यति। स्रुग्रहमिति च आहवनीय इति च विस्पष्टार्थं ब्राह्मणानुकरणार्थं वा ॥

व्याहृतीभिरुपसादयेत्। ११।

तस्मिन्सायमग्निहोत्रे व्याहृतीभिर्हविरुपसादयेत्। नित्यस्तूपसादनमन्त्रो निवर्तते ॥

संवत्सरे पर्यागत एताभिरेवोपसादयेत्। १२।

तत आरभ्य संवत्सरे ऽतीते यदनन्तरं सायमग्निहोत्रहोमः तत्राप्येवमुपसादयेत् ॥ अथाग्नीनाहितवतो ऽग्न्याधेयानन्तरभावि द्वादशाहसाध्यं व्रतमाह ॥

द्वादशाहमजस्रेष्वग्निषु यजमानः स्वयमग्निहोत्रं जुहुयादप्रवसन्नहतं वासो बिभर्ति। १३।

इति द्वाविंशी कण्डिका।

यां प्रथमामाग्निहोत्राय दोग्धि तां दक्षिणां ददाति। १।

अजस्रेषु धार्यमाणेष्वग्निषु यजमानः स्वयं जुहोति नान्यः। कल्पान्तरेषु तूक्तं अन्यो वा जुहुयात्स्वयं त्रयोदशीं जुहुयादिति। तथाध्येनेति क्वचित् चीरेणेति क्वचित्। अप्रवसन् ग्रामान्तरे रात्रिमवसन्। अहतं अकारुहतं अनुपयुक्तं वा। दक्षिणां ददाति व्रतान्ते व्रतदक्षिणां ददाति यस्मा इच्छति॥ व्रतस्य तु द्वादशाहाशक्तावनुकल्प उक्तः कात्यायनेन यथा चीरहोम्यग्निमुपशयीत द्वादशरात्रं षड्रात्रं त्रिरात्रमन्तत इति। तत्र चाजस्रेषु जुहुयादिति होमानुवादेनाजस्रविधिः होमस्यान्यतः सिद्धत्वात्। तथाधानाद्द्वादशरात्रमजस्रा इत्येवाश्वलायनः। तेन सोमपूर्वाधाने ऽप्याधानादारभ्य सह सोमदिवसैर्द्वादशाहेनाजस्रापवर्गः। होमस्तु सोमात्परेषु यावत्संभवं क्रियत इति सिद्धं भवति। भारद्वाजस्त्वाह सोमाधानेनाजस्रान्कुर्यादिति॥ अथ दर्शपूर्णमासारम्भं विधास्यंस्तत्रैवावसरे शाखान्तरीयौ कौचित्कर्मणामारम्भप्रकारविकल्पौ दर्शयति॥

अथैकेषाम्। अग्नीनाधाय हस्ताववनिज्य संवत्सरमग्निहोत्रं हुत्वाथ दर्शपूर्णमासावारभते ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते तत ऊर्ध्वमन्यानि कर्माणि कुरुते। २।

आधानानन्तरं तूष्णीं हस्तावनेनेक्ति तावद्यजमानः। ततो यथोक्तेन विधिनाग्निहोत्रमारभ्य संवत्सरमग्निहोत्रमेव जुहोति न दर्शपूर्णमासा-

वारभते। ततः पूर्णे संवत्सरे तावारभ्य ताभ्यामेव संवत्सरं यजते नान्येष्टिपश्वादिना। अग्निहोत्रं तु क्रियत एव प्रथमत एव प्रारब्धस्याविच्छेद्यत्वात्। आग्रयणमप्यविरुद्धैरनुकल्पैरुभयस्मिन्संवत्सरे क्रियते। ततस्तृतीये संवत्सरे ऽग्निष्टोमेन निरूढपशुबन्धेन वा यजेत। ततः परस्ताद्यथोपपादमन्यानि नित्यनैमित्तिककाम्यानि कर्माणि कुर्वीत इत्ययमेकशाखानुगतः पक्षः। अथापरं दर्शयति॥

त्रयोदशरात्रमहतवासा यजमानः स्वयमग्निहोत्रं जुहुयादप्रवसन्नचैव सोमेन पशुना वेष्ट्वाग्नीनुत्सृजति यथा सुयवसान्कृत्वा प्राज्यात्ताहक्तादिति शाट्यायनिब्राह्मणं भवति। ३।

आधायाग्नीनग्निहोत्रमारभ्य द्वादशाहव्रतविधिना त्रयोदशरात्रमग्निहोत्रं कृत्वानन्तरमेवाग्न्याधेयिकेष्वग्निष्वेवाग्निष्टोमेन निरूढपशुबन्धेन वेष्ट्वा तदन्ते व्यवतस्यानुत्सृजति नाजस्रान्धारयतीत्यर्थः॥ द्वादशरात्रमजस्रेष्वाज्येन स्वयमग्निहोत्रं जुहोति अहतं वासो वस्ते काममन्यो जुहुयाद्व्रतचारी त्वेव स्यात्स्वयं त्रयोदशी जुहोति यां प्रथमामग्निहोत्राय दुहन्ति साग्निहोत्रस्य दक्षिणेति हिरण्यकेशिसूत्रे॥ यथा हि शाकटिको ऽनडुहः सुयवसान् सुभक्षितघासान् कृत्वा प्राज्या वहनाय प्रेरयेत् तथायं यजमानो ऽप्यग्नीन्प्रथममेव सोमेन पशुना वा सुवसान्कृत्वा हविर्वहनाय प्रेरयति। तस्मात्प्रथममेवं कृत्वा ततो यथाकालमिष्टिपशुसोमैर्यजेतेत्यर्थः। एवं प्रासङ्गिकौ कर्मणामारम्भविकल्पावुक्त्वा प्रकृतमेवारम्भप्रकारमनुसरति॥

पूर्वां पश्चाद्यत्ते देवा अदधुरिति सारस्वतौ होमौ हुत्वान्वारम्भणीयामिष्टिं निर्वपति। ४।

अन्वारभ्यते ऽनयेत्यन्वारम्भणीया सा च दर्शपूर्णमासारम्भशेषः। तथा सारस्वतौ होमौ दर्शपूर्णमासावारभमाण इति प्रकृत्य त्रयाणामाम्नानात्। दर्शपूर्णमासयोश्च पूर्णमासः पूर्व इति स्थास्यति। तेन संस्थिते सेष्टिके ऽग्न्याधेये यानन्तरा पौर्णमासी तस्यां सारस्वतौ हुत्वान्वारम्भणीयां निर्वपेत्। पूर्वस्य पर्वण औपवसथ्ये ऽहनीति सत्याषाढः प्रातरन्वाधानं पौर्णमासस्य मा बाधीदिति तस्याभिप्रायः। बौधायनस्तु सारस्वतादि पौर्णमासान्तं सर्वमपि यजनीये ऽहनि विकल्पितवान् यथा सर्वमेवैतदिष्ट्यहनि कुर्यादित्यौपमन्यवी पुत्र इति॥ अत्र सारस्वतयुगलस्यान्वारम्भणीयायाश्चोभयोरपि दर्शपूर्णमासारम्भेण निमित्तेन प्रवर्तमानयोः स्वतन्त्रत्वात्पृथगग्नेः प्रणयनमिष्यते न चाद्य पौर्णमासेन समानाग्नी भवतः सर्वप्रयोगाङ्गत्वात्। तत्र च लिङ्गं पञ्चहोत्रवैश्वानरपार्जन्याभ्यां पृथग्वैश्वदेवप्रणयनानुवादः यथा पशुबन्धवद्गार्हपत्यादग्निं प्रणयन्निति। किं च यान्यत्र क्रतुशरीरान्तर्गतान्यङ्गानि तेषामेवाङ्गिनां समानाग्नित्वमिष्टं न तु बहिस्तन्त्रवर्तिनामपि यथा पञ्च पशवः सौत्रामण्युदवसानीया संभारयजूंषि सावित्राणीत्यादीनाम्। अत एव पशावाग्नावैष्णवान्ते ऽग्नेस्त्यागं सिद्धं कृत्वा वक्ष्यति धारयत्याहवनीयमिति। तस्मात्सिद्धं पृथगग्नीन्येव सारस्वतादीनीति॥

आग्नावैष्णवमेकादशकपालं सरस्वत्यै चरुं सरस्वते द्वादशकपालम्। ५।

उक्तः ॥

अग्नये भगिनेऽष्टाकपालं यः कामयेत भग्यन्नादः स्यामिति । ६ ।

भग्यन्नाद इति व्याख्यातः प्राक् ॥

नित्यवदेके समामनन्ति । ७ ।

गतः ॥

नानातन्त्रमेके । ८ ।

नित्यस्य काम्यस्य च नानातन्त्रत्वविकल्पः ॥

त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः । श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् ॥ त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः । अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेरिति याज्यानुवाक्ये । ९ ।

भगिन इति शेषः ॥

इति त्रयोविंशी कण्डिका ।

चित्तं च चित्तिश्चेति पुरस्तात्स्विष्टकृतो जयाञ्जुहोति । १ ।

उपहोमकालादेव सिद्धेः पुरस्तात्स्विष्टकृत इति पुनर्विधानं प्राङ्नारिष्ठेभ्यो मा भूवन्प्राग्वा समिष्टयजुष इति ॥

चित्ताय स्वाहा चित्त्यै स्वाहेत्येके समामनन्ति। २।

गतः ॥

प्रजापतिर्जयानिति त्रयोदशीम्। ३।

आहुतिं जुहोतीति शेषः। प्रजापतिर्जयानित्यादेरेकमन्त्रत्वस्य ख्यापनार्थं वचनं चतुर्थ्यन्तप्रयोगे ऽप्यधिकारार्थं च ॥

अग्ने बलद् सह ओजः क्रममाणाय मे दाः। अभिशस्तिकृते ऽनभिशस्तेन्यायास्यै जनतायै श्रैष्ठ्यायेति चतुर्दशीं यः कामयेत चित्रं जनतायां स्यामिति। चित्रं भवति शबलं त्वस्य मुखे जायते। ४।

यः कामयेत जनतायां जनसमाजेषु चित्रं स्यां अहो अयमित्थंभूत इति विस्मयनिमित्तं स्यामिति स एतामाहुतिं जुहोति। स तु काममेव चित्रं भवति दोषस्त्वन्यः शबलं श्वित्रमस्य मुखे जायते। तमिमं दोषमनुजानतो ऽयं विधिरिति भावः ॥

मिथुनौ गावौ दक्षिणा। ५।

स्त्रीपुंसौ मिथुनौ। भगिनस्तु नानातन्त्रे ऽन्वाहार्यो दक्षिणा तदितराण्येवाधिकृत्य मिथुनाम्नानात् ॥

सिद्धमिष्टिः संतिष्ठते। ६।

गतः ॥

दर्शपूर्णमासावारप्स्यमानश्चतुर्होतारं मनसानुद्रुत्याहवनीये सग्रहं हुत्वाथ दर्शपूर्णमासावारभते। ७।

सारस्वतान्वारम्भणीयानामप्यारम्भार्थत्वाविशेषे दर्शपूर्णमासावारप्स्यमा-न इत्यच वचनं चतुर्होतृपौर्णमासयोरर्थकृत्यैरप्यव्यवायार्थमिति द्रष्ट-व्यम्॥ दर्शपूर्णमासावारभत इति दर्शशब्दस्याल्पाच्तरत्वात्पूर्वनिपातः। प्रयोगस्तु पूर्णमासस्यैव प्रथमं भवति यत्पौर्णमासीं पूर्वामालभेतेति लिङ्गात् प्रयोगविधिषु तस्यैव प्रथमोद्देशाच्च यथोदित आदित्ये पौर्णमास्या अग्नीषोमाभ्यामिति पौर्णमास्यामित्यादि। तथा अथेमौ दर्शपूर्णमासौ पौर्णमास्युपक्रमामावास्यासंस्थावित्येव बौधायनः॥ तत्र चतुर्होतुरग्निपृथक्त्वं सारस्वताभ्यां व्याख्यातम्। भारद्वाजस्तु सर्वेषा-मेव चतुर्होतॄणां ततस्ततः शेषिणोऽग्निपृथक्त्वं प्रतिषेधति। तथा प्राणा वा एते यच्चतुर्होतारो यच्चतुर्होतॄन्दूलाग्निमपनयेद्यजमानस्य प्राणान्विच्छिन्द्यादिति विज्ञायत इति॥

व्याहृतीभिर्हवींष्यासादयेत्संवत्सरे पर्यागत एता-भिरेवासादयेत्। ८।

व्याख्यातः। उक्तं प्रागमावास्यायां पौर्णमास्यां वाधेय इति। तयोरुभयकालिकयोराधानयोरुभयथा दर्शपूर्णमासारम्भं नियच्छति॥

अमावास्यायामादधानस्यैतत्। पौर्णमास्यां तु पूर्व-स्मिन्पर्वणि सेष्टि सान्वारम्भणीयमाधानमपवृज्य। ९।

इति चतुर्विंशी कण्डिका।

श्वोभूते पौर्णमासेन यजते। १।

यदेतन्महाप्रकरणेनाधानाच्छिन्नकालं दर्शपूर्णमासारम्भणमुक्तं यथा पञ्चे

पवमान्याहीनामिष्टीनामुत्कर्षः संस्थितास्विष्टिष्वागामिपौर्णमास्याम-न्वारम्भणीया ततः पौर्णमासयाग इति तदमावास्यायामादधानस्य। पौर्णमास्यां त्वादधानः सद्य एव सहेष्टिभिरन्वारम्भणीयया चाग्न्याधेयमपवृज्य तदानीमेवाग्नीनन्वाधाय श्वोभूते पौर्णमासेन यजते ॥ पूर्वं पर्वेति पौर्णमास्यत्रोच्यते न तु चतुर्दशी अन्यथामावास्यायां पौर्णमास्यां वाधेय इत्यनेन श्वोभूते पौर्णमासेन यजत इत्यनेन च विरोधात्। चतुर्दश्येव वा पूर्वं पर्व चातुर्मास्येषु तथादर्शनात् न च पौर्णमास्यामाधेय इत्यनेन विरोधः तस्यैव प्रकारविधित्वात्। पौर्णमासेन यजत इत्यस्य च यष्टुं प्रतिपद्यत इत्यर्थः। यथोक्तं हिरण्यकेशिना पौर्णमास्यास्तु पूर्वस्य पर्वण औपवसथ्ये ऽहन्यग्नीनाधाय सेष्ट्यपवृज्य तदानीमेव चतुर्होतारं सारस्वतान्वारम्भणीयां च कुरुते श्वोभूते पौर्णमासीं यजत इति॥ यत्त्वन्यत्त्वाग्निहोत्रारम्भार्थं दशहोत्रादि द्वादशाहव्रतं च तत्सर्वमुभयत्रैव भवत्यविशेषात्। अन्ये तु व्याचक्षते यदेतद्द्वादशाहव्रतं तदमावास्यायामादधानस्य न पौर्णमास्यामिति। तदयुक्तं महाप्रकरणमध्यगतस्यानन्तरस्य च तस्यैकस्यैतच्छब्देन निष्कृष्य परामष्टुमशक्यत्वात् तथेष्ट्यपवर्गविशेषविशिष्टदर्शपूर्णमासारम्भविधायिन्युत्तरवाक्ये तुशब्देन तत्प्रतियोगिन एव प्रकारस्यानन्तरोक्तस्य व्यावर्तनीयत्वाच्च। व्यक्तीकृतं चैतद्धिरण्यकेशिना तेन ह्येवमेव पवमानहविरुत्कर्षादि दर्शपूर्णमासारम्भान्तं कर्म द्वादशाहव्रतवर्जमाध्वर्यवकाण्डे ऽभिधायानन्तरमुक्तं अमावास्यायामादधानस्यैतदिति। द्वादशाहव्रतं तु ततो ऽन्यत्र याजमानकाण्डे सामान्यतश्चोदितं तद्दूरं निवारित एवानयोः संकर इति। किं चात एवाविशेषवचनान्नत्राधानवचनाच्च

सिद्धनक्षत्राधाने ऽप्यभिमतमेवास्यैतद्व्रतमिति। तथाश्वलायनेनाप्य-विशेषेणोक्तं आधानाद्द्वादशरात्रमजस्रा इति। तस्माद्यथोक्त एव युक्तः सूत्रार्थः॥ सर्वाणि त्रेतान्यारम्भणार्थानि दशहोत्रादीनि द्वितीयाद्याधानादिषु नेष्यन्ते। कस्मात्। यस्माद्यावज्जीविकस्यापि प्रयोगस्यैक एवारम्भः। तत्र च लिङ्गं वैश्वानरपार्जन्या पञ्चहोता च नाभ्यावर्त्ततेतेकोपक्रमत्वादिति। द्वादशाहव्रतमपि यां प्रथमामग्निहो-त्राय दोग्धीति प्रथमाग्निहोत्रसंयोगादारम्भार्थैः सह पठितत्वाच्च प्रथमाधान एवेच्छन्ति॥

अनन्तरमाधानादाहिताग्निव्रतानि। २।

अथाहिताग्नेर्यावज्जीविकानि व्रतान्युच्यन्ते। तानि चानन्तरमाधाना-दिति वचनादिष्ट्युत्कर्षे ऽपि नोत्कृष्यन्ते॥

नानृतं वदेत्। ३।

स्मृतिप्राप्तस्यानृतवदनस्याहिताग्निव्रतत्वख्यापनार्थः पुनरुपन्यासः। तस्य चातिक्रमे प्रायश्चित्तविशेषः। प्रयोजनं वक्ष्यति अग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदिति॥

नास्य ब्राह्मणो ऽनाश्वान्गृहे वसेत्। ४।

अनाश्वान् अनशितवान्। बुभुक्षितश्चेद्वसेत्तं भोजयेदित्यर्थः॥

सूर्योढमतिथिं वसत्यै नापरुन्धीत। ५।

ऊढः अपोढः अस्तमितः सूर्यो यस्य स सूर्योढः। तं निवासायागतं निवासयेत्॥

नवीसपक्वस्याश्नीयात्। ६।

यत्तिरोहितस्याग्नेरूष्मणा पक्वं न प्रत्यचाग्निना तद्बीसपक्वं तन्ना-श्नीयात् ॥

छिन्नं दारु नादध्यात्। ७।

उदकछिन्नं दार्वग्नौ नादध्यात् ॥

अन्तर्नाव्यपां नाश्नीयात्। ८।

अन्तर्नावि स्थितः सन्नपो नाश्नीयात्। अन्तर्नावि या आपस्ता इति वा। तथा या अन्तर्नाव्या आप इति कल्पान्तराणि ॥

स्वकृत इरिणे न वसेत्। ९।

स्वभावत ऊषरे देशे न निवसेत् ॥

पुण्यः स्यात्। १०।

पुण्यकर्मा मङ्गलाचारयुक्तः स्यात् ॥

हिङ्कृत्य वाग्यतः स्त्रियमुपेयात्। ११।

ऋतुगमने हिङ्कारमुक्त्वा वाचंयमो भवेत् ॥

व्याहरेद्वा। १२।

गतः ॥

न सायमाहुतावहुतायामश्नीयात्। १३।

सायमित्युभयत्र संबध्यते सायमाहुतावहुतायां न सायमाशं कुर्या-दित्यर्थः ॥

एवं प्रातः। १४।

गतः ॥

आहिताग्नेर्गृहे न सायमहुते भोक्तव्यं तथा प्रातरित्यन्येषां व्रतम्। १५।

अन्येषामप्याहिताग्निगृहवासिनां व्रतमेतत् ॥

नक्तं नान्यदन्नाद्दद्यात्। १६।

अन्नादन्यत् गोहिरण्यव्रीह्यादि नक्तं न दद्यात् ॥

दद्यादित्येके। १७।

गतः ॥

अन्नं तु ददन्नदयीत। १८।

ददन्निति ददद्रूपम्। ददन्नप्यन्नमदयीत आदयेत् न तु विधान्तरेण दद्यादित्यर्थः ॥

नैतस्मिन्संवत्सरे पशुनानिष्ट्वा मांसं भक्षयेत्। १९।

एतस्मिन्नाधानसंवत्सरे पशुना निरूढेनाङ्गभूतेन वानिष्ट्वा पूर्वमग्निभ्यः स्वयं न मांसं भक्षयेत् ॥

मनसाग्निभ्यः प्रहिणोमि भक्षं मम वाचा तं सह भक्षयन्तु। अप्रमाद्यन्नप्रमत्तश्चरामि शिवेन मनसा सह भक्षयतेति यद्यादिष्टो भक्षयेदेतं मन्त्रमुक्त्वा भक्षयेत्। २०।

यदि वृत्तिकर्शितः आर्त्विज्यं कुर्वन् इडामांसमादिष्टो भक्षयेत्तदा भक्षप्रायश्चित्तार्थमेतं मन्त्रं जपित्वा ततो भक्षणमन्त्रेण भक्षयेदित्यर्थः।

[illegible] मांसभक्षणं नातीव दोषवदित्युक्तं भवति ॥

इति पञ्चविंशी कण्डिका ।

इति सप्तमः पटलः ॥

पुनराधेयं व्याख्यास्यामः । १ ।

आहिता अग्नयः पुनर्विधानान्तरेणाधीयन्ते यस्मिन्कर्मणि तत्पुनराधेयं नामाग्न्याधेयस्यैव गुणविकारः ॥

तस्याग्न्याधेयवत्कल्पः । २ ।

गतः ॥

अग्नीनाधायैतस्मिन्संवत्सरे यो नर्ध्नुयात्स पुनरादधीत प्रजाकामः पशुकामः पुष्टिकामो ज्यान्यां पुत्रमर्त्यायां स्वेष्वारुध्यमानेषु यदा वाङ्गेन विधुरतां नीयात् । ३ ।

यो नर्ध्नुयादिति प्रजापश्वादिहान्या वृद्धि[illegible]मुच्यते नर्ध्यभावमात्रं प्रजां पशून्यजमानस्योपदोद्रावेति लिङ्गात् आधानाद्यद्यामयावी यदि वार्था व्यर्थेरनित्याश्वलायनवचनाच्च। ज्यानिर्व्याधादिभिर्बाधः। पुत्रमर्त्या पुत्रमृतिः। स्वेषु ज्ञातिष्वारुध्यमानेषु बलवद्भिः परैर्निगृह्यमाणेषु। यदा वाङ्गेन हस्तपादादिना विधुरतां नीयात् विकलतां गच्छेत्। एतस्मिन्संवत्सरे एतेषु निमित्तेषु कामेषु वा संजातेषु पुनरादधीत ॥ केचित्त्वन्त्यं निमित्तं यदा वेति अविशेषात्सार्वकालिकं मन्यन्ते। अन्ये तु प्रजाकामप्रभृत्येतस्मिन्संवत्सर इति नानुवर्तयन्ति। तदुभयमप्ययुक्तं सर्वादावुपात्तस्य कालस्य सर्वान्प्रत्यविशेषात् यदा

वेति च निमित्तनिर्देशप्रकारत्वाच्च। व्यक्तं चाह सत्याषाढः य एतस्मिन्संवत्सरे ज्यानिं पुत्रमर्त्यां वाभ्येति स्वेन वाङ्गेन व्यृध्येत न वर्ध्नाति स पुनराधेयं कुर्वीतेति। तथा च बौधायनः अग्नीनाधाय पापीयानभूवमज्यासिषि पुत्रो म्रत इत्येतस्मिन्नेव संवत्सर दृष्टं भवतीति॥

आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालं वारुणं दशकपालमग्नये ऽप्सुमते ऽष्टाकपालं मैत्रं चरुमग्निमुद्वासयिष्यन्। ४।

केवलवैश्वानरचोदनासु वैश्वानर एव देवता न तु तद्गुणको ऽग्निस्तस्याश्रवणादिति केचित्। तत्तु मन्दफलं बहुमन्त्रब्राह्मणकल्पविरोधात् इतरथाप्यश्रवणोपपत्तेश्च। तथा हि मन्त्रास्तावद्याज्यानुवाक्यादयस्तद्गुणाग्निलिङ्गा एव यथा वैश्वानरो अजीजनत् पृष्टो दिवीत्यादयः। ब्राह्मणे ऽपि वैश्वानरं द्वादशकपालं निर्वपेदिति विधाय संवत्सरो वा अग्निर्वैश्वानर इति वाक्यशेष आम्नातः। सूत्रकारो ऽपि वायव्यपशावग्नये वैश्वानराय द्वादशकपालं पशुपुरोडाशं निर्वपतीत्युक्त्वा तमेवान्यत्रापि विकल्पयन्नाह यः कश्चनाग्नौ पशुरालभ्यते वैश्वानर एवास्य द्वादशकपालः पशुपुरोडाशो भवतीत्येक इति तथा यदस्य पारे रजस इति वैश्वानराग्निलिङ्गामृचं विनियुङ्क्ते वैश्वानर्या परिषिच्येति। बौधायनेनाप्युक्तं वैश्वानरमवदायाहाग्नये वैश्वानरायानुब्रूहीति। भारद्वाजेनापि वैश्वानरं द्वादशकपालं निर्वपेदिति। अनुवाकाम्नातान्वैश्वानरान्व्याचक्षाणेनोक्तं अग्नये वैश्वानराय पुरोडाशं द्वादशकपालं निर्वपतीति॥ यत्तु अग्नेरश्रवणमुक्तं तदपि तद्धितवृत्तित्वादुपपन्नम्।

यत्र तु सगुणदेवतासंबन्धस्तद्धितवृत्त्या विवचितस्तत्र गुणशब्दादेव तद्धितः क्रियते गुणी त्वश्रुतो ऽपि वाक्यशेषादिनावसीयत इति पन्थाः यथा वैमृधो गृहमेधीयः पाथिकृदित्यादौ। तस्मात्सिद्धं केवलवैश्वानरचोदनास्वपि अग्निर्वैश्वानरो देवतेति॥ उद्वासयिष्यन्निति वक्ष्यमाणकालादुद्वासनात्पूर्वस्मिन्काल इत्यर्थः॥ आग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्निति काम्येष्टिष्वाम्नातायाः द्विहविषो ऽपीष्टेरनया विकल्पमिच्छन्ति ता ब्राह्मणव्याख्याता इति तस्या अप्युपसंग्रहात्॥

या ते अग्न उत्सीदतः पवमाना प्रिया तनूः। तया सह पृथिवीमाविश रथंतरेण साम्ना गायत्रेण च छन्दसा॥ या ते अग्ने पावका या मनसा प्रेयसी प्रिया तनूः। तया सहान्तरिक्षमाविश वामदेव्येन साम्ना त्रैष्टुभेन च छन्दसा। ततो न ऊर्जमा क्षधि गृहमेधं च वर्धय॥ या ते अग्ने सूर्ये शुचिः प्रिया तनूः शुक्रे ऽध्यधि संभृता। तया सह दिवमाविश बृहता साम्ना जागतेन च छन्दसा ततो नो वृष्ट्यावत॥ यास्ते अग्ने कामदुघा विभक्तीरनुसंभृताः। ताभिर्नः कामान्धुक्ष्वेह प्रजां पुष्टिमथो धनम्॥ यास्ते अग्ने संभृतीरिन्द्रः सूकर आभरत्। तासु शोचिषु सीदेह भस्म वैश्वानरस्य यत्। ५।

इति षड्विंशी कण्डिका।

ये ते अग्ने वानस्पत्याः संभाराः संभृताः सह। तेभिर्गच्छ वनस्पतीन्स्वां योनिं यथायथम्॥ अगन्नग्नि-र्यथालोकमसदत्सदने स्वे। अवीरहत्यं देवेषूपागां मनसा सहेति पुरस्तात्स्विष्टकृतः सप्ताहुतीर्जुहोति। १।

जयवद्व्याख्या॥

सिद्धमिष्टिः संतिष्ठते। २।

गतः॥

पौर्णमासीमिष्ट्वा ज्वलतो ऽग्नीनुत्सृजति। ३।

निमित्तकामयोः सतोरागामिना पौर्णमासेनेष्ट्वानन्तरमुत्सर्गार्थामिष्टिं निरुप्य तदन्ते ज्वलतस्तानग्नीनुत्सृजति बुद्ध्योपेक्षते न रक्षतीत्यर्थः। ज्वलत इति वचनान्न निर्वापयति। तच्च परमतेन प्रसक्तं निवार्यते यथाह बौधायनः अद्भिरग्नीन्समुक्ष्येति। केचित्तु पूर्वेद्युरुत्सर्गेष्टिं निरुप्य पौर्णमासानन्तरमुत्सर्गमिच्छन्ति। तदयुक्तं अग्निहोत्रमारप्स्यमान इत्या-दिवदुद्वासयिष्यन्नित्यनेनोत्सर्गेष्टेरुत्सर्गादपृथक्कालत्वावसायात् उत्सर्गे-ष्ट्यन्ते चाग्नीनामदृष्टतिरोधानेनाकर्माङ्गत्वात् विपर्ययस्यैव सत्याषा-ढादिभिर्व्यक्तवचनाच्च॥ अथैषात्र मीमांसा। पुनराधाननिमित्ते संजाते यदि स्वयमग्नयो विच्छिद्येरन्विच्छिन्नेषु वाग्निषु निमित्तं जायेत तदा किं पुनराधानमात्रं कर्तव्यमाहो स्विदुत्पाद्याग्नीनुत्सृज्य पुनरा-धातव्यमिति। प्रथमः कल्प इति ब्रूयात्। कुतः। धार्यमाणानामग्नीनां हानार्थत्वादुत्सर्गविधानस्य। नह्युद्वासनापेक्षायां स्वयमुद्वासितानां

प्रसभमनुत्सर्गो दोषाय प्रत्युत गुणायैव वीरहत्यादोषश्रुतेस्तस्मात्सिद्धं पुनराधानमात्रमेव कार्यं न पुनरुत्सर्ग इति ॥

संवत्सरं परार्ध्यमुत्सृष्टाग्निर्भवति । ४ ।

परार्ध्यशब्दः षडवरार्ध्यानित्यत्रावरार्ध्यशब्देन व्याख्यातः । संवत्सर एवोत्सर्गस्य परावधिः । अतोऽर्वागेव संवत्सरादाधातव्यमित्यर्थः । तेन संवत्सरातिक्रमेऽग्निहोत्राद्यतिक्रमप्रायश्चित्तानि भवन्ति । बौधायनमतात्तु सत्यपि निमित्ते यावत्पुनराधेयकालमासित्वा कालेऽग्नीनुत्सृज्य सद्य एवाधानं भवति यथोत्सर्गेऽप्यनन्तरमाह तदानीमेवाङ्गिरोग्नीन्समुत्त्य ब्रह्मौदनं अपयित्वोपवसतीति । कात्यायनश्चाह चिरात्रावरमग्नीनुत्सृज्य सद्यो वेति । सत्याषाढस्त्वाह यावद्दर्शपूर्णमासावविहितौ तावच्चिरमवसृष्टाग्निर्भवति संवत्सरं द्वादशाहं वेति ॥

रोहिणी पुनर्वसू अनुराधा इति नक्षत्राणि । ५ ।

नक्षत्रान्तरपरिसंख्यानार्थं वचनं नित्यत्वख्यापनार्थं चैषाम् । तेन पूर्वविप्रतिषेधेऽपि नक्षत्रमेवाद्रियते ॥

वर्षासु शरदि वादधीत । ६ ।

एतावेवर्तू सर्ववर्णानां भवतः । बौधायनस्त्वत्राह येयमाषाढ्याः पौर्णमास्याः पुरस्तादमावास्या भवति सा सकृत्संवत्सरस्य पुनर्वसुभ्यां संपत्स्यते तस्यामादधीतेति ॥

कृताकृताः संभारा यजूंषि च भवन्ति । ७ ।

आग्न्याधेयिकाः संभाराः पक्षे कृताः पक्षे अकृताश्च ब्राह्मणे भवन्ति। तथाधानयजूंषि च। यथर्ष्याधानादीनीत्यर्थः॥ तथा च ब्राह्मणं न संभृत्याः संभारा न यजुः कर्तव्यमित्यथो खलु संभृत्या एव संभाराः कर्तव्यं यजुरिति। तेषां चोभयेषां सहभिष्टत्वात्सह प्रवृत्तिः सह वा निवृत्तिर्भवति॥

अपि वा पञ्च पार्थिवान्संभारानाहरति एवं वानस्पत्यान्। ८।

पूर्वसूत्रे द्वौ कल्पावुक्तौ। सप्तकादिषु संभारकल्पेष्वनियमेनान्यतमः कल्पः स्यादित्येको न कश्चिदिति द्वितीयस्तृतीयस्त्वयं कल्पो नियमेन पञ्चकल्पः स्यान्नान्य इति॥

आयतनेषु पुराणान्दर्भान्संस्तीर्य भूमिर्भूम्नेति सर्पराज्ञीभिर्गार्हपत्यमादधाति। ९।

अथारण्याहरणादि समानमा गार्हपत्याधानात्। तत्र संभारकाले पुराणानपि दर्भान्संभृत्य निवपनकाले संभाराणामुपरि तानपिस्तृणाति। तानेव त्वसंभारपक्षे॥ ततो गार्हपत्याधानकाले सर्वाग्न्याधेयिकमन्त्रान्ते चतसृभिरपि सर्पराज्ञीभिर्गार्हपत्यमादधाति। सर्पराज्ञीभिरेव त्वयजुःपक्षे। ता अपि यजमानो ऽनुवर्तयते येनयेनादधातीत्यविशेषवचनात्॥

मध्यंदिन इतरान्। १०।

अह्नो नवधाकृतस्य पञ्चमो भागो मध्यंदिनः तथा बृहस्पतेर्मध्यंदिन इत्यच विवेचनात्। तत्र सर्वान्मध्यंदिन इति कल्पान्तरकाराः॥

उपोलवैर्दर्भैः परुल्कैः संवत्सरप्रवातैराहवनीयं ज्वलन्तमुद्धरति । ११ ।

उपोलवा इत्यालवेभ्य उत्थिता वच्यन्ते। परुल्काः परुश्मन्तः पर्ववन्तो वा। संवत्सरप्रवाताः संवत्सरमुपशुष्काः। ते प्रणयनीयेध्मस्य स्थाने भवन्ति ॥

यत्त्वा क्रुद्धः परोवपेति त्वामग्निम्। यत्ते मन्युपरोप्तस्येत्यारभन्। १२ ।

आदधीतेति शेषः ॥

मनो ज्योतिर्जुषतामिति बृहस्पतिवत्यर्चोपतिष्ठते । १३ ।

अग्नीनिति शेषः। तत्राहितमाहितमुपतिष्ठत इति भारद्वाजः ॥

सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति । १४ ।

अनयैवात्र पूर्वाहुतिः न तूष्णीम्। नापि द्वादशगृहीतमग्निहोत्रस्य स्थाने भवति मन्त्रवर्णात्त्वग्निर्देवता। प्रातर्होमविकारत्वं च पूर्ववत् ॥

इति सप्तविंशी कण्डिका ।

आग्नेयं पञ्चकपालं निर्वपत्यष्टाकपालं वा । १ ।

गतः ॥

यदि पञ्चकपालो गायत्र्यौ संयाज्ये। यद्यष्टाकपालः पङ्क्त्यौ । २ ।

यस्याजुषद्दिग्रा हि त इति गायत्र्यौ। पङ्क्त्यौ स्वयमेव दर्शयिष्यति ॥

सर्वमाग्नेयं भवति। ३।

यदस्यामिष्टौ हविर्देवतासंयुक्तं तत्सर्वमाग्नेयं भवति। विकारान्स्वयमेव तत्र कर्तव्यान्वक्ष्यति ॥

पञ्चदश सप्तदश वा सामिधेन्यः। ४।

गतः ॥

सामिधेनीप्रभृत्युपांशु यजत्योत्तमादनूयाजादुच्चैः स्विष्टकृतम्। ५।

यजतिरत्र प्रकरणार्थः उच्चैरुत्तमं संप्रेष्यतीति लिङ्गात् तेनोपांशु प्रचरतीति श्रुतेश्च। तेनाध्वर्युनिगदा अप्युपांशवो भवन्ति ॥ अथ याजुर्वैदिकहौत्रार्थं याज्यानुवाक्यासु होतुर्विकारानाह ॥

अग्नाग्ने ऽग्नावग्ने ऽग्निनाग्ने ऽग्निमग्न इति चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्दधाति। ६।

अनेनादितश्चतुर्षु प्रयाजेषु याज्यागतानामाग्नेयशब्दानां पुरस्तादावापिकान्विभक्त्यग्निशब्दान्निधाय पाठः प्रदर्श्यते। तद्यथा समिधो अग्नाग्न आज्यस्य वियन्तु तनूनपादग्नावग्न आज्यस्य वेत्वित्यादि। अग्नाविति संबुद्धे रूपं द्रष्टव्यम् ॥

नोत्तमे। ७।

प्रयाजानूयाजेष्वेव विभक्तीः कुर्यादित्यविशेषश्रुतेः पूर्वसूत्रेण प्रयाजचतुष्टये विभक्तिचतुष्टयनियमाच्च पञ्चमे ऽपि अनियमेन न्यायात्काचिद्विभक्तिः कार्येति भ्रमो मा भूदित्यारम्भः ॥

विभक्तिमुक्त्वा प्रयाजेन वषट्करोति । ८ ।

अथवा विभक्तिमुक्त्वा प्रयाजयाज्यया वषट्करोति। याज्यायाः पुरस्ताद्वा विभक्तिं दधातीत्यर्थः। तद्यथा अग्ना समिधो ऽग्न आज्यस्य अग्नौ तनूनपादग्न आज्यस्य वेत्वित्यादि ॥

यं कामयेतर्ध्नुयादिति तस्योपरिष्टाद्येयजामहाद्विभक्तिं दध्यात्पुरा वा वषट्कारात् । ९ ।

काम्याविमावपरौ कल्पौ। येयजामहादुपरिष्टाद्व्याहृतिभ्यश्च पुरस्ताद्विभक्तिरित्येकः कल्पः। तद्यथा ये यजामहे ऽग्ना भूर्भुवः स्वः समिधो ऽग्न आज्यस्य ये यजामहे ऽग्ने भूर्भुवः स्वः तनूनपादित्यादि। पुरा वषट्कारादिति द्वितीयः। तत्र श्रुतिश्च विभक्तावेव भवति तद्यथा वियन्त्वग्ना३ वौषडित्यादि ॥

अग्निं स्तोमेन बोधयेत्याग्नेयस्याज्यभागस्य पुरोऽनुवाक्या भवति। अग्न आयूंषि पवस इति सौम्यस्य। १० ।

अत्र देवतानिगमेषु सोमस्य स्थाने ऽग्निं पवमानं निगमयेयुः यथाग्नये पवमानायानुब्रूहीत्यादि ॥

अग्निर्मूर्धेति वा सौम्यस्य कुर्यात्। ११ ।

अस्मिंस्तु पक्षे अग्निमेव केवलं निगदेयुरिति शेषः ॥

प्रजाकामपशुकामस्य प्रजाव्यृद्धपशुव्यृद्धस्य वा। १२।

प्रजया व्यृद्धो नष्टप्रजः तथा पशुव्यृद्धः। एषामप्यग्निर्मूर्धेति सौम्यस्य कुर्यात् ॥

अग्निन्यक्ताः पत्नीसंयाजानामृचो भवन्ति ।१३।

याः पत्नीसंयाजानामृचो याज्यानुवाक्याः ता अग्निन्यक्ताः निषिक्ताग्निशब्दा भवन्ति । तास्वृत्तु देवताशब्देभ्यः परं तत्समानया विभक्त्याग्निशब्दः प्रक्षेप्तव्य इत्यर्थः यथा विश्वतः सोमाग्ने वृष्णियमित्यादिनोक्तः पत्नीसंयाजो विक्रियते तस्य स्वयमनाग्नेयत्वात् सर्वाग्नेयार्थत्वाच्च विकारस्य । तथा च ब्राह्मणं अग्निन्यक्ताः पत्नीसंयाजानामृचः स्युः तेनाग्नेयं सर्वं भवतीति ॥ ऋच इति वचनाच्च नाध्वर्युनिगमेषु विकारः । आज्यभागानन्तरं व्युत्क्रमेण पत्नीसंयाजवचनमुत्तरसूत्रे सहोभयेषां विकल्पविधानार्थं ब्राह्मणानुसारार्थं च ॥

अपि वा यथापूर्वमाज्यभागावेवं पत्नीसंयाजाः ।१४।

यथापूर्वं यथाप्रकृतीत्यर्थः ॥

अग्ने तमद्याश्वमित्यक्षरपङ्क्तयो याज्यानुवाक्या भवन्ति । द्वे आग्नेयस्य द्वे स्विष्टकृतः ।१५।

आदितो द्वे प्रधानस्य परतो द्वे स्विष्टकृतो ऽष्टकपालपक्षे यदि पञ्चकपालो गातव्यौ संयाज्ये यद्यष्टाकपालः पङ्क्त्याविति नियमात् ॥

पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुतीर्जुहोति ।१६।

अभितः पुरोडाशं पुरोडाशेज्यायाः पुरस्तादेकामुपरिष्टादन्यामित्यर्थः । पुरोडाशस्योपरि अधस्तेति केचित् । तदयुक्तं उत्तरविकल्पानौचित्यात् अभितो वपां जुहोतीति श्रुतेः सूत्रकृतैवान्यथा व्याख्यानाच्च ॥

पुनरूर्जति वा पुरस्तात्प्रयाजानां सह रय्येत्युपरिष्टादनूयाजानाम् । १७ ।

गतौ ॥

एतद्वा विपरीतम् । १८ ।

उपरिष्टात्प्रयाजानां पुरस्तादनूयाजानामित्यर्थः ॥

उभयीर्दक्षिणा ददाति । १९ ।

इत्यष्टाविंशी कण्डिका ।

आग्न्याधेयिकीः पौनराधेयिकीश्च पुनर्निष्कृतो रथ इत्येताः शतमानं च हिरण्यम् । १ ।

पौनराधेयिकीश्च पुनर्निष्कृतो रथ इत्येता इत्यन्वयः । उक्ता ह्येता ब्राह्मणे पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः पुनरुत्सृष्टोऽनड्वानिति ॥ तत्र पुनर्निष्कृतः पुनः संस्कारेण नवीकृतः । पुनरुत्स्यूतं उतं दार्ढ्यार्थं सूचैरुत्स्यूतम् । पुनरुत्सृष्टः अवसन्नो गौः ॥ तथा बौधायनः पुनर्निष्कृतो रथो दक्षिणेति पुनःसंस्कृत एव भवति पुनरुत्स्यूतं वास इति पुनःसंस्कृतमेवैतद्भवति पुनरुत्सृष्टोऽनड्वानिति अवशीर्णगत्र एवैष उक्तो भवतीति ॥ शतमानं हिरण्यमित्युक्तं तत्र किं रजतस्यापि हिरण्यस्य दानं लभ्यते नेत्याह ॥

तस्माद्रजतं हिरण्यमित्युक्तम् । २ ।

ब्राह्मणे तस्माद्रजतं हिरण्यमित्यारभ्य तस्माद्बर्हिषि न देयमित्युक्तम् । ततः स्वर्णमेव देयमिति भावः ॥

पुनरभिहितो रथः पुनरुत्स्यूतं स्यामूलं पुनःकामस्याश्वा इत्येकेषाम्। ३।

पुनरभिहितः पुनःसंस्कृतः। स्यामूलं वासोविशेषः यथा स्यामूलेन क्षौमेण वाश्वं संज्ञपयन्तीत्यादौ। विकल्प्यते चैतद्द्वयं पुनर्निष्कृतादिभिः। पुनः काम्यत इति पुनःकामः पुनराधेयफलम्॥

यदीतराणि न विद्येरन्नप्यनड्वाहमेव दद्यात्। अनडुहि ह वा एते च कामा अतश्च भूयांस इति पैङ्गायनिब्राह्मणं भवति। ४।

अनड्वानिति पुनरुत्सृष्ट एव गृह्यते यदीतराणि न विद्येरन्नितीतरशब्दसामर्थ्यात्। स चान्याधेयिकीरपि निवर्तयति अनड्वाहमेवेत्यवधारणात्॥

देवे अग्नौ देवो अग्निरिति द्वयोरनूयाजयोर्विभक्ती दधाति। ५।

तद्यथा देवे अग्नौ बर्हिः देवो अग्निर्नराशंस इति॥

नोत्तमे। ६।

व्याख्यात उत्तमप्रयाजेन॥

उच्चैरुत्तमं संप्रेष्यति। ७।

संप्रेष्यतीति प्रदर्शनार्थम्। याज्याप्युच्चैरेव यथोक्तमुपांशु यजत्योत्तमादनूयाजादिति॥

सिद्धमिष्टिः संतिष्ठते । ८ ।

गतः ॥

आग्निवारुणमेकादशकपालमनुनिर्वपति सर्वेषामनु-निर्वाप्याणां स्थाने द्विदेवत्यानां वा । ९ ।

द्वितीयस्मिन्पक्षे पवमानहविषामन्ते आग्निवारुणः तदन्त आदित्यः तदन्ते वैष्णव इति क्रमः ॥

सिद्धमिष्टिः संतिष्ठते । संतिष्ठते पुनराधेयम् । १० ।

गतौ । तथाग्निहोत्रादीनि प्राप्ते काले भवन्ति । नन्वारम्भार्था दर्श-होत्रादय इति प्रागेव दर्शितम् ॥

यस्तृतीयमादधीत स एतान्होमाञ्जुहुयाल्लेकः सलेकः सुलेक इति । ११ ।

अथ तृतीयाधाने कश्चिद्विशेष उच्यते तत्र यः पराचीनं पुनराधेया-दग्निमादधीत स एतान्होमाञ्जुहुयादिति श्रुत्यनुरोधात् । यः प्रथम-मग्नीनाधाय ततो द्वितीयं पुनराधेयं कृत्वा पुनस्तृतीयमाधत्ते विशे-षवचनात् तस्यैते होमा भवन्ति । यथा कथंचिद्वा तृतीयाधाने विशे-षावचनात् तथान्यत्र मीमांसा किं तृतीये पुनराधाने एते होमाः आहो स्विदग्न्याधेये उतोभयस्मिन्निति । प्रकरणात्पुनराधेय इति केचित् । अग्निमादधीतेति श्रुतेरग्न्याधेय इत्यन्ये । उभयस्मिन्नित्येव सूत्रकाराभिप्रायः यस्तृतीयमादधीतेत्यविशेषवचनादेव । तथा चोभ-यमाह बोधायनः अथेदं तृतीयाधेयं कतरन्नु खल्विदमुपनिश्रयत्य-

न्याधेयं पुनराधेयं वेत्यग्न्याधेयमेवेति ब्रूयादिति। तथा पुनराधेय-विधानानन्तरमाह तृतीयमादधान आग्नेयस्य पञ्चकपालस्य पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति लेकः सलेकः सुलेक इति॥ एतेनैवाग्न्याधेयकल्पेनैषां होमकालो व्याख्यातः। अथ प्रायश्चित्तं पुनराधानमपि प्रसङ्गादत्रैवोपदिशति॥

यद्यरण्योः समारूढो नश्येत्। १२।

पुनराधेयं प्रायश्चित्तिरिति वक्ष्यमाणेन संबन्धः। तत्र समारूढेष्वग्निष्वरणिनाशो ऽग्निनाशः यथोक्तमाश्वलायनेन समारूढेषु चारणीनाश इति। स चारणिनाशो द्विविधः शक्तिनाशः स्वरूपनाशश्च। तत्र शक्तिनाशो मन्थनासामर्थ्यं स्वरूपनाशस्त्वपहरणदाहदूषणादिनानेकविधः। दूषणं मूत्रपुरीषाद्युपहतिः यामधिकृत्य स्मर्यत उपहतानामुत्सर्ग इति। तदेवमरण्योरुभयविधनाशे पुनराधेयम्॥ तत्र शक्तिनाशे ऽनुग्रहमाह भारद्वाजः तत्र च लौकिकाग्नावुपावरोहणं स्यादिति। स्वरूपनाशे ऽप्याह बौधायनः अपहृताग्नेर्नष्टारणीकस्य च ब्रह्मौदनेनैव प्रतिपद्यते सिद्धमग्न्याधेयं कामं नष्टेषु वापहृतेषु वाग्निषु नाद्रियेताग्न्याधेयं आधानप्रभृति यजमान एवाग्नयो भवन्ति तस्य प्राणो गार्हपत्यो ऽपानो ऽन्वाहार्यपचनो व्यान आहवनीयः काममुपावरोह्य जुहुयादिति। तथोत्तरारण्युभयविधनाशे ऽप्याह भारद्वाजः अथ यद्युत्तरारणिः समारूढा जीर्येन्नश्येद्वाधरारण्या आहृत्येति विज्ञायत इति। आहृत्येति अधरारणीं छित्त्वैकः खण्ड उत्तरारणीत्वेनाहर्तव्य इत्यर्थः॥ एवं चाधरारणिस्वरूपनाशे पुनराधेयमेवेत्युक्तं भवति। आहवनीयादेस्तु समारूढस्यारणीनाशे पुनर्योनित उत्पत्तिमिच्छन्ति

स्वयोनौ विद्यमाने ऽत्यन्तोत्सादायोगात्॥ अथासमारूढे ऽग्नावरणी-नाशे को विधिः। किमत्र प्रष्टव्यम्। यदा भ्रियमाणो ऽग्निरनुगतो ऽरणी अपेक्षिष्यते तदागत्यभावादाधानं भविष्यति। तथा छन्दोग-परिशिष्टे कात्यायनः अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः पालयेदुपशान्ते ऽग्नौ पुनराधानमिष्यत इति। तथाप्यनुग्रहमाह भारद्वाजः यद्यरणी समारूढा जीर्येद्भिद्येद्दुष्येद्वा शकलीकृत्य गार्हपत्यं प्रदीप्य प्रक्षिप्य प्रज्वाल्यादत्ते दक्षिणेनोत्तरारणिं सव्येनाधरारणि-मुपर्यग्नौ धारयञ्जपत्युत्तिष्ठाग्ने प्रविश योनिमेतां देवयज्यायै त्वा वोढवे जातवेदः अरणेररणी अनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णु-दस्वेति अथैनं स्वेन मन्त्रेण स्वयोनौ समारोप्य मथित्वाग्नी विहृत्य जुहुयात्। स्वेन मन्त्रेण समारोपणमन्त्रेण। स्वयोनावरण्योर्विहृत्य जुहुयात् यथाकालं विहृत्य तत्तद्धोमादि कार्यं कुर्यादित्यर्थः॥

यस्य वोभावनुगतावभिनिम्रोचेदभ्युदियाद्वा पुनरा-धेयं तस्य प्रायश्चित्तिः।१३।

वाकारः समुच्चयार्थः। उभावित्यग्न्योः परामर्शः अनुगतशब्दसमभि-व्याहारात् तौ च गार्हपत्याहवनीयौ प्राधान्यात्। निम्रोचनमस्तमयः॥ तदयमर्थः। अग्निहोत्रार्थं विहृतमजस्रं वाहवनीयं गार्हपत्यं चोभाव-नुगतावभि सूर्यो निम्रोचेदुदियाद्वा तस्य पुनराधेयं प्रायश्चित्तिरिति॥ केचित्पुनरत्राविहृते आहवनीये केवलगार्हपत्यानुगमने ऽप्युभयानुग-तिमिच्छन्ति पश्चाद्धि स तर्हि गत इति लिङ्गेनाविहृतावस्थायामा-हवनीयस्य गार्हपत्यानुप्रवेशानुगमनात्। तत्तु न मृष्यामहे। कस्मात्। उभावित्यनेन तावद्विरोधात्। नह्येको ऽग्निरुभाविति शक्यते व्यपदेष्टुं

न च यथोक्ताल्लिङ्गादाहवनीयस्य गार्हपत्यानुप्रवेशसिद्धिस्तस्यान्यपरत्वात्। अस्तु वानुप्रवेशः तथाप्यनुप्रविष्टो ऽयमानुमानिको ऽग्निरस्त्वस्याग्निवन्नाग्नितद्भेदव्यवहारभाजनं भवितुमर्हति प्रत्यक्षाग्निगोचरत्वात्सर्वाग्निव्यवहाराणां यथान्तराग्नी तिष्ठन् यदि गार्हपत्याहवनीयावित्यादि। किं चानुगमनव्यवहारो ऽपि प्रत्यक्षाग्निनाशगोचर एव दृष्टः यथा यदि पूर्वो ऽनुगतः यदि गार्हपत्य आहवनीयो वानुगच्छेदित्यादि। तथा परोक्षव्यतिरेकश्च दृष्टः यदरण्योः समारूढो नश्येदिति। किं चैवं परोक्षस्याप्यग्नेरनुगमनमिच्छतः सर्वत्राविहृतावस्थायां गार्हपत्यानुगतावाहवनीयानुगतिप्रायश्चित्तमपि प्रसज्येत। तथोभयसंसर्गात्संसर्गप्रायश्चित्ताद्यपि प्रसञ्जयितव्यम्। तस्मात्सिद्धं न केवलगार्हपत्यानुगमनमुभयानुगमनमिति न चोभावनुगतावित्युभयाभावमात्रलक्षणेति युक्तं मुख्यार्थसंभवे लक्षणाश्रयणस्यायुक्तत्वात्। तस्माद्ध्रियमाणोभयविनाशविषयो ऽयं विधिरित्येव सांप्रतम्। एवं चाविहृतावस्थायां केवलगार्हपत्यानुगमने सतोरप्युदयास्तमययोरनुगतिप्रायश्चित्तमनुद्धरणप्रायश्चित्तं च कृत्वाग्निहोत्रहोमः कार्य इति सिद्धं भवति॥

पुनराधेयमित्याश्मरथ्यो ऽग्न्याधेयमित्यालेखन आलेखनः। १४।

आलेखनमतप्रदर्शनेनैव विकल्पसिद्धावाश्मरथ्यमतप्रदर्शनेन स्वमतसंवादः ख्याप्यते। पुनराधेयं प्रत्यादरविशेषार्थमिति वेदितव्यम्॥

इत्येकोनत्रिंशी कण्डिका।

इति श्रीभट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायामष्टमः पटलः। इति पञ्चमः प्रश्नः॥

ओम् ॥

अथाग्न्याधेयानन्तरमग्निहोत्रं व्याचिख्यासुरधिकारं दर्शयति ॥

अग्निहोत्रं व्याख्यास्यामः । १ ।

अग्निहोत्रशब्दः कर्मनामधेयं अग्नेर्होत्रमस्मिन्निति होमे ऽग्निदेवतासंबन्धात् यथोक्तं ब्राह्मणे स एतद्भागधेयमभ्यजायत यदग्निहोत्रं तस्मादग्निहोत्रमुच्यत इति। क्वचिद्द्रव्यवचनो ऽपि यथाधिश्रित्याग्निहोत्रं यस्याग्निहोत्रं दुह्यमानमित्यादौ ॥

अधिवृक्षसूर्य आविःसूर्ये वा धृष्टिरसि ब्रह्म यच्छेत्युपवेषमादाय गार्हपत्यमभिमन्त्रयते सुगार्हपत्य इति।२।

यस्य वोभावनुगतौ यस्य वाग्निभिरग्नीनित्यादिवत्समुच्चयार्थे वाशब्दः। सूर्यशब्देनोभयत्र रश्मिलक्षणा। भूमेरुत्थिता रश्मयो ऽधिवृक्षमेवं निविशन्ते यस्मिन्काले सो ऽधिवृक्षसूर्यः। तथा प्राच्यां दिशि रश्मय आविर्भूता यस्मिन्काले स आविःसूर्यः। एतमर्थमभिप्रेत्योक्तमुद्यत्सु रश्मिषु दर्शहोत्रेति ॥ केचित्त्वाविःसूर्य इत्यपि सायंविहरणस्यैव कालविकल्पं मन्यन्ते। तदयुक्तं प्रातरपि विहरणकालस्य वक्तव्यत्वादनेन च तदवगमादतो ऽन्यस्य चावचनात् अन्यथा प्रातर्विहरणकालस्यानियतकालत्वप्रसङ्गाच्च। न वास्त्विति वाच्यं उदयातिक्रमे प्रायश्चित्तवचनात्। अत एव तर्हि प्रायश्चित्तवचनात्कालविशेषो

ऽवगम्यत इति चेत्समानमिदं विहरणे ऽपीति । तत्रापि कालो विधेयो न स्यात् । तस्माद्यथोक्त एव सूत्रार्थः ॥ न विद्युदसीत्यपामुपस्पर्शनं दर्विहोमत्वात् । उपवेषस्तु प्रागेव व्याख्यातः ॥

अथैनं बोधयत्युद्बुध्यस्वाग्ने प्रति जागृह्येनमिष्टापूर्ते संसृजेथामयं च । अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदतेति । ३ ।

बोधयति प्रादुष्करोति । उद्बुध्यस्वाग्न इति मन्त्रोच्चारणमेव बोधनमित्यपरम् ॥

उद्धरेत्येव सायमाह यजमानः । उद्धरेति प्रातः । ४ ।

उद्धरेति द्विरुक्तिर्वैचित्र्यार्था । सायं च प्रातश्चोद्धरेत्याहेत्यर्थः । तत्रोद्धरेत्यनुज्ञामात्रं यजमान आह उद्धरणमन्त्रमध्वर्युरित्येवकारार्थः । यद्वा स्वयं जुह्वदपि स्वयमात्मानमनुजानीयादिति न्यायेनोद्धरेत्येवाहेत्यर्थः । तत्रैव भिन्नक्रमो वा योजनीय उद्धरेत्याहैवेति ॥

सहस्रं तेन कामदुघो ऽवरुन्द्धे । ५ ।

तद्वत्तेनानुज्ञाविषयेण परामर्शद्वारेण लक्षितलक्षणयाग्निहोत्रं परामृश्यते स्तूयते च । तदग्निहोत्रेण सहस्रं कामदुघो गा अवरुन्द्धे लभत इति ॥ तथा च श्रुतिमुदाहृत्य व्याचष्टे बौधायनः अथ यस्याग्निहोत्रमुद्धरति सहस्रं तेन कामदुघो ऽवरुन्द्ध इत्यथ यस्याग्निहोत्रं जुहोति सहस्रं तेनेत्येवेदमुक्तं भवतीति ॥

वाचा त्वा होत्रा प्राणेनोद्गात्रा चक्षुषाध्वर्युणा मनसा

ब्रह्मणा [illegible]धैतैस्त्वा पञ्चभिर्दैव्यैर्ऋत्विग्भिरुद्धरामीति गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरति। ६।

प्रज्वाल्यैवोद्धरति ॥

भूर्भुवः सुवरुद्ध्रियमाण उद्धर पाप्मनो मा यदविद्वान्यच्च विद्वांश्चकार। अह्ना यदेनः कृतमस्ति पापं सर्वस्मान्मोद्धृतो मुञ्च तस्मादित्युद्ध्रियमाणमभिमन्त्रयते यजमानः सायम्। रात्र्या यदेनः कृतमस्ति पापं सर्वस्मान्मोद्धृतो मुञ्च तस्मादिति प्रातः। ७।

प्रातस्त्वेतस्यैव मन्त्रस्य रात्र्या यदेन इत्येतावान्विकारः ॥

[illegible] ऽग्नये मे विद्युग्निपतये ऽग्नये मे मृड। अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जित्यै। तयानन्तं काममहं जयानि प्रजापतिर्यं प्रथमो जिगायाग्निमग्नौ स्वाहा। ८।

इति प्रथमा कण्डिका।

अग्ने सम्राडजैकपादाहवनीय दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय। पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके। यो नो अग्ने निष्ट्यो यो ऽनिष्ट्यो ऽभिदासतीदमहं तं त्वयाभिनिदधामीति पुरस्तात्परि-

क्रम्योदङ्मुखः प्रत्यङ्मुखो वा सायमायतनेऽग्निं प्रतिष्ठापयति। प्राङ्मुखः प्रातः । १ ।

न पुरस्तात्परिक्रमणं प्रातः ॥

स्वयं यजमान इध्मानाहरति विश्वदानीमाभरन्तो नातुरेण मनसा। अग्ने मा ते प्रतिवेशा रिषामेत्येतया । २ ।

इध्मानेधान्स्वयमाहरति न त्वन्येनाहारयति ॥

यदग्ने यानि कानि चेत्येताभिः पञ्चभिः प्रतिमन्त्रमग्निषु महत इध्मानादधाति । ३ ।

इदमपि याजमानमेव यजमानाधिकारात्कल्पान्तरेषु व्यक्तत्वाच्च। सत्याषाढेन तावद्याजमानकाण्ड एवेध्मानामाहरणमाधानं चोभयमुक्तम्। भारद्वाजोऽप्याह स्वयं यजमान एधानाहृत्याग्निषु महत इध्मानादधातीति । महत इध्मानिति यावन्तः समिन्धनार्थायालं तावत एकैकस्मिन्नादधातीत्यर्थः ॥

आहवनीये वर्षिष्ठम् । ४ ।

यथान्येभ्यो वर्षिष्ठं भवति तथा ॥

यथाहितास्तेनानुपूर्व्येणाहवनीयाद्वा प्रक्रम्य । ५ ।

इध्मानादधातीत्यर्थः। आहवनीयप्रक्रमेऽपीतरेषां यथाधानमेव क्रमः॥

तथाग्निराधेयो यथाहुतिर्न व्यवेयात् । ६ ।

तथाग्निरुन्मुखार्चिर्विधातव्यो यथेध्मस्योपरि दत्तामाहुतिमिध्मो न व्यवेयात् व्यवदध्यात् ॥

नान्तराग्नी संचरति। ७।

अग्नी इति गार्हपत्याहवनीयौ गृह्येते प्राधान्यात् तयोत्तरसूत्रे व्यक्तत्वाच्च ॥

यदि पूर्वो ऽनुगतः संचर्यम्। ८।

पूर्वस्मिन्ध्रियमाणे ऽपराग्न्यनुगतावसंचरणार्थं वचनं अन्यथा तदानर्थक्यात्। अथास्यैवार्थवादं दर्शयति ॥

पश्चाद्धि स तर्हि गतः। ९।

तर्हि तस्मिन्काले सो ऽग्निः पश्चाद्गार्हपत्ये स्वयोनौ हि गतः। तेन संचर्यमिति ॥

कामं हुते संचर्यमित्येके। १०।

अजस्रविषये साङ्गाद्धोमादुत्तरकालमन्तराग्न्योरयं संचरणविकल्पः। प्रणयनकल्पे ऽपि प्रधानहोमादुत्तरकालमिति केचित् ॥

नक्तमाहवनीयं धारयति। ११।

पूर्वं त्वाहवनीयस्य सायंप्रातर्होमयोः पृथक्प्रणयनमुक्तं यथाधिवृत्तसूर्ये आविःसूर्ये इति तथोदङ्मुखः प्रत्यङ्मुखो वा सायं प्राङ्मुखः प्रातरिति च। इदानीं तु सायमुपक्रम्य प्रातरपवर्गिणो होमद्वयस्यैककर्माभिप्रायेणैकमेव प्रणयनमुच्यते यथोक्तं बौधायनेन अथैतदग्निहोत्रं सायमुपक्रमं प्रातरपवर्गमाचार्या ब्रुवत इति ॥ द्वयोरनयोः

प्रणयनकल्पयोर्विप्रतिषेधाद्विकल्पः। तथा च कात्यायनः तस्मिन्सायंप्रातर्होममेक इति। भारद्वाजस्त्वाह अपि वा सायमुद्धृत एव स्याद्वा प्रातरग्निहोत्रादिति। तथा नक्तं वा धारयेयुरिति॥

नित्यो गतश्रियो ध्रियते। १२।

गतश्रीर्व्याख्यातस्त्रयो वै गतश्रिय इत्युक्तमित्यत्र। तस्याधानादारभ्य नित्यो ध्रियते। आहवनीय इति विभक्तिविपरिणामेन संबन्धः॥ सत्याषाढभारद्वाजौ त्वाहतुः नित्यं गतश्रियो धार्येत आयुष्कामस्य वेति। आश्वलायनमतात्तु गतश्रियः सर्वे ऽपि नित्या यथाह आधानाद्द्वादशरात्रमजस्रा अत्यन्तं तु गतश्रिय इति। बौधायनमतात्त्वगतश्रियो ऽपि पक्षे नित्याः सर्वे यथाह आधानप्रभृत्येवैते ऽजस्राः स्युरिति शालीकिरिति॥

नित्यं गार्हपत्यम्। १३।

गतश्रीरगतश्रीश्च सर्व एव नित्यं गार्हपत्यं धारयन्तीत्यर्थः पुनर्नित्यग्रहणात्॥

तथान्वाहार्यपचनं यदि मथित्वाहितो भवति। १४।

आधानकाले यदि दक्षिणाग्निर्मथित्वाहितः तमपि सर्वे नित्यमेव धारयेयुः। सत्याषाढमतात्त्वाहार्यो ऽपि नित्यः॥

यद्याहार्यो ऽहरहरेनं दक्षिणत आहरन्ति। १५।

यदि तदानीमाहार्यस्तदा योनित आहरन्ति। बहुवचनमविवक्षितम्। अहरहः कालेकाल इत्यर्थः यथाहरहर्यजमानः स्वयमग्निहोत्रं जुहु-

यादिति । दक्षिणत इति दक्षिणाग्न्यायतनानुवादः । दक्षिणस्माद्दे-
शादाहरणनियम इति केचित् ॥

उपवसथ एवैनमाहरेयुर्नवावसान एवैनमाहरेयु-
रिति वाजसनेयकम् । १६ ।

उपवसथे ऽग्न्यन्वाधानकाले । वासार्थं देशान्तरप्राप्तिरवसानं स्थानं
वा इदं श्रेयो ऽवसानमागन्मेति लिङ्गात् । नवमवसानं नवावसानम् ।
पूर्वस्थानात् स्थानान्तरप्राप्तावाहरेयुर्नान्यथेत्यर्थः ॥ सभ्यावसथ्ययो-
स्त्वेवमुत्पादनावचनादाधानसंपादितानामग्नीनां स्वतो ऽनुद्वासितत्व-
लाच्च नित्यधारणमेव युक्तमिति केचित् । तदयुक्तं नित्यधार्याणाम-
नुक्रमणेनेतरेषां धारणव्युदासात् इतरथा त्वनुक्रमणानर्थक्यात् अधा-
र्यायाग्निं प्रणयत्यपवृक्ते कर्मणि लौकिकः संपद्यत इत्यधार्येषु
न्यायव्युत्पादनाच्च । न चैतत्प्रणयनशब्दादाहवनीयैकविषयमिति मन्तव्यं
उत्पत्तिप्रदर्शनार्थत्वात्तस्य अन्यथा दर्शपूर्णमासादिषु दक्षिणाग्नेराहर-
णसिद्धेः शामित्रादीनां धारणप्रसङ्गाच्च । तस्मान्न धार्यौ सभ्यावस-
थ्यावापस्तम्बमतात् । सत्याषाढभारद्वाजाभ्यां तु धार्येष्वेवानुक्रान्तौ
यथा नित्यौ सभ्यावसथ्याविति ॥

इति द्वितीया कण्डिका ।

परिसमूहनेनाग्नीनलंकुर्वन्ति । १ ।

परिसमूहनं परितो मार्जनं तेनाग्नीनलंकुर्वन्ति । स एवालंकार
इत्यर्थः । बहुवचनं पत्न्यध्वर्युयजमानानामन्यतमप्राप्त्यर्थम् । दर्शितं
चैतत्समूहन्त्यग्न्यागारमित्यत्र ॥

पुरस्तादलंकाराः सायमुपरिष्टादलंकाराः प्रातः । २ ।

अग्नय इति शेषः । तत्र यदाप्युपरिष्टाद्धोमादलंकारस्तदाप्युपरितनसमिन्धनादनन्तरमिष्यते पूर्वालंकारे तथादर्शनात् । स चोभयत्र पाणिना कार्यः समिद्धमग्निं पाणिना परिसमूहेन्न समूहन्येति वचनात् ॥

एतद्वा विपरीतम् । उभयतोऽलंकाराः सायं तथा प्रातरित्येके । ३ ।

गतौ ॥

अग्ने गृहपते शुन्धस्वेति गार्हपत्यमग्ने वह्ने शुन्धस्वेति दक्षिणाग्निमग्ने सम्राट् शुन्धस्वेत्याहवनीयमग्ने सभ्य शुन्धस्वेति सभ्यमग्ने परिषद्य शुन्धस्वेत्यावसथ्यम् । ४ ।

अलंकुर्वन्तीति संबन्धः ॥

उदगग्रैः प्रागग्रैश्च दर्भैस्तृणैर्वाग्नीन्परिस्तृणात्यग्निमग्नी वा । ५ ।

व्याख्यातः प्राक् । अग्निमित्याहवनीयो गृह्यते होमार्थत्वात् । परिस्तरणतृणानि दूर्वादयः ॥

खादिरः स्रुवो वैकङ्कत्यग्निहोत्रहवणी बाहुमात्र्यरत्निमात्री वा । ६ ।

अन्य एवाग्निहोत्रस्रुवः पुनर्विधानात् । ययाग्निहोत्रं क्रियते सा स्रुगग्निहोत्रहवणी । तौ च दार्शपौर्णमासिकाभ्यां स्रुक्स्रुवाभ्यां व्याख्यातौ ॥

प्रस्तुताकृतिरार्यकृताग्निहोत्रस्थाल्यूर्ध्वकपालाचक्रवर्ता भवति । ७ ।

प्रस्तुताकृतिरसंकुचितबिला । आर्यकृता आर्यैस्त्रैवर्णिकैः कृता । ऊर्ध्व-कपाला अतिर्यग्वृत्तकपाला । अचक्रवर्ता वर्तनं वर्तः न चक्रे वर्तनं यस्याः सा तथोक्ता न चक्रभ्रमणेन निर्मितेत्यर्थः ॥

दक्षिणेन विहारमग्निहोत्री तिष्ठति तां यजमानोऽभिमन्त्रयत इडासि व्रतभृदहं नावुभयोर्व्रतं चरिष्यामि सुरोहिण्यहं नावुभयोर्व्रतं चरिष्यामीड एहि मयि श्रयस्वेर एह्यदित एहि गौरेहि श्रद्ध एहि सत्येन त्वाह्वयामीति । ८ ।

अग्निहोत्रार्था धेनुरग्निहोत्री ॥

अथ वेदिदेशमभिमृशतीयमसि तस्यास्तेऽग्निर्वत्सः सा मे स्वर्गं च लोकममृतं च धुक्ष्वेति । ९ ।

गतः ॥

पूषासीति दक्षिणतो वत्समुपसृज्य प्राचीमावृत्य दोग्ध्युदीचीं प्राचीमुदीचीं वा । १० ।

दक्षिणतो गोर्वत्समुपसृज्य यथा प्राची भवति तथा पर्यावृत्य दोग्धि ॥

न शूद्रो दुह्यात् । ११ ।

किमर्थमिति चेत् ॥

असतो वा एष संभूतो यच्छूद्रः । १२ ।

असतो तिकृष्टादङ्गात्पादादिति यावत्पद्भ्यां शूद्रो अजायतेति श्रुतेः॥

दुह्याद्वा । १३ ।

नन्विदानीमेवोक्तमसतो वा एष संभूत इति ततः परिहारः। न चात्र सांनाय्यवदुत्पवनेन शुद्धिरस्ति येनानुज्ञायेतापि शूद्रः। तथा च ब्राह्मणं अग्निहोत्रमेव न दुह्याच्छूद्रस्तद्धि नोत्पुनन्तीति। तत्राह

यदेव गार्हपत्येऽधिश्रयति पवयत्येवैनत् । १४ ।

अतोऽनुज्ञायेत शूद्र इति भावः॥

अग्निहोत्रस्थाल्या दोहनेन च दोग्धि। १५।

उभयत्राप्यधिकरणस्य करणत्वविवक्षया तृतीया॥

इति तृतीया कण्डिका।

पूर्वौ दुह्याज्ज्येष्ठस्य ज्यैष्ठिनेयस्य यो वा गतश्रीः स्यात्। अपरौ दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य यो वानुजावरो यो वा बुभूषेत्। १।

व्याख्यातौ दर्शपूर्णमासयोरवदानविधौ। पूर्वापराविति तु स्तननिर्देश इति विशेषः॥

न स्तनान्संमृशति । २।

प्रस्रवणार्थं न स्तनानभिमृशतीत्यर्थः॥

यथोपलम्भं नित्ये कल्पे दोग्धि। ३।

नित्ये दोहनकल्पे यथोपलम्भं योय: स्तनो हस्तप्राप्तस्तं दोग्धि न तु पूर्वापरादिनियम इत्यर्थः ॥

पूर्ववदुपसृष्टां दुह्यमानां धाराघोषं च यजमानोऽन्वमन्त्रयते । ४ ।

पूर्ववत् सांनाय्यवत् ॥

अस्तमिते दोग्धि । ५ ।

अत्र दोहनस्यास्तमयात्परत्वनियमात्तत्पूर्वभाविनः समिन्धनादेः प्रागस्तमयादनुमतिः सूचिता भवति ॥

अनस्तमिते होतव्यम् । ६ ।

अनः सद्यः । अस्तमितमात्रे दोहनादि प्रतिपद्य होमः कार्य इत्यर्थः । एतदेव स्तौति ॥

समुद्रो वा एष यदहोरात्रस्तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यमिति शैलालिब्राह्मणं भवति । ७ ।

संधी नाम सायंप्रातः सूर्यनक्षत्रयोरन्यतरास्तमयादारभ्यान्यतरोदयावधिकालौ । यथा संध्योपासनकालं नियच्छता गौतमेनोक्तं सज्योतिष्या ज्योतिषो दर्शनादिति । तौ समुद्रकल्पस्याहोरात्रस्य गाधे तीर्थे तस्मात्तत्रैव होतव्यम् । यथा गाध एव स्थितो न विपद्यते तथानयोरेव कालयोर्हुतं प्रतिष्ठितं भवति नान्यत्रेति भावः । संधी इति द्विवचनात्प्रातःसंधिरपि स्तुतो भवति ॥

नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायम् । ८ ।

सायं चैते ऽपि त्रयो होमकालाः संधिना सह विकल्पन्ते। नक्षत्रं दृष्ट्वा प्रथमनक्षत्रदर्शने। प्रदोषे प्रथमयामे। निशायां द्वितीययामे॥

उषस्युपोदयं समयाविषित उदिते वा प्रातः। ९।

प्रातरप्येते ससंधिकाश्चत्वारो होमकालाः। उषसि प्राच्यां जातप्रकाशायाम्। उपोदयं उदयात्पूर्वस्मिन्समये पूर्वतः प्रातःसंधिस्त्वित्युक्तं भवति। समयाविषित ईषदाविर्मण्डले सूर्ये। तत्र प्रदोषान्तो होमकालः संगवान्तः प्रातरित्याश्वलायनः॥ अथापदि कालान्तराणामप्यनुग्राहकं ब्राह्मणं दर्शयति॥

यदुदिते जुहोत्यग्निष्टोमं तेनावरुन्द्धे यन्मध्यंदिने जुहोत्युक्थ्यं तेनावरुन्द्धे यदपराह्णे जुहोति षोडशिनं तेनावरुन्द्धे यत्पूर्वरात्रे जुहोति प्रथमं तेन रात्रिपर्यायमाप्नोति यन्मध्यरात्रे जुहोति मध्यमं तेन रात्रिपर्यायमाप्नोति यदपररात्रे जुहोति जघन्यं तेन रात्रिपर्यायमाप्नोति। १०।

उदिते पूर्वाह्ण इत्यर्थः। रात्रिपर्यायैः क्रत्वधिकारादतिरात्रो लक्ष्यते। तदयमर्थः। एतेषु कालेषु जुह्वदेतैर्यज्ञविशेषैरिष्टवान्भवतीति। एवं च सर्वमहः सर्वा रात्रिश्च होमकाल इत्युक्तं भवति। तथा च भारद्वाजः आ सायमाहुतिकालात्प्रातराहुतिकालो नातीयादा प्रातराहुतिकालात्सायमाहुतिकाल इति। न चैवं पूर्वोक्तैः कालैः सहैषां तुल्यविकल्पता भ्रमितव्येत्याह॥

स न मन्येत सर्वेष्वेतेषु कालेषु होतव्यमापदि हुत-मित्येव प्रतीयादिति विज्ञायते। ११।

सो ऽयं प्रतिपत्ता नैवं मन्येत सर्वे ऽमी होमकाला इति। किं त्वापद्यगत्यामेषु कालेषु हुतमपि हुतं भवतीत्येतावदेव प्रतीयादित्यर्थः॥

यो होमकालः सो ऽङ्गानाम्। १२।

सर्वेष्वप्युक्तेषु कालभेदेषु यतमस्मिन्प्रधानं चिकीर्षति ततमस्मिन्नेवाङ्गा-न्यपि कर्तव्यानि न तु कालान्तरे। विहरणं तु वचनात्प्रागुदयास्तम-याभ्यां क्रियते॥

इति चतुर्थी कण्डिका।

इति प्रथमः पटलः॥

पत्नीवदस्याग्निहोत्रं भवति। १।

अग्निहोत्रं पत्नीवत्संनिहितपत्नीकं भवति। उत्तरसूत्रेणैव सिद्धे पत्नी-वद्वचनमादरार्थम्। अस्येति वचनाद्यजमानस्यैव कर्मणि स्वाम्यं न पत्न्या इति ख्यापितं भवति तच्च दर्शितमेव प्राक्॥

स्व आयतने पत्न्युपविशति। २।

उक्तमायतनं पत्न्याः दर्शपूर्णमासयोर्दक्षिणत उदीच्युपविशतीति। पश्चा-द्गार्हपत्यस्य प्राच्युपविशति तस्मात्पश्चात्प्राची पत्न्यन्वास्त इत्यनुवादात्॥

अपरेणाहवनीयं दक्षिणातिक्रम्योपविश्य यजमानो विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि मयि श्रद्धे-त्यप आचामति। ३।

आचामति भक्षयति॥

ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति । सत्यं त्वर्तेन परिषिञ्चामीति प्रातः । आहवनीयमग्रे ऽथ गार्हपत्यमथ दक्षिणाग्निमपि वा गार्हपत्यमाहवनीयं दक्षिणाग्निं यथा वाहिताः । ४ ।

सभ्यावसथ्ययोर्न परिषेचनं त्रयाणामनुक्रमणात् ॥

यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनुसंतनोमीति गार्हपत्यात्प्रक्रम्य संततामुदकधारां स्रावयत्याहवनीयात् । ५ ।

मन्त्रस्यादिसंयोगो धारात्वात् ॥

वृष्टिरसि ब्रह्म यच्छेत्युपवेषमादाय भूतकृत स्थापोढं जन्यं भयमपोढाः सेना अभीत्वरीरिति गार्हपत्यादुदीचो ऽङ्गारान्निरूह्य व्यन्तान्गार्हपत्येन कृत्वा सगरा स्थेत्यभिमन्त्र्य जपत्यग्नय आदित्यं गृह्णाम्यह्ने रात्रिमिति सायम् । आदित्यायाग्निं गृह्णामि रात्र्या अहरिति प्रातः । ६ ।

व्यन्तान् गार्हपत्यस्याग्नेरन्तादिगतान्बहिरायतनाद्गतानित्यर्थः ॥

इडायाः पदं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व । ये ग्राम्याः पशवो विश्वरूपा विरूपास्तेषां सप्तानामिह रन्तिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति तेष्वग्निहोत्रमधिश्रयति । ७ ।

दोहनस्थमपि पयो ऽग्निहोत्रस्थाल्यामानीय तामधिश्रयति ॥

इति पञ्चमी कण्डिका।

रेतो वा अग्निहोत्रम्। न सुशृतं कुर्याद्रेतः कूलयेन्नो ऽशृतमन्तरेवैव स्यात्। १।

सुशृतं चेत्कुर्याद्रेतः कूलयेत् दहेत्। नो अशृतं च भवति। यथान्तरा मध्य इव शृताशृतयोर्भवति तथैव स्यात् ॥

समुदन्तं होतव्यम्। २।

अन्तेषु समुद्गतः फेनो यस्य न मध्ये तत्समुदन्तम्। तावन्मात्रेण शृतं होतव्यमित्यर्थः ॥

उदन्तीकृत्य प्रतिषिच्यम्। ३।

यदोदन्तं भवति तदा प्रतिषिच्यं प्रतिषेक्यम्। उपरिष्टादब्बिन्दुक्षेपः प्रतिषेकः तत्प्रकारश्चानन्तरमेव वक्ष्यते ॥

अप्रतिषेक्यं स्यात्तेजस्कामस्य ब्रह्मवर्चसकामस्य पाप्मानं तुस्तूर्षमाणस्याथो सर्वेभ्यः कामेभ्यो ऽथो यः कामयेत वीरो म आजायेतेति। ४।

पाप्मानं तुस्तूर्षमाणस्येत्युकारो बाहुलकं तिस्तीर्षमाणस्येत्यर्थः। पाप्मानं जिघांसत इति यावत्। वीरः पुत्रः। यस्यैवं कामानुसारादनित्यं होमं वक्ष्यति। पयसि तु नित्यः प्रतिषेकः ॥

अप्सरधिश्रितं वा। ५।

उदन्तीकृत्य प्रतिषेक्यमधिश्रितमात्रं वेत्यर्थः ॥

अदब्धेन त्वा चक्षुषावेक्ष इति तृणेन ज्वलतावेक्षते ।६।

तृणेनोपगृहीतेन हविरभिद्योतयन्नवेक्षते । अभिद्योतयति अभ्येवैनद्धारयतीति श्रुतेः । तृणाग्नेः प्रतिसर्गावचनादुत्सर्गः ॥

दोहनसंक्षालनं स्रुव आनीय हरस्ते मा विनैषमिति तेन प्रतिषिञ्चत्यपां वा स्तोकेन ।७।

दोहनं क्षाल्यते येन तदुदकं केवलं वोदकलेशं स्रुवेणाक्षिपति ॥

उद्भव स्थोदहं प्रजया प्र पशुभिर्भूयासं हरस्ते मा विगादुद्यन्सुवर्गो लोकस्त्रिषु लोकेषु रोचयेति पुनरेवावेक्ष्यान्तरितं रक्षो ऽन्तरिता अरातयो ऽपहता व्यृद्धिरपहतं पापं कर्मापहतं पापस्य पापकृतः पापं कर्म यो नः पापं कर्म चिकीर्षति प्रत्यगेनमृच्छेति त्रिः पर्यग्नि कृत्वा घर्मो ऽसि रायस्पोषवनिरिहोर्जं दृंहेति वर्त्म कुर्वन्प्रागुद्वासयत्युदक् प्रागुदग्वा ।८।

पुनरेवेति पूर्ववत्तृणेन ज्वलतेत्यर्थः । वर्त्म कुर्वन् कर्षन् ॥

न वर्त्म करोतीत्येके ।९।

उद्धृत्योद्वासयत इत्यर्थः ॥

इह प्रजां पशून्दृंहेति त्रिर्भूमौ प्रतिष्ठाप्य सुभूतकृत

स्थ प्रत्यूढं जन्यं भयं प्रत्यूढाः सेना अभीत्वरीरिति गार्हपत्ये ऽङ्गारान्प्रत्यूह्य । १० ।

इति षष्ठी कण्डिका ।

देवस्य त्वा सवितुः प्रसव इति स्रुक्स्रुवमादाय प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इत्याहवनीये गार्हपत्ये वा प्रतितप्यारिष्टो यजमानः पत्नी चेति संमृश्य हिरण्ययष्टिरस्यमृतपलाशा स्रोता यज्ञानामित्यग्निहोत्रहवणीमभिमन्त्र्योमुन्नेष्यामि हव्यं देवेभ्यः पाप्मनो यजमानमिति सायमाह । ओमुन्नयामीति प्रातः । १ ।

अवरोप्याग्निहोत्रं यत्रोन्नयनमिच्छन्ति तत्र त्रिः प्रतिष्ठापयति । स्रुक्स्रुवयोरादानमन्त्रस्यावृत्तिः एकलिङ्गत्वात् । प्रतितपनसंमर्शने तु तन्त्रेण विभवत्वात् ॥

हविर्देवानामसि मृत्योर्मे ऽभयं स्वस्ति मे ऽस्त्वभयं मे अस्त्वित्युपांश्वुक्त्वोमुन्नयेत्युच्चैरनुजानाति । अपचारे यजमानस्य स्वयमात्मानमनुजानीयात् । २ ।

अपचारो ऽसंनिधिः । अनेनैव न्यायेन स्वयंहोमे ऽप्यात्मानुज्ञा यजमानस्य व्याख्याता भवति ॥

उन्नीयमान उभौ वाचं यच्छत आ होमात् । ३ ।

गतः ॥

न चाभिमीलते तिष्ठति च यजमानः । ४ ।

नाभिमीलते न मीलयेच्चक्षुषा होमात्तिष्ठति च। स्वयंहोमे ऽपि तिष्ठन्नेवोन्नयति। आसीन इत्यपरं विबाधमान आर्त्विज्यं बलीय इति न्यायात् ॥

उन्नीत उपविशति । ५ ।

गतः ॥

चतुरुन्नयति । ६ ।

चतुरवत्तिन इति शेषः पञ्चमं जमदग्नीनामित्युत्तरत्रवचनात् ॥

यं कामयेत पुत्राणामयमृध्नुयादिति तं प्रति पूर्णामुन्नयेत् । ७ ।

यजमानपुत्राणां मध्ये यतममध्वर्युः कामयेतायमृद्धिशीलः स्यादिति तं प्रति पूर्णमुन्नयेत्स कथितो भवति। तत्समानस्थानं स्रुवमितरेभ्यः पूर्णमुन्नयेदित्यर्थः ॥

यदि कामयेत ज्येष्ठतो ऽस्य प्रजार्धुका स्यादिति पूर्णां प्रथममुन्नयेत्तत ऊनतरमूनतरम्। कनिष्ठत इत्येतद्विपरीतम्। सर्वे समावद्वीर्या इति समम् । ८ ।

अथ यदि ज्येष्ठोज्येष्ठ ऋद्धः स्यादिति कामयेत तदा प्रथमादारभ्य क्रमात्स्रुवान्ह्रासयेत्। यदि पुनः कनिष्ठःकनिष्ठ इति तदा प्रथमादारभ्य क्रमाद्वर्धयित्वात्यन्तं पूर्णमुन्नयेत्। अथ यदि सर्वे समवीर्या इति

तदा सर्वान्समानुन्नयेत्॥ सर्वे चैते ऽध्वर्योर्यजमानाभिप्रायं विदुषः कामाः तत्काम्यत्वात्कामानां यथोक्तं *याजमाने कामानां कामन-मिति ॥

यथोपलम्भं नित्ये कल्प उन्नयति । ९ ।

कामाभावे यथासंभवमुन्नयति ॥

इति सप्तमी कण्डिका ।

अग्नये च त्वा पृथिव्यै चोन्नयामीति प्रथमं वायवे च त्वान्तरिक्षाय चेति द्वितीयं सूर्याय च त्वा दिवे चेति तृतीयं चन्द्रमसे च त्वा नक्षत्रेभ्यश्चेति चतुर्थम् । १ ।

उन्नयतीत्यन्वयः । उत्तरतः स्थाल्याः स्रुवमासाद्येत्याश्वलायनः ॥

अद्भ्यस्त्वौषधीभ्यश्चेति पञ्चमं जमदग्नीनाम् । २ ।

गतः ॥

भूरिडा भुव इडा सुवरिडा करदिडा पृथगिडेति वा प्रतिमन्त्रम् । ३ ।

अत्रापि जमदग्नीनां पञ्चमो मन्त्रः ॥

पशून्मे यच्छेत्यपरेण गार्हपत्यमुन्नयनदेशे ऽभितरां वा सादयित्वा गार्हपत्ये हस्तं प्रताप्य संमृशति सजूर्देवैः सायंयावभिः सायंयावानो देवाः स्वस्ति संपारयन्तु

पशुभिः संपृचीय प्रजां हूंहेति सायम्। सजूर्देवैः प्रातर्यावभिः प्रातर्यावाणो देवाः स्वस्ति संपारयन्तु पशुभिः संपृचीय प्रजां हूंहेति प्रातः। ४।

अभितरामिति संनिकर्षे गार्हपत्यस्येत्यर्थः। संमृशति स्रुग्गतम्। स्थालीगतं चेति कल्पान्तरकाराः॥

तूष्णीं वा चाभिमृश्य पालाशीं समिधं प्रादेशमात्रीमुपरि धारयन्गार्हपत्यस्य समयार्चिर्हरति।५।

समयार्चिः अर्चिषः समीपेन। तथा समिधं स्रुचं चाध्यधि गार्हपत्यं हृत्वेत्याश्वलायनः॥

उर्वन्तरिक्षं वीहीत्युद्द्रवति। ६।

उद्द्रवति गच्छति॥

उद्द्रवन्दशहोतारं व्याचष्टे। ७।

व्याचष्टे जपति॥

समं प्राणैर्हरति। ८।

समं नासिकया हरतीत्यर्थः॥

स्वाहाग्नये वैश्वानरायेति मध्यदेशे नियच्छति। ९।

विहारस्य मध्यदेशे निगृह्णाति॥

वाताय त्वेत्युन्मृह्णाति। १०।

पुनः प्राणसममुन्मृह्णाति॥

उपप्रेत संयतध्वं मान्तर्गात भागिनं भागधेयात्सप्त-र्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्युप प्रत्नमुप भूर्भुवः सुवरायुर्मे यच्छेत्यपरेणाहवनीयं दर्भेषु सादयति। ११।

पूर्वंचापरच च कूर्चे सादयतीति बौधायनः॥

इत्यष्टमी कण्डिका।

इति द्वितीयः पटलः॥

अत्र ब्राह्मणे रौद्रं गवि वायव्यमुपसृष्टमित्यादिनाग्निहोत्रद्रव्यस्योत्पत्तिप्रभृत्या होमादवस्थाविशेषाणामनेकदेवतासंबन्धप्रदर्शनेनाग्निहोत्रस्तुतिमुक्त्वा यदग्निमुद्धरति वसवस्तर्ह्यग्निरित्यादिनाहवनीये ऽपि तथा कृतम्। तदिदानीं सूत्रकारो दर्शयति॥

यस्याग्नावुद्ध्रियमाणे हूयते वसुषु हुतं भवति। निहितो धूपायञ्छेते रुद्रेषु। प्रथममिध्ममर्चिरालभत आदित्येषु। सर्व एव सर्वश इध्म आदीप्तो भवति विश्वेषु देवेषु। नितरामर्चिरुपावैति लोहिनीकेव भवतीन्द्रे हुतं भवति। अङ्गाराः भवन्ति तेभ्यो ऽङ्गारेभ्यो ऽर्चिरुदेति प्रजापतावेव। शरो ऽङ्गारा अध्यूहन्ते ततो नीलोपकाशो ऽर्चिरुदेति ब्रह्मणि हुतं भवति। १।

यस्याग्नावुद्ध्रियमाणे हूयत इति यद्धोमार्थमुद्ध्रियते वसुषु हुतं भवतीत्युद्धरणावस्थास्तुतिः अन्यथोद्ध्रियमाणे होमासंभवात् । यैस्त्वा-हवनीयायतनस्योपरि ध्रियमाण इति व्याख्यातं तैर्भूर्भुवः सुवरुद्ध्रियमाण इत्युद्ध्रियमाणमभिमन्त्रयते यस्याग्निरुद्धृत इत्याद्यपि तथा व्याख्यात-व्यम् । इत्यास्तां तावत् ॥ अथोत्तरे ऽवस्थाविशेषाः । सो ऽयमुद्धृतो ऽग्निरायतने निहितः सधूमः शेते । ततः प्रथमं काष्ठमर्चिर्गृह्णाति । ततः सर्व एवेध्मः सर्वप्रदेशेष्वादीप्तो भवति । ततो ऽर्चिरुपरिमन्दवे-गान्नीचैर्गच्छति लोहितेव च भवति । ततः काष्ठेभ्यो ऽङ्गारीभूतेभ्यो ऽर्चिरुत्तिष्ठति । ततो ऽङ्गाराः शरो ऽभ्यूहन्ते शरसा भस्मना सूक्ष्मेण संयोगमापद्यन्ते । ततश्च तेभ्यो नीलप्रकाशो ऽर्चिश्चोदेतीति ॥ तत्र रुद्रेष्वादित्येष्वित्यादीनामपि हुतं भवतीत्यनुषङ्गः । तदुक्तं भवति यदेवमनेकविधावस्थाश्रयभूते ऽग्नौ हूयते तत्सर्वास्वेव देवतासु हुतं भवतीति । स्पष्टश्चायमर्थो ब्राह्मणे यथा वसुषु रुद्रेष्वादित्येष्वित्यादि ॥ अथ होमार्थमवस्थाविधिं दर्शयति ॥

यदङ्गारेषु व्यवशान्तेषु लेलायदीव भाति तद्देवाना-मास्यं तस्मात्तथा होतव्यं यथास्ये ऽपिदधात्येवं तदिति विज्ञायते । २ ।

अवस्थेयं दर्शपूर्णमासयोरेव व्याख्याता तत्रापि नित्या च । तथादरश्च दर्शितो ऽस्या देवतास्यत्ववचनात् ॥

विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमीति होष्य-न्नप उपस्पृश्य पालाशीं समिधमादधात्येकां द्वे तिस्रो वा । ३ ।

होष्यन्नित्यनेन होष्यन्नुपस्पृशेदिति ब्राह्मणं व्याचष्टे सो ऽयं तत्र कालो विवक्षित इति। पुनःपालाशवचनात्सर्वाः पालाश्यः। तथा सर्वासामपि स्रुचा धारणमुक्तं हिरण्यकेशिना यथैकां द्वे तिस्रो वोपरिष्टात्स्रुग्दण्ड उपसंगृह्णोति ॥

एषा ते अग्ने समिदिति। हिरण्मयं त्वा वंशं स्वर्गस्य लोकस्य संक्रमणं दधामीति द्वितीयाम्। रजतां त्वा हरितगर्भामग्निज्योतिषमक्षितिं कामदुघां स्वर्ग्यां स्वर्गाय लोकाय रात्रिमिष्टकामुपदधे तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति सायं तृतीयाम्। हरिणीं त्वा रजतगर्भां सूर्यज्योतिषमक्षितिं कामदुघां स्वर्ग्यां स्वर्गाय लोकाय हरिष्टकामुपदध इति प्रातः। ४।

गतः ॥

इति नवमी कण्डिका।

समिधमाधाय प्राण्यापान्य निमील्य वीक्ष्य हुत्वा ध्यायेद्यत्कामः स्यात्। १।

प्राणनमुच्छ्वासो ऽपाननं निश्वासः। यत्कामः स्याद्यजमानस्तदध्वर्युर्ध्यायेद्यथा पुत्रो ऽस्यास्त्वित्यादि ॥

हुत्वा महदभिवीक्षते। २।

हुत्वा तदेव हुतं महद्भूयिष्ठमभिवीक्षेत इत्यर्थः। अथवा पूर्वाहुत्यर्थं प्रमादान्महद्धुत्वा तदेवाभिवीक्षेत प्रायश्चित्तार्थमित्यर्थः ॥

आदीप्तायां जुहोति श्यावायां वा यदा वा समतीतार्चिर्लेलायतीव। धूपायत्यां ग्रामकामस्य ज्वलत्यां ब्रह्मवर्चसकामस्याङ्गारेषु तेजस्कामस्य। ३।

समिधस्त्वाद्यास्तिस्रो ऽवस्था नित्याः शेषाः काम्याः। तत्र श्यावा श्यामीभूता। व्याख्यातः शेषः ॥

द्व्यङ्गुले मूलात्समिधमभि जुहोति। ४।

समिधमभि समिधि ॥

अभिक्रामं सायं जुहोत्यवक्रामं प्रातः। ५।

अग्निं प्रति क्रान्त्वा सायमग्नेः प्रतीपं क्रान्त्वा प्रातः ॥

उभयत्र वाभिक्रामम्। ६।

गतः ॥

भूर्भुवः सुवरिति होष्यन्जपति। ७।

होष्यन्निति पुनर्वचनमवश्यकर्तव्यैरप्यव्यवायार्थम् ॥

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायमग्निहोत्रं जुहोति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः। ८।

गतः ॥

प्रस्रुताङ्गतिरार्यंकृताग्निहोत्रस्थाल्यूर्ध्वकपालाचक्रवर्ता भवति । ७ ।

प्रस्रुताङ्गतिरसंकुचितबिला । आर्यकृता आर्यैस्त्रैवर्णिकैः कृता । ऊर्ध्वकपाला अतिर्यग्वृत्तकपाला । अचक्रवर्ता वर्तनं वर्तः न चक्रे वर्तनं यस्याः सा तथोक्ता न चक्रभ्रमणेन निर्मितेत्यर्थः ॥

दक्षिणेन विहारमग्निहोत्री तिष्ठति तां यजमानोऽभिमन्त्रयत इडासि व्रतभृदहं नावुभयोर्व्रतं चरिष्यामि सुरोहिण्यहं नावुभयोर्व्रतं चरिष्यामीड एहि मयि श्रयस्वेर एह्यदित एहि गौरेहि अघ्न एहि सत्येन त्वाह्वयामीति । ८ ।

अग्निहोत्रार्था धेनुरग्निहोत्री ॥

अथ वेदिदेशमभिमृशतीयमसि तस्यास्तेऽग्निर्वत्सः सा मे स्वर्गं च लोकममृतं च धुक्ष्वेति । ९ ।

गतः ॥

पूषासीति दक्षिणतो वत्समुपसृज्य प्राचीमावृत्य दोग्ध्युदीचीं प्राचीमुदीचीं वा । १० ।

दक्षिणतो गोर्वत्समुपसृज्य यथा प्राची भवति तथा पर्यावृत्य दोग्धि ॥

न शूद्रो दुह्यात् । ११ ।

किमर्थमिति चेत् ॥

असतो वा एष संभूतो यच्छूद्रः। १२।

असतो निकृष्टादङ्गात्पादादिति यावत्पद्भ्यां शूद्रो अजायतेति श्रुतेः॥

दुह्याद्वा। १३।

नन्विदानीमेवोक्तमसतो वा एष संभूत इति ततः परिहारः। न चात्र सांनाय्यवदुत्पवनेन शुद्धिरस्ति येनानुज्ञायेतापि शूद्रः। तथा च ब्राह्मणं अग्निहोत्रमेव न दुह्याच्छूद्रस्तद्धि नोत्पुनन्तीति। तत्राह

यदेव गार्हपत्येऽधिश्रयति पवयत्येवैनत्। १४।

अतोऽनुज्ञायेत शूद्र इति भावः॥

अग्निहोत्रस्थाल्या दोहनेन च दोग्धि। १५।

उभयत्राप्यधिकरणस्य करणत्वविवक्षया तृतीया॥

इति तृतीया कण्डिका।

पूर्वौ दुह्याज्ज्येष्ठस्य ज्यैष्ठिनेयस्य यो वा गतश्रीः स्यात्। अपरौ दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य यो वानुजावरो यो वा बुभूषेत्। १।

व्याख्यातौ दर्शपूर्णमासयोरवदानविधौ। पूर्वापराविति तु स्तननिर्देश इति विशेषः॥

न स्तनान्संमृशति। २।

प्रस्नवणार्थं न स्तनानभिमृशतीत्यर्थः॥

यथोपलम्भं नित्ये कल्पे दोग्धि। ३।

नित्ये दोहनकल्पे यथोपलब्धं योयः स्तनो हस्तप्राप्तस्तं दोग्धि न तु पूर्वापरादिनियम इत्यर्थः ॥

पूर्ववदुपसृष्टां दुह्यमानां धाराघोषं च यजमानो ऽनुमन्त्रयते। ४।

पूर्ववत् सांनाय्यवत् ॥

अस्तमिते दोग्धि। ५।

अत्र दोहनस्यास्तमयात्परत्वनियमात्तत्पूर्वभाविनः समिन्धनादेः प्रागस्तमयादनुमतिः सूचिता भवति ॥

अग्नरस्तमिते होतव्यम्। ६।

अग्नः सद्यः। अस्तमितमात्रे दोहनादि प्रतिपद्य होमः कार्य इत्यर्थः। एतदेव स्तौति ॥

समुद्रो वा एष यदहोरात्रस्तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यमिति शैलालिब्राह्मणं भवति। ७।

संधी नाम सायंप्रातः सूर्यनक्षत्रयोरन्यतरास्तमयादारभ्यान्यतरोदयावधिकालौ। यथा संध्योपासनकालं नियच्छता गौतमेनोक्तं सज्योतिष्या ज्योतिषो दर्शनादिति। तौ समुद्रकल्पस्याहोरात्रस्य गाधे तीर्थे तस्मात्तत्रैव होतव्यम्। यथा गाध एव स्थितो न विपद्यते तथानयोरेव कालयोर्हुतं प्रतिष्ठितं भवति नान्यत्रेति भावः। संधी इति द्विवचनात्प्रातःसंधिरपि स्तुतो भवति ॥

नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायम्। ८।

सायं चैते ऽपि त्रयो होमकालाः संधिना सह विकल्पन्ते। नक्षत्रं दृष्ट्वा प्रथमनक्षत्रदर्शने। प्रदोषे प्रथमयामे। निशायां द्वितीययामे॥

उषस्युपोदयं समयाविषित उदिते वा प्रातः। ९।

प्रातरप्येते ससंधिकाश्चत्वारो होमकालाः। उषसि प्राच्यां जातप्रकाशायाम्। उपोदयं उदयात्पूर्वस्मिन्समये पूर्वतः प्रातःसंधिस्तत्रेत्युक्तं भवति। समयाविषित ईषदाविर्मण्डले सूर्ये। तत्र प्रदोषान्तो होमकालः संगवान्तः प्रातरित्याश्वलायनः॥ अथापदि कालान्तराणामप्यनुग्राहकं ब्राह्मणं दर्शयति॥

यदुदिते जुहोत्यग्निष्टोमं तेनावरुन्द्धे यन्मध्यंदिने जुहोत्युक्थ्यं तेनावरुन्द्धे यदपराह्णे जुहोति षोडशिनं तेनावरुन्द्धे यत्पूर्वरात्रे जुहोति प्रथमं तेन रात्रिपर्यायमाप्नोति यन्मध्यरात्रे जुहोति मध्यमं तेन रात्रिपर्यायमाप्नोति यदपररात्रे जुहोति जघन्यं तेन रात्रिपर्यायमाप्नोति। १०।

उदिते पूर्वाह्ण इत्यर्थः। रात्रिपर्यायैः क्रत्वधिकारादतिरात्रो लक्ष्यते। तदयमर्थः। एतेषु कालेषु जुह्वदेतैर्यज्ञविशेषैरिष्टवान्भवतीति। एवं च सर्वमहः सर्वा रात्रिश्च होमकाल इत्युक्तं भवति। तथा च भारद्वाजः आ सायमाहुतिकालात्प्रातराहुतिकालो नातीयादा प्रातराहुतिकालात्सायमाहुतिकाल इति। न चैवं पूर्वोक्तैः कालैः सहैषां तुल्यविकल्पता भ्रमितव्येत्याह॥

स न मन्येत सर्वेष्वेतेषु कालेषु होतव्यमापदि हुतमित्येव प्रतीयादिति विज्ञायते। ११।

सोऽयं प्रतिपत्ता नैवं मन्येत सर्वेऽमी होमकाला इति। किं त्वापद्यगत्यामेषु कालेषु हुतमपि हुतं भवतीत्येतावदेव प्रतीयादित्यर्थः॥

यो होमकालः सोऽङ्गानाम्। १२।

सर्वेष्वयुक्तेषु कालभेदेषु यतमस्मिन्प्रधानं चिकीर्षति ततमस्मिन्नेवाङ्गान्यपि कर्तव्यानि न तु कालान्तरे। विहरणं तु वचनात्प्रागुदयास्तमयाभ्यां क्रियते॥

इति चतुर्थी कण्डिका।

इति प्रथमः पटलः॥

पत्नीवदस्याग्निहोत्रं भवति। १।

अग्निहोत्रं पत्नीवत्संनिहितपत्नीकं भवति। उत्तरसूत्रेणैव सिद्धे पत्नीवद्वचनमादरार्थम्। अस्येति वचनाद्यजमानस्यैव कर्मणि स्वाम्यं पत्न्या इति ख्यापितं भवति तच्च दर्शितमेव प्राक्॥

स्व आयतने पत्न्युपविशति। २।

उक्तमायतनं पत्न्याः दर्शपूर्णमासयोर्दक्षिणत उदीच्युपविशतीति। पश्चाद्गार्हपत्यस्य प्राच्युपविशति तस्मात्पश्चात्प्राची पत्न्यन्वास्त इत्यनुवादात्।

अपरेणाहवनीयं दक्षिणातिक्रम्योपविश्य यजमाने विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि मयि श्रद्धेत्यप आचामति। ३।

आचामति भक्षयति॥

ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति । सत्यं त्वर्तेन परिषिञ्चामीति प्रातः । आहवनीयमग्रेऽथ गार्हपत्यमथ दक्षिणाग्निमपि वा गार्हपत्यमाहवनीयं दक्षिणाग्निं यथा वाहिताः । ४ ।

सभ्यावसथ्ययोर्न परिषेचनं त्रयाणामनुक्रमणात् ॥

यज्ञस्य संततिरसि यज्ञस्य त्वा संततिमनुसंतनोमीति गार्हपत्यात्प्रक्रम्य संततामुदकधारां स्रावयत्याहवनीयात् । ५ ।

मन्त्रस्यादिसंयोगो धारात्वात् ॥

धृष्टिरसि ब्रह्म यच्छेत्युपवेषमादाय भूतकृत स्थापोढं जन्यं भयमपोढाः सेना अभीत्वरीरिति गार्हपत्यादुदीचोऽङ्गारान्निरूह्य व्यन्तान्गार्हपत्येन कृत्वा सगरा स्थेत्यभिमन्त्र्य जपत्यग्नय आदित्यं गृह्णाम्यह्ने रात्रिमिति सायम् । आदित्यायाग्निं गृह्णामि रात्र्या अहरिति प्रातः । ६ ।

व्यन्तान् गार्हपत्यस्याग्नेरन्ताद्विगतान्बहिरायतनाद्गतानित्यर्थः ॥

इडायाः पदं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व । ये ग्राम्याः पशवो विश्वरूपा विरूपास्तेषां सप्तानामिह रन्तिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति तेष्वग्निहोत्रमधिश्रयति । ७ ।

[illegible] पयो ऽग्निहोत्रस्थाल्यामानीय तामधिश्रयति ॥

इति पञ्चमी कण्डिका।

रेतो वा अग्निहोत्रम्। न सुशृतं कुर्याद्रेतः कूलयेन्नो ऽशृतमन्तरेवैव स्यात्। १।

सुशृतं चेत्कुर्याद्रेतः कूलयेत् दहेत्। नो अशृतं च भवति। यथान्तरा मध्य इव शृताशृतयोर्भवति तथैव स्यात् ॥

समुदन्तं होतव्यम्। २।

अन्तेषु समुद्गतः फेनो यस्य न मध्ये तत्समुदन्तम्। तावन्मात्रेण शृतं होतव्यमित्यर्थः ॥

उद्[illegible] प्रतिषिच्यम्। ३।

यदोदन्तं भवति तदा प्रतिषिच्यं प्रतिषेक्यम्। उपरिष्टादब्बिन्दुक्षेपः प्रतिषेकः तत्प्रकारश्चानन्तरमेव वक्ष्यते ॥

अप्रतिषेक्यं स्यात्तेजस्कामस्य ब्रह्मवर्चसकामस्य पाप्मानं तुस्तूर्षमाणस्याथो सर्वेभ्यः कामेभ्यो ऽथो यः कामयेत वीरो म आजायेतेति। ४।

पाप्मानं तुस्तूर्षमाणस्येत्युकारो बाहुलकं तिस्तीर्षमाणस्येत्यर्थः। पाप्मानं जिघांसत इति यावत्। वीरः पुत्रः। यस्यैवं कामानुसारादनित्यं होमं वक्ष्यति। पयसि तु नित्यः प्रतिषेकः ॥

अग्नेरधिश्रितं वा। ५।

उदन्तीकृत्य प्रतिषेक्यमधिश्रितमात्रं वेत्यर्थः ॥

अदब्धेन त्वा चक्षुषावेक्ष इति तृणेन ज्वलतावेक्षते ।६।

तृणेनोपगृहीतेन हविरभिद्योतयन्नवेक्षते । अभिद्योतयति अभ्येवैनद्धारयतीति श्रुतेः । तृणाग्नेः प्रतिसर्गावचनादुत्सर्गः ॥

दोहनसंक्षालनं स्रुव आनीय हरस्ते मा विनैषमिति तेन प्रतिषिञ्चत्यपां वा स्तोकेन ।७।

दोहनं क्षाल्यते येन तदुदकं केवलं वोदकलेशं स्रुवेणाक्षिपति ॥

उद्भव स्थोदहं प्रजया प्र पशुभिर्भूयासं हरस्ते मा विगादुद्यन्सुवर्गो लोकस्त्रिषु लोकेषु रोचयेति पुनरेवावेक्ष्यान्तरितं रक्षो ऽन्तरिता अरातयो ऽपहता व्यृद्धिरपहतं पापं कर्मापहतं पापस्य पापकृतः पापं कर्म यो नः पापं कर्म चिकीर्षति प्रत्यगेनमृच्छेति त्रिः पर्यग्नि कृत्वा घर्मो ऽसि रायस्पोषवनिरिहोर्जं दृंहेति वर्त्म कुर्वन्प्रागुद्वासयत्युदक् प्रागुदग्वा ।८।

पुनरेवेति पूर्ववत्तृणेन ज्वलतेत्यर्थः । वर्त्म कुर्वन् कर्षन् ॥

न वर्त्म करोतीत्येके ।९।

उद्गृह्योद्वासयत इत्यर्थः ॥

इह प्रजां पशून्दृंहेति त्रिर्भूमौ प्रतिष्ठाप्य सुभूतकृत

स्थ प्रत्यूढं जन्यं भयं प्रत्यूढाः सेना अभीत्वरीरिति गार्हपत्ये ऽङ्गारान्प्रत्यूह्य । १० ।

इति षष्ठी कण्डिका ।

देवस्य त्वा सवितुः प्रसव इति स्रुक्स्रुवमादाय प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इत्याहवनीये गार्हपत्ये वा प्रतितप्यारिष्टो यजमानः पत्नी चेति संमृश्य हिरण्ययष्टिरस्यमृतपलाशा स्रोता यज्ञानामित्यग्निहोत्रहवणीमभिमन्त्र्योमुन्नेष्यामि हव्यं देवेभ्यः पाप्मनो यजमानमिति सायमाह । ओमुन्नयामीति प्रातः । १ ।

अवरोप्याग्निहोत्रं यत्रोन्नयनमिच्छन्ति तत्र त्रिः प्रतिष्ठापयति। स्रुक्स्रुवयोरादानमन्त्रस्यावृत्तिः एकलिङ्गत्वात्। प्रतितपनसंमर्शने तु तन्त्रेण विभवत्वात् ॥

हविर्देवानामसि मृत्योर्मे ऽभयं स्वस्ति मे ऽस्त्वभयं मे अस्त्वित्युपांश्वोमुन्नयेत्युच्चैरनुजानाति । अपचारे यजमानस्य स्वयमात्मानमनुजानीयात् । २ ।

अपचारो ऽसंनिधिः। अनेनैव न्यायेन स्वयंहोमे ऽप्यात्मानुज्ञा यजमानस्य व्याख्याता भवति ॥

उन्नीयमान उभौ वाचं यच्छत आ होमात् । ३ ।

गतः ॥

न चाभिमीलते तिष्ठति च यजमानः। ४।

नाभिमीलते न मीलयेच्चक्षुषा होमात्तिष्ठति च। स्वयंहोमे ऽपि तिष्ठन्नेवोन्नयति। आसीन इत्यपरं विबाधमान आर्त्विज्यं बलीय इति न्यायात्॥

उन्नीत उपविशति। ५।

गतः॥

चतुरुन्नयति। ६।

चतुरवत्तिन इति शेषः पञ्चमं जमदग्नीनामित्युत्तरत्रवचनात्॥

यं कामयेत पुत्राणामयमृध्नुयादिति तं प्रति पूर्णामुन्नयेत्। ७।

यजमानपुत्राणां मध्ये यतममध्वर्युः कामयेतायमृद्धिशीलः स्यादिति तं प्रति पूर्णमुन्नयेत्स कथितो भवति। तत्समानस्थानं स्रुवमितरेभ्यः पूर्णमुन्नयेदित्यर्थः॥

यदि कामयेत ज्येष्ठतो ऽस्य प्रजार्धुका स्यादिति पूर्णं प्रथममुन्नयेत्तत ऊनतरमूनतरम्। कनिष्ठत इत्येतद्विपरीतम्। सर्वे समावद्वीर्या इति समम्। ८।

अथ यदि ज्येष्ठोज्येष्ठ ऋद्धः स्यादिति कामयेत तदा प्रथमादारभ्य क्रमात्स्रुवान्ह्रासयेत्। यदि पुनः कनिष्ठःकनिष्ठ इति तदा प्रथमादारभ्य क्रमाद्वर्धयित्वात्यन्तं पूर्णमुन्नयेत्। अथ यदि सर्वे समवीर्या इति

तदा सर्वान्समानुन्नयेत्॥ सर्वे चैते ऽध्वर्योर्यजमानाभिप्रायं विदुषः कामाः तत्काम्यत्वात्कामानां यथोक्तं "याजमाने कामानां कामवमिति ॥

यथोपलम्भं नित्ये कल्प उन्नयति । ६ ।

कामाभावे यथासंभवमुन्नयति ॥

इति सप्तमी कण्डिका ।

अग्नये च त्वा पृथिव्यै चोन्नयामीति प्रथमं वायवे च त्वान्तरिक्षाय चेति द्वितीयं सूर्याय च त्वा दिवे चेति तृतीयं चन्द्रमसे च त्वा नक्षत्रेभ्यश्चेति चतुर्थम् । १ ।

उन्नयतीत्यन्वयः । उत्तरतः स्थाल्याः स्रुवमासाद्येत्याश्वलायनः ॥

अद्भ्यश्च त्वौषधीभ्यश्चेति पञ्चमं जमदग्नीनाम् । २ ।

गतः ॥

भूरिडा भुव इडा सुवरिडा करदिडा पृथगिडेति वा प्रतिमन्त्रम् । ३ ।

अत्रापि जमदग्नीनां पञ्चमो मन्त्रः ॥

पशून्मे यच्छेत्यपरेण गार्हपत्यमुन्नयनदेशे ऽभितरां वा सन्निधाय गार्हपत्ये हस्तं प्रताप्य संमृशति सजूर्देवैः सायंयावभिः सायंयावानो देवाः स्वस्ति संपारयन्तु

पशुभिः संपृचीय प्रजां ह्वेति सायम्। सजूर्देवैः प्रातर्यावभिः प्रातर्यावाणो देवाः स्वस्ति संपारयन्तु पशुभिः संपृचीय प्रजां ह्वेति प्रातः। ४।

अभितरामिति संनिकर्षे गार्हपत्यस्येत्यर्थः। संमृशति स्रुग्गतम्। स्थालीगतं चेति कल्पान्तरकाराः॥

[illegible] चाभिमृश्य पालाशीं समिधं प्रादेशमात्रीमुपरि धारयन्गार्हपत्यस्य समयार्चिर्हरति। ५।

समयार्चिः अर्चिषः समीपेन। तथा समिधं स्रुचं चाध्यधि गार्हपत्यं हृत्वेत्याश्वलायनः॥

उर्वन्तरिक्षं वीहीत्युद्द्रवति। ६।

उद्द्रवति गच्छति॥

उद्द्रवन्दश[illegible] व्याचष्टे। ७।

व्याचष्टे जपति॥

समं प्राणैर्हरति। ८।

समं नासिकया हरतीत्यर्थः॥

स्वाहाग्नये वैश्वानरायेति मध्यदेशे नियच्छति। ९।

विहारस्य मध्यदेशे निगृह्णाति॥

वाताय त्वेत्युद्गृह्णाति। १०।

पुनः प्राणसममुद्गृह्णाति॥

उपप्रेत संयतध्वं मान्तर्गात भागिनं भागधेयात्सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्युप प्रत्नमुप भूर्भुवः सुवरायुर्मे यच्छेत्यपरेणाहवनीयं दर्भेषु सादयति। ११।

पूर्वंचापरच्च च कूर्चे सादयतीति बौधायनः॥

इत्यष्टमी कण्डिका।

इति द्वितीयः पटलः॥

अत्र ब्राह्मणे रौद्रं गवि वायव्यमुपसृष्टमित्यादिनाग्निहोत्रद्रव्यस्योत्पत्तिप्रभृत्या होमादवस्थाविशेषाणामनेकदेवतासंबन्धप्रदर्शनेनाग्निहोत्रस्तुतिमुक्त्वा यदग्निमुद्धरति वसवस्तर्ह्यग्निरित्यादिनाहवनीये ऽपि तथा कृतम्। तदिदानीं सूत्रकारो दर्शयति॥

यस्याग्नावुद्ध्रियमाणे हूयते वसुषु हुतं भवति। निहितो धूपायञ्छेते रुद्रेषु। प्रथममिध्ममर्चिरालभत आदित्येषु। सर्व एव सर्वश इध्म आदीप्तो भवति विश्वेषु देवेषु। नितरामर्चिरुपावैति लोहिनीकेव भवतीन्द्रे हुतं भवति। अङ्गारा भवन्ति तेभ्यो ऽङ्गारेभ्यो ऽर्चिरुदेति प्रजापतावेव। शरो ऽङ्गारा अध्यूहन्ते ततो नीलोपकाशो ऽर्चिरुदेति ब्रह्मणि हुतं भवति। १।

यस्याग्नावुद्ध्रियमाणे ह्यत इति यद्धोमार्थमुद्ध्रियते वसुषु हुतं भवतीत्युद्धरणावस्थास्तुतिः अन्यथोद्ध्रियमाणे होमासंभवात्। येऽस्या-हवनीयायतनस्योपरि ध्रियमाण इति व्याख्यातं तैर्भूर्भुवः सुवरुद्ध्रियमाण इत्युद्ध्रियमाणमभिमन्त्रयते यस्याग्निरुद्धृत इत्याद्यपि तथा व्याख्यात-व्यम्। इत्यास्तां तावत्॥ अथोत्तरे ऽवस्थाविशेषाः। सो ऽयमुद्धृतो ऽग्निरायतने निहितः सधूमः शेते। ततः प्रथमं काष्ठमर्चिर्लिहति। ततः सर्व एवेध्मः सर्वप्रदेशेष्वादीप्तो भवति। ततो ऽर्चिरुपरिमन्दवे-गान्नीचैर्गच्छति लोहितेव च भवति। ततः काष्ठेभ्यो ऽङ्गारीभूतेभ्यो ऽर्चिरुत्तिष्ठति। ततो ऽङ्गाराः शेरे ऽप्यूहन्ते शरसा भस्मना सूक्ष्मेण संयोगमापद्यन्ते। ततश्च तेभ्यो नीलप्रकाशो ऽर्चिरुदेतीति॥ तत्र रुद्रेष्वादित्येष्वित्यादीनामपि हुतं भवतीत्यनुषङ्गः। तदुक्तं भवति यदेवमनेकविधावस्थाश्रयभूते ऽग्नौ ह्यते तत्सर्वास्वेव देवतासु हुतं भवतीति। स्पष्टश्चायमर्थो ब्राह्मणे यथा वसुषु रुद्रेष्वादित्येष्वित्यादि॥ अथ होमार्थमवस्थाविधिं दर्शयति॥

यदङ्गारेषु व्यवशान्तेषु लेलायदीव भाति तद्देवाना-मास्यं तस्मात्तथा होतव्यं यथास्ये ऽपिदधात्येवं तदिति विज्ञायते। २।

अवस्थेयं दर्शपूर्णमासयोरेव व्याख्याता तत्रापि नित्या च। तथादरश्च दर्शितो ऽस्या देवतास्यत्ववचनात्॥

विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमीति होष्य-न्नप उपस्पृश्य पालाशीं समिधमादधात्येकां द्वे तिस्रो वा। ३।

होष्यन्नित्यनेन होष्यन्नुपस्पृशेदिति ब्राह्मणं व्याचष्टे सो ऽयं तत्र काले विवक्षित इति। पुनःपालाशवचनात्सर्वाः पालाश्यः। तथा सर्वासामपि स्रुचा धारणमुक्तं हिरण्यकेशिना यथैकां द्वे तिस्रो वोपरिष्टात्स्रुग्दण्ड उपसंगृह्णीति॥

एषा ते अग्ने समिदिति। हिरण्ययं त्वा वंशं स्वर्गस्य लोकस्य संक्रमणं दधामीति द्वितीयाम्। रजतां त्वा हरितगर्भामग्निज्योतिषमक्षितिं कामदुघां स्वर्ग्यां स्वर्गाय लोकाय रात्रिमिष्टकामुपदधे तया देवतयाङ्गिरस्वद्ध्रुवा सीदेति सायं तृतीयाम्। हरिणीं त्वा रजतगर्भां सूर्यज्योतिषमक्षितिं कामदुघां स्वर्ग्यां स्वर्गाय लोकायाहरिष्टकामुपदध इति प्रातः। ४।

गतः॥

इति नवमी कण्डिका।

समिधमाधाय प्राण्यापान्य निमील्य वीक्ष्य हुत्वा ध्यायेद्यत्कामः स्यात्। १।

प्राणनमुच्छ्वासो ऽपाननं निश्वासः। यत्कामः स्याद्यजमानस्तदध्वर्युर्ध्यायेद्यथा पुत्रो ऽस्यास्त्वित्यादि॥

हुत्वा महदभिवीक्षते। २।

कृत्वा तदेव कृतं महङ्कूयिष्ठमभिवीचेत इत्यर्थः। अथवा पूर्वाकृत्यर्थं प्रमादान्महत्कृत्वा तदेवाभिवीचेत प्रायश्चित्तार्थमित्यर्थः॥

आदीप्तायां जुहोति श्यावायां वा यदा वा समतीतार्चिर्लेलायतीव। धूपायत्यां ग्रामकामस्य ज्वलत्यां ब्रह्मवर्चसकामस्याङ्गारेषु तेजस्कामस्य। ३।

समिधस्त्वाद्यास्तिस्रो ऽवस्था नित्याः शेषाः काम्याः। तत्र श्यावा श्यामीभूता। व्याख्यातः शेषः॥

ह्र्यङ्गुले मूलात्समिधमभि जुहोति। ४।

समिधमभि समिधि॥

अभिक्रामं सायं जुहोत्यवक्रामं प्रातः। ५।

अग्निं प्रति क्रान्त्वा सायमग्नेः प्रतीपं क्रान्त्वा प्रातः॥

उभयत्र वाभिक्रामम्। ६।

गतः॥

भूर्भुवः सुवरिति होष्यञ्जपति। ७।

होष्यन्निति पुनर्वचनमवश्यकर्त्वैरप्यव्यवायार्थम्॥

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायमग्निहोत्रं जुहोति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः। ८।

गतः॥

संसृष्टहोमं वाग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायम् । सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः । ९ ।

कुर्यादिति शेषः । संसृष्टेन मन्त्रेण होमः संसृष्टहोमः संसृष्टाभ्यां देवताभ्यां वा ॥

इषे त्वेति स्रुङ्मुखादवाचीनं सायं लेपमवमार्ष्ट्यूर्जे त्वेति । ऊर्ध्वं प्रातः । १० ।

अवाचीनमग्रादारभ्या बिलात् । तद्विपरीतमूर्ध्वम् । तण्डुलादिभिर्होमे पार्श्वेते । मार्जनं सामर्थ्यात् ॥

ओषधीभ्यस्त्वौषधीर्जिन्वेति बर्हिषि लेपं निमृज्य वर्चो मे यच्छेति स्रुचं सादयित्वाग्ने गृहपते मा मा संताप्सीरात्मन्नमृतमधिषि प्रजा ज्योतिरदब्धेन त्वा चक्षुषा प्रतीक्ष इति गार्हपत्यं प्रतीक्ष्य भूर्भुवः सुवरित्युत्तरामाहुतिं पुर्वार्धे समिधि जुहोति तूष्णीं वा । ११ ।

पूर्वार्धे ऽग्नेः समिधि जुहोति ॥

न समिदभिहोतवा इत्येके । १२ ।

न समिदभिहोतव्योत्तराहुतिः । तदापि पूर्वार्ध एव होमः ॥

इति दशमी कण्डिका ।

वर्षीयसामुत्तरामाहुतिं हुत्वा भूयो भक्षायावशि-
नष्टि । १ ।

पूर्वाहुतेर्भूयस्युत्तराहुतिः ततो ऽपि भूयान् भक्षार्थः शेषः ॥

यं कामयेत पापीयान्स्यादिति भूयस्तस्य पूर्वं हुत्वो-
त्तरं कनीयो जुहुयात् । २ ।

कनीयो ऽल्पीयः ॥

हुत्वा स्रुचमुद्गृह्य रुद्र मृडानाभव मृड धूर्त नमस्ते
अस्तु पशुपते त्रायस्वैनमिति त्रिः स्रुचाग्निमुदञ्चमति-
वल्गयति । ३ ।

हुत्वेत्येतदसंदेहार्थम् । असति हि तस्मिन्वचने उत्तरं कनीयो जुहु-
यात्स्रुचमुद्गृह्येत्यप्यन्वयः प्रतीयते । अतिवल्गयति कम्पयति ज्वालाम् ॥

पूर्ववल्लेपमवमृज्य प्राचीनावीती स्वधा पितृभ्यः पि-
तृञ्जिन्वेति दक्षिणेन वेदिं भूम्यां लेपं निमृज्य प्रजां मे
यच्छेति स्रुचं सादयित्वा वृष्टिरसि वृश्च मे पाप्मानमृता-
त्सत्यमुपागामिति हुत्वाप उपस्पृश्यान्तर्वेदि स्रुक् ।
अथाङ्गुल्यापादाय पूषासीति लेपं प्राश्नात्यशब्दं कुर्वन्न-
तिहाय दतः । ४ ।

पूर्ववत् पूर्वाहुतिवत् । प्राचीनावीतिवचनमविस्मरणार्थं लेपमार्जनोत्त-
रकालार्थं वा । दक्षिणेन वेदिमिति वेदिदेशो लक्ष्यते वेद्यभावात् ।
हुत्वाप उपस्पृश्येति होष्यन्नप उपस्पृश्येत्यनेन व्याख्यातः । अन्तर्वेदि

पर्वणि वा। १५।

पर्वणि वा स्वयं जुहुयात्। अपर्वणि तु वक्ष्यमाणौ ब्रह्मचार्यादिरित्यर्थः। तथा चाश्वलायनः स्वयं पर्वणि जुहुयादृत्विजामेक इतरं कालमिति। पर्वणि स्वयं जुहुयादपर्वणि त्वनियम इत्यपरम्। तथा च कात्यायनः स्वयं वा जुहुयादुपवसथे नियम इति॥

ब्रह्मचारी वा जुहुयाद्ब्रह्मणा हि स परिक्रीतो भवति। क्षीरहोता वा जुहुयाद्धनेन हि स परिक्रीतो भवतीति बह्वृचब्राह्मणम्। १६।

ब्रह्मचार्यत्रान्तेवासी गृह्यते ब्रह्मणा हि स परिक्रीत इति लिङ्गात्। बौधायनश्चाह पुत्रो ऽन्तेवासी वेति। यो ऽग्न्याधेय एवर्त्विक्त्वेन परिगृहीतः स क्षीरहोता धनेन हि स परिक्रीत इति लिङ्गात्। हारीतश्चाह यो ऽस्याग्नीनाधत्ते स क्षीरहोतेति। इयमप्येतद्युक्तमाश्वलायनके यथा ऋत्विजामेक इतरं कालमन्तेवासी वेति। तयोरन्यतरो जुहुयात्॥ अपर्वण्यपीत्यपरं अविशेषाच्छाखान्तरीयविधित्वाच्च। तत्र प्रथमो वाशब्दो वैचित्र्यार्थो यजमानेन सह विकल्पार्थो वा॥

इति पञ्चदशी कण्डिका।

इति चतुर्थः पटलः॥

अग्न्युपस्थानं व्याख्यास्यामः। १।

अधिकारप्रदर्शनं सुखग्रहणार्थं अग्न्युपस्थानवदच समिध इत्यादौ विशिष्टकर्मसंप्रत्ययार्थं च॥

उपतिष्ठत इति चोद्यमान आह[redacted]पतिष्ठेत । वचनादन्यम् । २ ।

अस्मिन्नधिकारे अविशेषितायामुपस्थानचोदनायामाहवनीयमेवोपतिष्ठेत । वचनात्त्वन्यं गार्हपत्यादिकम् ॥

उत्तरामहुतिमुपोत्थाय कवातिर्यङ्ङिवोपतिष्ठेत । ३ ।

उत्तरामाहुतिमुपोत्थाय उत्तरामाहुतिं प्रत्याहवनीयसमीप उत्थायेत्यर्थः । कवातिर्यङ्ङीषत्तिर्यङ्मुखः सन्नग्निं प्रत्यपीषदभिमुखः स्थित इति यावत् । अत्रोपोत्थानवचनादन्यत्रासीनस्योपस्थानविधावासीन एवोपतिष्ठते ॥

उपप्रयन्तो अध्वरमिति षड्भिः । ४ ।

आहवनीयमुपतिष्ठत इति शेषः ॥

अग्नीषोमाविमं सु म इति सप्तम्या पूर्वपक्षे । ऐन्द्राग्न्या सप्तम्यापरपक्षे । ५ ।

ऐन्द्राग्न्या उभा वामिन्द्राग्नी इत्यनया प्रकरणात् । तत उभा वामिन्द्राग्नी इत्यैन्द्राग्नीत्येव सत्याषाढः । तस्मात्पूर्वासु षट्सु पठिता सैव पुनरावर्तनीया ॥

दधिक्राव्णो अकारिषमित्युभयत्राष्टम्या । ६ ।

उभयत्रोभयोः पक्षयोः ॥

ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रः पुरस्तादग्नीषोमीयायाः पूर्वपक्षे । तथैन्द्राग्न्या अपरपक्षे । ७ ।

नानुख्यान्नान्वासीना स्यात् पूर्ववदनालम्भुकत्वादिना ॥

अपरं स्रुग्दण्डेनाय विप्रुषां शान्तिरसीत्युन्नयनदेशे निनीयाहवनीये स्रुचं प्रताप्य हस्तौ ऽवधेयौ हस्तौ वा प्रताप्य स्रुच्यवधेयः । ६ ।

अपरमुदकमिति शेषः । स्रुग्घस्तयोः प्रतापने विकल्पः । अवधानं च तत्रोभयत्र हस्तस्यैव ॥

तयोदगुद्दिशति सप्तर्षिभ्यस्त्वा सप्तर्षीञ्जिन्वेति । ७ ।

तया तया युक्तहस्तया स्रुचोदङ्मुखस्तमूष्माणं सप्तर्षीनुद्दिश्य मुञ्चति सप्तर्षिभ्यस्त्वेति ॥

इति द्वादशी कण्डिका ।

इति तृतीयः पटलः ॥

अग्ने गृहपते परिषद्य जुषस्व स्वाहेति स्रुवेण गार्हपत्ये जुहोत्येकां द्वे तिस्रश्चतस्रो वा । १ ।

आहुतीरिति शेषः । ताश्च शेषादेव स्थालीगताज्जुहोति द्रव्यान्तरावचनात् । तथैतस्मादेवाग्निहोत्रशेषादित्येव भारद्वाजः । ततश्च शेषकार्यत्वादासां न प्रयोजकत्वमिति सिद्धं भवति ॥

अग्नये गृहपतये रयिपतये पुष्टिपतये कामायान्नाद्याय स्वाहेत्येतामेके समामनन्ति । २ ।

गतः ॥

समभ्युद्धरति । ३ ।

अस्मिन्पक्षे द्वाभ्यां सकृद्विर्वा होमः ॥

अग्ने ऽदाभ्य परिषद्य जुषस्व स्वाहेति स्रुवेणान्वाहार्यपचने जुहोत्येकां द्वे तिस्रश्चतस्रो वा । ४ ।

गतः ॥

अन्नपते ऽन्नस्य नो देहीति द्वितीयाम् । ५ ।

द्वित्वादिकल्पे द्वितीयामनेन मन्त्रेण जुहोति । ततो ऽन्याः पूर्वेण ॥

अप्राश्य वापरयोर्जुहुयात् । ६ ।

आहवनीयहोमानन्तरमेव वापराग्न्योरपि जुहुयात् ॥

आहवनीये होमो नापरयोः । ७ ।

इदमपि कल्पान्तरम् ॥

यदाहवनीये हुत्वापरयोर्जुहुयाद्यथा स्वर्गाल्लोकात्प्रत्यवरोहेत्तादृक्तदिति विज्ञायते । ८ ।

किमसौ निन्दितत्वादनादरणीय एवापराग्निहोमः । नेत्याह ॥

सर्वे वा एते होमार्था आधीयन्ते । चतस्रो गार्हपत्ये जुहोति चतस्रो ऽन्वाहार्यपचने द्वे आहवनीये । दश संपद्यन्ते । दशाक्षरा विराड्विराजा यज्ञः संमित इति बह्वृचब्राह्मणं भवति । ९ ।

एवं होमो ऽपि शाखान्तरे श्रूयते। अतो याथाकामी होमयोरिति भावः। बाह्वृचे त्वपराग्न्योस्तत्रस्तत्र आहुतयो नियताः ॥

दीदिहि दीदिदासि दीदायेत्येषो ऽग्न्युपसमिन्धन आम्नातः। १०।

सर्वेषामग्नीनामेष एवोपसमिन्धने मन्त्रः ॥

दीदिहि दीदिदासि दीदाय दीद्यासं दीद्यस्वेति वा प्रतिमन्त्रम्। ११।

पञ्च वैते मन्त्राः पञ्चानामेकैकस्य न स्युः ॥

यथाहितास्तेनानुपूर्व्येणाहवनीयाद्वा प्रक्रम्य। १२।

उपसमिन्द्ध इति शेषः ॥

अन्तर्वेद्यपो निनीय। १३।

गतः ॥

इति त्रयोदशी कण्डिका।

पूर्ववदग्नीन्परिषिञ्चति। न धाराम्। १।

स्रावयतीति शेषः। अत एव प्रतिषेधाज्ज्ञानीमः परिषेचनाङ्गं धारेति। तेन बहुविदुद्धरणे ऽर्वाक् परिषेचनाद्भवति ॥

अपिप्रेरग्ने स्वां तन्वमयाड् द्यावापृथिवी ऊर्जमस्मासु धेहीत्यग्निहोत्रस्थाल्यां तृणमङ्क्त्वानुप्रहरति। २।

अग्निहोत्रसाधनार्थाद्बर्हिष एकं तृणमादायाग्निहोत्रस्थाल्यामक्त्वाहवनीये ऽनुप्रहरति ॥

सा ह्यग्निहोत्रस्य संस्थितिः । ३ ।

तृणप्रहारस्यैव स्तुतिरियम्। यथा दर्शपूर्णमासयोर्बर्हिःप्रहरणेन संस्था भवत्येवमग्निहोत्रस्यापीति ॥

न बर्हिरनुप्रहरेत्। असंस्थितो वा एष यज्ञो यदग्निहोत्रमित्युक्तम्। ४ ।

शाखान्तरे तु न बर्हिरनुप्रहरेदिति प्रकृत्यासंस्थित इत्यादिनानुप्रहरणं निन्दित्वा तस्मान्नानुप्रहृत्यमित्युपसंहृतम्। अतो वैकल्पिकं तृणप्रहरणमिति भावः ॥

अग्निहोत्रस्थालीं प्रक्षाल्याक्षितमक्षित्यै जुहोमि स्वाहेत्युन्नयनदेशे निनयति। अन्तर्वेदि वा। ५ ।

गतः ॥

वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागामप्सु अद्भेत्यप आचम्य यजमानो ऽन्तर्वेदि मार्जयते ऽन्नादाः स्थान्नादो भूयासं यशः स्थ यशस्वी भूयासं श्रद्धा स्थ श्रद्धिषीयेति। ६ ।

आचम्य भक्षयित्वा। अन्तर्वेदि मार्जयते वेद्यां हस्तं प्रसार्य तस्मिन्नप आसिञ्चति। यथाश्वलायनः हस्ते ऽप आसेचयते तन्मार्जनमिति ॥

आपो ह स्नेष्म प्रथमं संबभूव येन धृतो वरुणो येन

मित्रः । येनेन्द्रं देवा अभ्यषिञ्चन्त राज्याय तेनाहं मामभिषिञ्चामि वर्चस इति शिरस्यप आनयते । ७ ।

अनयापः शिरस्यानयते चावभृथार्थम् । तथा च श्रुतिः अपो निनयत्यवभृथस्यैव रूपमकरिति । अथाग्निहोत्रे काम्यान्कल्पानाह ॥

द्वयोः पयसा पशुकामस्य जुहुयात् । ८ ।

द्वयोर्गवोरिति शेषः ॥

अग्निहोत्रस्थाल्या पूर्वां दोग्धि । दोहनेनोत्तराम् । ९ ।

पृथगुभाभ्यामुभे दुह्यान्न तु पूर्ववत्समुच्चिताभ्याम् ॥

अधिश्रित्य पूर्वमुत्तरमानयति । १० ।

पूर्वं दुग्धमग्निहोत्रस्थालीगतम् । पूर्वमधिश्रित्य तस्मिन्नुत्तरं दुग्धमानयति ॥

यस्य रुद्रः पशूञ्छमायेतैतयैवावृता द्वयोः पयसा सायंप्रातर्जुहुयात् । ११ ।

रुद्रः ज्वरः पशून् शमायेत शमयेत् हन्यात् । एतयैवावृता उक्तेन दोहप्रकारेण ॥

तच्चेदतिहन्यात्सजूर्जातवेदो दिव आ पृथिव्या अस्य हविषो घृतस्य वीहि स्वाहेति सायंप्रातराज्येन जुहुयात् । १२ ।

सायंप्रातर्ऊतमतीत्य पुनश्चेद्रुद्रो हन्यात्ततः सायंप्रातराज्येन हविषाग्नि-

होत्रं जुहुयात्। सजूरिति मन्त्रेण पूर्वाहुतिः। जातवेदसं हविरिति चोह्यः ॥

अनारमत्यग्ने दुःशीततनो जुषस्व स्वाहेति द्वादशाहमाज्येन हुत्वा तत ऊर्ध्वं न मृक्षेत् । १३ ।

पुनरप्यविरमति रुद्रे द्वादशाहमनेन मन्त्रेणाज्येनैव जुहुयात्। ततः परमप्यनुपरमे न मृक्षेत् नाद्रियेत कर्म तावतैव कृतेन स्वयमारंस्यति। न चेदारंस्यति प्रबलादृष्टप्रयुक्तत्वान्नैतादृशेन कर्मणा शोमक्यारमण इत्यालोच्यानुगुणमारभेतेति भावः। न च कर्मानर्थक्यं भवान्तरे ऽपि फलदानोपपत्तेः ॥

इति चतुर्दशी कण्डिका ।

पयसा पशुकामस्य जुहुयाद्दध्नेन्द्रियकामस्य यवाग्वा ग्रामकामस्यौदनेनान्नाद्यकामस्य तण्डुलैरोजस्कामस्य । बलकामस्येत्येके । मांसेन यशस्कामस्य सोमेन ब्रह्मवर्चसकामस्याज्येन तेजस्कामस्य । १ ।

पयसो नित्यस्यैव सति कामे फलवचनम्। अन्ये सर्वे गुणकामा इति शेषः ॥

प्रतिषेकं यवागूं श्रपयति । २ ।

यवागूं श्रपयंस्तूष्णीमुदकेन प्रतिषिच्य श्रपयति ॥

शृतां यजुषा प्रतिषिञ्चति । ३ ।

ततः शृतां सतीं पुनर्यजुषा इरस्ते मा विनैषमित्यनेन प्रतिषिञ्च-तीत्यर्थः ॥

एवं मांसम् । ४ ।

गतः ॥

नाज्यं प्रतिषिञ्चति इरस्ते मा विनैषमिति । द्वे दर्भाग्रे प्रत्यस्यत्येकं वा । ५ ।

आज्यं न प्रतिषिञ्चति तत्स्थाने तु दर्भाग्रे प्रत्यस्यति ॥

न दध्यधिश्रयति । शृतं हि तन्न प्रतिषिञ्चति प्रतिषिक्तं हि तदातञ्चनेनेति विज्ञायते । ६ ।

गतः ॥

एवं तण्डुलानोदनं सोमं च । ७ ।

एवं नाधिश्रयति न प्रतिषिञ्चतीत्यर्थः । अधिश्रयणप्रतिषेधादेवाप्रति-षेके सिद्धे पुनस्तत्प्रतिषेधात्ततोऽन्येषां अपणसहभुवां ज्वलतावेक्षणा-दीनामनिवृत्तिः । तथा च दध्यादि प्रकृत्य भारद्वाजः यदन्यदधिश्र-यणात्प्रतिषेचनादि सर्वं तत्क्रियत इति ॥

आज्येन तण्डुलैरोदनेन सोमेन वा जुहुयाद्यस्या-प्रतिषेक्यं स्यात् । ८ ।

यस्य तेजस्कामादेरप्रतिषेक उक्तः स एतेषामप्रतिषेक्याणामन्यतमेनैव

जुहुयान्न तु पयोयवाग्वादिना प्रतिषेक्येण। तत्र त्वादिगुणकामा न भवन्ति ॥

आज्येन तेजस्कामः संवत्सरं जुहुयाद्द्वादशाहं वा। ९।

फलवैषम्यं तु कालयोः कर्मवैषम्यादनुसंधातव्यम् ॥

न राजन्यस्य जुहुयात्। १०।

राजन्यस्याग्निहोत्रनिषेधे ऽपि गतश्रीत्वादाहवनीयो नित्यो धार्यते ॥

होमकाले गृहेभ्यो ब्राह्मणायान्नं प्रहिणुयात्तेनो हैवास्य हुतं भवति। ११।

गृहेभ्य इत्यनेन गृहे पाक्यतामन्नस्य दर्शयति। होमकाले गृहेभ्यो ऽपाक्यान्नं ब्राह्मणाय प्रहिणुयात् प्रदिशेत्। उ हेति निपातसमुदायः प्रसिद्धौ। तेनैवास्य हुतं भवति स होमप्रत्याम्नाय इत्यर्थः ॥

नित्यमग्न्युपस्थानं वाचयितव्यः। १२।

अग्न्युपस्थानं तु मन्त्रमध्वर्युणा नित्यं कालेकाले वाचयितव्यः ॥

यो वा सोमयाजी सत्यवादी तस्य जुहुयात्। १३।

य एवमुभयगुणो राजन्यस्तस्य जुहुयाद्वा। अथाग्निहोत्रस्य कर्तृविकल्पानाह ॥

अहरहर्यजमानः स्वयमग्निहोत्रं जुहुयात्। १४।

अहरहर्नित्यं यजमानः स्वयं जुहुयात् ॥

पर्वणि वा । १५ ।

पर्वणि वा स्वयं जुहुयात्। अपर्वणि तु वक्ष्यमाणो ब्रह्मचार्यादिरित्यर्थः। तथा चाश्वलायनः स्वयं पर्वणि जुहुयादृत्विजामेक इतरं कालमिति। पर्वणि स्वयं जुहुयादपर्वणि त्वनियम इत्यपरम्। तथा च कात्यायनः स्वयं वा जुहुयादुपवसथे नियम इति ॥

ब्रह्मचारी वा जुहुयाद्ब्रह्मणा हि स परिक्रीतो भवति। क्षीरहोता वा जुहुयाद्धनेन हि स परिक्रीतो भवतीति बह्वृचब्राह्मणम्। १६ ।

ब्रह्मचार्यत्रान्तेवासी गृह्यते ब्रह्मणा हि स परिक्रीत इति लिङ्गात्। बौधायनस्त्वाह पुत्रो ऽन्तेवासी वेति। यो ऽग्न्याधेय एवर्त्विक्त्वेन परिगृहीतः स क्षीरहोता धनेन हि स परिक्रीत इति लिङ्गात्। हारीतस्त्वाह यो ऽस्याग्नीनाधत्ते स क्षीरहोतेति। इयमप्येतद्युक्तमाश्वलायनवे यथा ऋत्विजामेक इतरं कालमन्तेवासी वेति। तयोरन्यतरो जुहुयात्॥ अपर्वण्यपीत्यपरं अविशेषाच्छाखान्तरीयविधित्वाच्च। तत्र प्रथमो वाशब्दो वैचित्र्यार्थो यजमानेन सह विकल्पार्थो वा ॥

इति पञ्चदशी कण्डिका ।

इति चतुर्थः पटलः ॥

अग्न्युपस्थानं व्याख्यास्यामः । १ ।

अधिकारप्रदर्शनं मुखग्रहणार्थं अग्न्युपस्थानवदत्र समिध इत्यादौ विशिष्टकर्मसंप्रत्ययार्थं च ॥

उपतिष्ठत इति चोद्यमान आहवनीयमेवोपतिष्ठेत् । वचनादन्यम् । २ ।

अस्मिन्नधिकारे अविशेषितायामुपस्थानचोदनायामाहवनीयमेवोपतिष्ठेत । वचनात्त्वन्यं गार्हपत्यादिकम् ॥

उत्तरामाहुतिमुपोत्थाय कवातिर्यङ्ङिवेोपतिष्ठेत । ३ ।

उत्तरामाहुतिमुपोत्थाय उत्तरामाहुतिं प्रत्याहवनीयसमीप उत्थायेत्यर्थः । कवातिर्यङ्ङीषत्तिर्यङ्मुखः सन्नग्निं प्रत्यपोषदभिमुखः स्थित इति यावत् । अत्रोपोत्थानवचनादन्यत्रासीनस्योपस्थानविधावासीन एवोपतिष्ठते ॥

उपप्रयन्तो अध्वरमिति षड्भिः । ४ ।

आहवनीयमुपतिष्ठत इति शेषः ॥

अग्नीषोमाविमं सु म इति सप्तम्या पूर्वपक्षे । ऐन्द्राग्न्या सप्तम्यापरपक्षे । ५ ।

ऐन्द्राग्न्या उभा वामिन्द्राग्नी इत्यनया प्रकरणात् । तत उभा वामिन्द्राग्नी इत्यैन्द्राग्नीत्येव सत्याषाढः । तस्मात्पूर्वासु षट्सु पठिता सैव पुनरावर्तनीया ॥

दधिक्राव्णो अकारिषमित्युभयत्राष्टम्या । ६ ।

उभयत्रोभयोः पक्षयोः ॥

ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रः पुरस्तादग्नीषोमीयायाः पूर्वपक्षे । तथैन्द्राग्न्या अपरपक्षे । ७ ।

समन्याश्च पुरस्ताच्चतस्र एता उपस्थानार्थाः स्युरित्यर्थः। जपार्थं एता नोपस्थानार्था इति केचित्। तदयुक्तं उपस्थानाधिकारात् प्रातरवनेके चतस्रो ऽग्नीषोमाविमं सु म इत्येषेत्यचोपस्थानार्थताया व्यक्तत्वात् ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रो जपित्वेति क्वचिद्विशेषप्रदर्शनाच्च। तथा चतसृभिरुपतिष्ठेतेत्येव सत्याषाढभारद्वाजौ॥ तत्र त्वादितः षड्भ्यो ऽनन्तरमेतास्चतस्र उक्ता ततो ऽग्नीषोमीयेन्द्राग्न्यौ पक्षवशादेकादश्यौ नियम्येते। ततो दधिक्राव्ण इति द्वादशेत्यनुक्तिः पर्यनुयोज्या विचित्रत्वात्सूत्रक्रियायाः॥

अग्न आयूंषि पवस इति षड्भिः संवत्सरेसंवत्सरे सदा वा। ८।

प्रतिसंवत्सरं सकृत्सकृदेताभिराहवनीयमुपतिष्ठते। सदाहरहर्वा॥

पवमानहवींषि वा संवत्सरेसंवत्सरे निर्वपेदेतासां स्थाने। ९।

अथवा नैताभिरुपतिष्ठेत किं तु प्रत्याम्नायत्वेन संवत्सरे पवमानहवींषि समानतन्त्राणि निर्वपेत्॥

आयुर्दा अग्न इति सिद्धमा चित्रावसोः। १०।

चित्रावसुशब्देन तदादिमन्त्रो लक्ष्यते। आयुर्दा इत्यादि चित्रावसो स्वस्ति ते पारमशीयेत्यन्तो मन्त्रः। पूर्वमन्त्रचतुष्टयं सिद्धमुपस्थाने। न तत्र कश्चिद्विशेष इत्यर्थः॥

चित्रश्चित्रावसुना सायमुपतिष्ठते। चिरर्वाग्वसुना प्रातर्वाग्वसो स्वस्ति ते पारमशीय। ११।

इतिकरणो ऽन्ते द्रष्टव्यः। इत्यर्वाग्वसुना प्रातरिति। अर्वाग्वसुवचनं च प्रसङ्गात्प्रातरवनेकार्थं न तस्मिन्नेवोपस्थाने प्रातर्विशेषप्रदर्शनार्थम् सायंकाल एवास्य नियम इष्यमाणत्वात्। तथा अर्वाग्वसो स्वस्ति ते पारमशीयेति प्रातः प्रातरवनेक इत्येव भारद्वाजः॥

इन्धानास्त्वा शतं हिमा इत्युपस्थायेन्धानास्त्वा शतं हिमाः। अग्नेः समिदस्यभिशस्त्या मा पाहि सोमस्य समिदसि परस्पा म एधि यमस्य समिदसि मृत्योर्मा पाहीति चतस्रः समिध एकैकस्मिन्नाधाय सं त्वमग्ने सूर्यस्य वर्चसागथा इत्यनुवाकशेषेणोपस्थाय वयं सोम व्रते तव मनस्तनूषु बिभ्रतः प्रजावन्तो अशीमहीति मुखं विमृष्टे। १२।

इन्धानास्त्वेत्यनया सप्तपदयर्चा प्रथममाहवनीयमुपस्थाय पुनरनयापरैश्च त्रिभिर्यजुर्भिरेकैकत्राग्नौ चतस्रश्चतस्रः समिध आदध्यात्॥

इति षोडशी कण्डिका।

संपश्यामि प्रजा अहमिति गृहान्प्रेक्षते। १।

गृहमेव गृहाः॥

अम्भः स्थाम्भो वो भक्षीयेति गोष्ठमुपतिष्ठते। २।

गोसमूहो गोष्ठं न तु गोस्थानं अम्भो वो भक्षीयेति लिङ्गात्॥

रेवती रमध्वमित्यन्तराग्नी तिष्ठञ्जपति। ३।

गतः ॥

संहितासि विश्वरूपीरिति वत्समभिमृशति। ४।

वत्सं यं कंचिदभिमृशत्यविशेषात्। अग्निहोत्र्या वत्समित्येव तु बौधायनः ॥

संहितासि विश्वरूपेति वत्साम्। ५।

तेनैव वत्सामप्यभिमृशति। विश्वरूपेति तु विकारः ॥

भुवनमसि सहस्रपोषं पुषेति वा वत्सम्। ६।

वत्समिति वचनान्न वत्सायामयं मन्त्रः ॥

उप त्वाग्ने दिवेदिव इति तिसृभिर्गायत्रीभिर्गार्हपत्यमुपतिष्ठते ऽग्ने त्वं नो अन्तम इति चतसृभिश्च द्विपदाभिः।७।

गायत्रीभिर्द्विपदाभिरिति ब्राह्मणानुकरणार्थं तद्व्याख्यानार्थं वा ॥

स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मादित्येषा चतुर्थी भवति। ८।

द्विपदेति शेषः ॥

ऊर्जा वः पश्याम्यूर्जा मा पश्यतेति गृहान्प्रेक्षते पशून्वा। ९।

गतः ॥

महि चीणामवो ऽस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य॥ नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः॥ ते हि पुत्रासो अदितेश्छर्दिर्यच्छन्त्यजस्रम्। वि दाशुषे वार्याणीति प्राजापत्येन तृचेनोपतिष्ठते।१०।

आहवनीयमिति शेषः॥

यं कामयेत स्वस्ति पुनरागच्छेदिति तमेताभिरन्वीक्षेत। स्वस्त्येव पुनरागच्छतीत्ययज्ञसंयुक्तः कल्पः।११।

यो ऽन्यं प्रवत्स्यन्तं कामयेत अनामयमेवायं पुनरागच्छेदिति स तं प्रस्थितमेतेन तृचेनान्वीक्षेत स स्वस्त्येव पुनरागच्छति। सर्वार्थश्चायं कल्पो न यजमानस्यैवेत्यर्थः॥

मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य। रक्षा णो ब्रह्मणस्पते॥ यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः॥ परि ते दूडभो रथो ऽस्माँ अश्नोतु विश्वतः। येन रक्षसि दाशुषः।१२।

इति सप्तदशी कण्डिका।

तत्सवितुर्वरेण्यं सोमानं स्वरणं मित्रस्य चर्षणीधृतः प्र स मित्र कदा चन स्तरीरसि कदा चन प्रयुच्छसि परि त्वाग्ने पुरं वयमित्युपस्थाय।१।

आपस्तम्बीयमन्त्रेति शेषः ॥

निमृदो ऽसि न्यहं तं मृद्यासं यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणस्य पदः पार्ष्ण्या निमृद्नीयाद्यदि पापीयसा स्पर्धेत। प्रभूरसि प्राहं तमभिभूयासं यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणतः पदो निमृद्नीयाद्यदि सदृशेन। अभिभूरस्यभ्यहं तं भूयासं यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति प्रपदेन यदि श्रेयसा ॥२॥

काम्यो ऽयं प्रयोगः। यदि पापीयसात्मनो हीनर्द्धिना स्पर्धेत न किलायमस्मत्तुल्यः स्यादिति तदा दक्षिणस्य पदः पार्ष्ण्या पश्चिमभागेन निमृद्नीयात् निपीडयेद्भूमिम्। यदि सदृशेन स्पर्धेत कथं किलायं मम तुल्यः सेत्स्यत इति दक्षिणस्य पदो दक्षिणतः दक्षिणेन भागेन निमृद्नीयात् निपीडयेत्। यदि श्रेयसा स्फीतर्द्धिना स्पर्धेत धिगयं मदधिकः पाप इति प्रपदेन पादाग्रेण निमृद्नीयात्। एवं कृते सस न्यकृतो भवतीति भावः ॥

पूषा मा पशुपाः पातु पूषा मा पथिपाः पातु पूषा माधिपाः पातु पूषा माधिपतिः पात्विति लोकानुपस्थाय प्राची दिगग्निर्देवताग्निं स ऋच्छतु यो मैतस्यै दिशो ऽभिदासति। दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु यो मैतस्यै दिशो ऽभिदासति। प्रतीची दिक् सोमो देवता

सोमं स ऋच्छतु ये मैतस्यै दिशो ऽभिदासति। उदीची दिङ्मित्रावरुणौ देवता मित्रावरुणौ स ऋच्छतु ये मैतस्यै दिशो ऽभिदासति। ऊर्ध्वा दिग्बृहस्पतिर्देवता बृहस्पतिं स ऋच्छतु ये मैतस्यै दिशो ऽभिदासति। इयं दिगदितिर्देवतादितिं स ऋच्छतु ये मैतस्यै दिशो ऽभिदासतीति यथालिङ्गं दिश उपस्थाय। ३।

इत्यष्टादशी कण्डिका।

अग्नीनुपसमाधाय धर्मो मा धर्मणः पातु विधर्मो मा विधर्मणः पात्वायुश्च प्रायुश्च चक्षुश्च विचक्षुश्च प्राङ्चावाङ्चोरुग उरुगस्य ते वाचा वयं सं भक्तेन गमेमहीत्युपस्थायाग्न आयूंषि पवस इत्याग्निपावमानीभ्यां गार्हपत्यमुपतिष्ठते। १।

लोकोपस्थानमेकैकस्यैकेन मन्त्रेणैकलिङ्गत्वात्। चतुर्थी विकल्पार्थः। उपसमाधानं काष्ठैरुपसमिन्धनम्। धर्मो मेत्याहवनीयस्योपस्थानम्॥

अग्ने गृहपत इति च। पुत्रस्य नाम गृह्णाति तामाशिषमाशासे तन्तव इत्यजातस्य। अमुष्मा इति जातस्य। २।

व्याख्यातो ऽयं याजमाने॥

यत्किंचाग्निहोत्री कामयेत तदग्नीन्याचेत। उपैनं तन्नमतीति विज्ञायते। ३।

अग्न्युपस्थानान्ते यजमानो ऽभिमतमर्थमग्नीन्याचेत। सो ऽर्थो ऽस्य स्वयमागच्छति। एवमुपस्थानमुक्त्वा तस्यानित्यत्वमपि दर्शितं ब्राह्मणे। तदिदानीं दर्शयति॥

उपस्थेयो ऽग्नी३र्नोपस्थेया३ इत्युक्तम्। ४।

ब्राह्मणे ऽप्युपस्थेयो ऽग्नीर्नोपस्थेया इति विचार्योपस्थानं तावन्निन्दित्वा तस्मान्नोपस्थेय इति निषिध्य तत उपस्थानं प्रशंसापुरःसरमुक्तं तस्मादुपस्थेय इति। तेनैवं विहितप्रतिषिद्धमुपस्थानं वैकल्पिकमिति भावः। अथोपस्थानकल्पे ऽपि सायमेवोपस्थानं न प्रातरित्युक्तं ब्राह्मणे। तदपि दर्शयति॥

नक्तमुपतिष्ठते न प्रातः। ५।

एवं च यथोक्तमेतदुपस्थानं न प्रातःकाले लभ्यत इति सिद्धं भवति। अत एव चोत्तरस्मिन्कल्पे सायंप्रातरिति वक्ष्यति। सुव्यक्तं चैतत्सूत्रान्तरेषु यथैवमेव सायंसायमुपतिष्ठेतेत्यादि॥ अथ शाखान्तराभिप्रायेण याजमानान्तरस्यापि प्रातर्निवृत्तिं दर्शयति॥

न प्रातरग्निमुप चनावरोहेन्न प्रातराहिताग्निश्चन मन्येतेति वाजसनेयकम्। ६।

चनेति निपातो ऽप्यर्थे। प्रातरग्निमपि नोपगच्छेत्। आहिताग्निरस्मीत्यपि न मन्येत च। का कथा याजमानेष्वित्यर्थः॥

भूर्भुवः सुवः सुप्रजाः प्रजया भूयासं सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैरित्येवोपतिष्ठेतेति वाजसनेयकम्। भर्तुं वः शकेयं श्रद्धा मे मा व्यागादिति वा। ७।

इमावपि कल्पौ सायंकालिकावेव उत्तरत्र सायंप्रातर्ग्रहणात्। एवकारः सर्वेतरोपस्थानतन्त्रनिवृत्त्यर्थः ॥

वात्सप्रेणैव सायंप्रातरुपतिष्ठेतेत्येके। ८।

वात्सप्रं दिवस्परीत्यनुवाकः सूत्रब्राह्मणप्रसिद्धेः। तच्च सायंप्रातर्ग्रहणात्प्रातरपि प्रातरवनेकेन विकल्प्यते। पूर्ववदेवकारार्थः। यदा सायमुपस्थानं वात्सप्रेण तदा प्रातरपि तेनैवेत्येवकारार्थ इत्यपरम् ॥

गोषूक्तेनाश्वसूक्तेन वा। ९।

गोषूक्तिना दृष्टं साम गोषूक्तं अश्वसूक्तिना दृष्टं सामाश्वसूक्तं तथ छन्दोगप्रसिद्धेः। तयोश्चाद्यमाग्नेयं सौर्यमितरत्। अतः सायंप्रातर्व्यवतिष्ठेते। गोषूक्तमा गावो अग्मन्नित्यनुवाकशेषः। षकारश्छान्दसः यदक्रन्द इत्यनुवाको ऽश्वसूक्तमित्यन्य ॥

इत्येकोनविंशी कण्डिका।

इति पञ्चमः पटलः ॥

प्रातरवनेकेन प्रातरुपस्थेयः। १।

प्रातरवनेको नाम शाखान्तरीयमुपस्थानं प्रातःकालसंबन्धात् हस्तावनेजनसंबन्धाच्च। तेन प्रातरुपस्थेयो ऽग्निर्न सायम् ॥

अधिश्रित उन्नीयमाने वा ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रो जपित्वापां पते यो ऽपां भागः स त एष

प्रतिषिक्ता अरातयः प्रतिषिक्ता अरातयः प्रतिषिक्ता अरातय इति त्रिर्भूमौ प्रतिषिच्य कालाय वां जैत्रियाय वामौद्भिद्यियाय वामन्नाद्याय वामवनेनिजे सुकृताय वाम्। इदमहं दुरद्मन्यां निष्प्लावयामि भ्रातृव्याणां सपत्नानामहं भूयासमुत्तमः। अपां मेध्यादिवोदकमिति हस्तौ प्रक्षाल्य श्रियं धातर्मयि धेहि श्रियो माधिपतिं कुरु। विश्वामीशानो मघवेन्द्रो मा यशसा नयदिति जपित्वा*यव्युंष्टा देवजूता वीडु छपथजम्भनीः। आपो मलमिव प्राणिजन्नस्मत्सु शपथाँ अधी*त्याचम्येन्द्रिया [illegible]हं वाचमुद्यासं दीर्घप्राणोऽच्छिन्नोऽदब्धो गोपाः। अजस्रं दैव्यं ज्योतिः सौपर्णं चक्षुः सुश्रुतौ कर्णौ देवश्रुतौ कर्णौ केशा बर्हिः शिखा प्रस्तरो यथास्थानं कल्पयध्वं शं हृदयायादो मा मा हासिष्टेति यथालिङ्गमङ्गानि संमृश्य। २।

इति विंशी कण्डिका।

वर्चो ऽसि वर्चो मयि धेह्यायुष्कृदायुःपत्नी स्वधा वो गोप्त्रो मे स्थ गोपायत मा रक्षत मात्मसदो मे स्थ।

---

* thus according to the MSS., corrupted from Atharva Veda 2. 7. 1.

मा नः कश्चित्प्रघान्मा प्रमेष्मह्युप प्रत्नमुप भूर्भुवः सुवरायुर्मे यच्छतेति सर्वानुपस्थायोत्तरेणानुवाकेनाहवनीयं घर्मा जठरान्नादं मामद्यास्मिञ्जने कुरुतमन्नादो ऽहमद्यास्मिञ्जने भूयासमनन्नादः स यो ऽस्मान्द्वेष्टि। कवी मातरिश्वाना पशुमन्तं मामद्यास्मिञ्जने कुरुतं पशुमानहमद्यास्मिञ्जने भूयासमपशुः स यो ऽस्मान्द्वेष्टि। यमाङ्गिरसा यशस्विनं मामद्यास्मिञ्जने कुरुतं यशस्व्यहमद्यास्मिञ्जने भूयासमयशाः स यो ऽस्मान्द्वेष्टि॥ अग्ने यो नो अन्ति शपति यश्च दूरे समानो अग्ने अरणो दुरस्युः। वैश्वानरेण सयुजा सजोषास्तं प्रत्यञ्चं संदह जातवेदः॥ अग्ने यत्ते ऽर्चिस्तेन तं प्रत्यर्च यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽग्ने यत्ते शोचिस्तेन तं प्रतिशोच यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽग्ने यत्ते तपस्तेन तं प्रतितप यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽग्ने यत्ते हरस्तेन तं प्रतिहर यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मो ऽग्ने यत्ते तेजस्तेन तं प्रतितितिग्धि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। १।

इत्येकविंशी कण्डिका।

अग्ने रुचां पते नमस्ते रुचे रुचं मयि धेहि। अर्वाग्वसो स्वस्ति ते पारमशीयार्वाग्वसो स्वस्ति ते पारम-

शीयार्वाग्वसो स्वस्ति ते पारमशीय। तन्तुरसि ततो मा च्छिंत्था असौ स्वस्ति ते ऽस्त्वसौ स्वस्ति ते ऽस्त्वसौ स्वस्ति ते ऽस्त्विति पुत्राणां नामानि गृह्णाति त्रिस्त्रिरेकैकस्य। स्वस्ति वो ऽस्तु ये मामनुस्थ षण्मोर्वीरंहसस्पान्तु द्यौश्च पृथिवी चापश्चौषधयश्चोर्क्च सूनृता च। यथा ह त्यद्वसवो गौर्यं चित्पदि षितामसुञ्चता यजत्राः। एवो ष्वस्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः॥ वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः। अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान्॥ अग्न आयूंषि पवस इति दधिक्राव्णो अकारिषमिति द्वे ममाग्ने वर्चो विहवेष्वस्त्विति चतस्रो ऽग्नीषोमाविमं सु म इत्येषा। तत्सवितुर्वृणीमहे वयं देवस्य भोजनम्। श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि॥ अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियम्। न मिनन्ति स्वराज्यम्। १।

इति द्वाविंशी कण्डिका।

अद्या नो देव सवितः प्रजावत्सावीः सौभगं। परा दुःष्वप्नियं सुव॥ विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्म आ सुव॥ अनागसो अदितये वयं

देवस्य सवितुः सवे। विश्वा वामानि धीमहि॥ स हि रत्नानि दाशुषे सुवाति सविता भगः। तं चित्रं भागमीमहे॥ वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः सौभगम्। वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम॥ दीक्षा तपो मनसो मातरिश्वा बृहस्पतिर्वाचो अस्याः स योनिः। वेदांसि विद्या मयि सन्तु चारवोऽग्नीषोमा यशो अस्मासु धत्तम्॥ अग्निर्येन विराजति सोमो येन विराजति सूर्यो येन विराजति विराड् येन विराजति तेनाहं विश्वतस्परि विराज्यासमिहैकवृदित्युपस्थायाग्नेस्तृणान्यपचिनोति। तेजस्वी ह ब्रह्मवर्चसी भवतीति विज्ञायते।१।

प्रतिषिक्ता अरातय इति प्रत्यभ्यासं भूमावप आसिञ्चति। अभ्यस्तरूपनिर्देशः प्रतिप्रतिषेकं मन्त्रावृत्त्यर्थोऽसर्वमन्त्रावृत्त्यर्थश्च। हस्तावनेजनमदृष्टार्थम्। अथर्युष्टा इत्याचमनमपां भक्षणम्। इन्द्रियावतीमित्यास्यसंमर्शनं दीर्घप्राण इति नासिकायाः अजस्रमिति चक्षुषः सुश्रुताविति कर्णयोः केशा इति केशानां शिखेति शिखायाः यथास्थानमिति हृदयस्य। वर्चोऽसीत्यादिना सर्वानग्नीनुपस्थाय तत उत्तरामाहुतिमुपोत्थाय घर्मो जठरेत्यादिनेहैकवृदित्यन्तेनानुवाकेनाहवनीयमुपस्थायेति वक्ष्यमाणेन संबन्धः। तत्र चिर्वाग्वसुना प्रातरिति प्रागुक्ताभ्यासप्रदर्शनमर्वाग्वसो स्वस्तीति। तन्तुरसीत्येतत्पुत्रेपुत्रेऽभ्यावर्तते। तत्राभ्यस्तरूपनिर्देशः प्रतिषेकवद्व्याख्येयः। दधि-

क्राव्णो अकारिषमिति द्वे इति दधिक्राव्ण आ दधिक्रा इत्यनयो-र्ग्रहणम्। अग्नेस्तृणान्यपचिनोति यान्यग्नीनां परिस्तरणतृणानि तानि तेभ्यः स्वयमपोहति। नाध्वर्युः प्रकरणात्प्रातरवनेक एवायं नियमः। अन्यत्र त्वध्वर्युरेव परिसमूहनकाले ऽपोहति ॥

इति त्रयोविंशी कण्डिका ।

इति षष्ठः पटलः ॥

प्रवत्स्यन्संप्रेष्यत्यग्नीन्समाधेहीति । १ ।

ग्रामान्तरे रात्रिवासः प्रवासः । तं करिष्यन्नग्नीन्समाधेहीति विहृत्य प्रज्वलयेत्यग्निहोत्रहोतारं परिकर्मिणं वा संप्रेष्यति ॥

ज्वलत उपतिष्ठते । २ ।

गतः ॥

पशून्नः शंस्य पाहि तान्नो गोपायास्माकं पुनरागमादित्याहवनीयम्। प्रजां नो नर्य पाहि तां नो गोपायास्माकं पुनरागमादिति गार्हपत्यम्। अन्नं नो बुध्न्य पाहि तन्नो गोपायास्माकं पुनरागमादित्यन्वाहार्यपचनम्। ३ ।

उपतिष्ठत इत्यनुषङ्गः ॥

अन्तराग्नी तिष्ठञ्जपतीमान्नो मित्रावरुणा गृहान्गो-

पायतं युवम्। अविनष्टानविहृतान्पूषैनानभिरक्षत्वास्माकं पुनरागमादिति। ४।

अग्नी इति पूर्ववत्॥

पूर्ववद्विराट्क्रमैरुपस्थायाशित्वा प्रवसथमेष्यन्नाहाग्नीन्समाधेहीति। ५।

पूर्ववदग्न्याधेयवत्। विराट्क्रमैरुपस्थाने कृते ऽशित्वा गमनकाले पुनरग्नीन्समाधेहीत्याह यद्यशित्वा गन्तुमिच्छति। अनशित्वा गमने तु पुनःसमाधानम्। उपस्थानमेवात्र कार्यं अविच्छेदात् आगतोपस्थाने तथादर्शनाच्च। अशनं पुनःसमाधानं पुनरुपस्थानमित्येतत्त्रयमपि नित्यमेवेत्यपरम्। पुनःसमाधाने विहृतानामेव ज्वलनं न पुनर्विहरणं एककर्म्यात्॥

ज्वलत उपतिष्ठते प्रजां मे नर्य पाहि तां मे गोपायास्माकं पुनरागमादिति गार्हपत्यम्। अन्नं मे बुध्य पाहि तन्मे गोपायास्माकं पुनरागमादित्यन्वाहार्यपचनम्। पशून्मे शंस्य पाहि तान्मे गोपायास्माकं पुनरागमादित्याहवनीयम्। ६।

गतः॥

मम नाम प्रथमं जातवेद इति च। ७।

यदाहवनीयमुपतिष्ठत इत्यन्वयः॥

वाग्यतो ऽभिप्रव्रजति मा प्रगाम पथो वयं मा

यस्मादिन्द्र सोमिनः। मान्तःस्थुर्नो अरातयः। उदस्माँ उत्तरान्नयाग्ने घृतेनाहुत। रायस्पोषेण संसृज प्रजया च बहुन्कृधीति। ८।

मन्त्रान्ते विहारान्निर्गच्छति ॥

आरादग्निभ्यो वाचं विसृजते। ९।

आरात् दूरात् अच्छदिर्दर्श इति यावत्। तथोत्तरत्र व्यक्तं भविष्यति ॥

इति चतुर्विंशी कण्डिका।

प्रवसन्काले विहाराभिमुखो ऽग्न्युपस्थानं जपति।१।

प्रवसन्नग्निहोत्रकाले यत्र विहारस्तां दिशमभिवीक्षमाणः सर्वानग्न्युपस्थानाधिकारविहितान्मन्त्राञ्जपतीत्यर्थः॥ तथा चाग्न्युपस्थानान्ते भारद्वाजः एवं विहितमेवास्य प्रवसतो ऽप्यग्न्युपस्थानं भवत्येतावन्नाना यानि संस्पृश्य कर्माण्यध्वर्युस्तानि कुर्याद्यजमानः काले तां दिशमभिमुखो मन्त्राञ्जपेदिति ॥

इहैव सन्तत्र सतो वो अग्नयः प्राणेन वाचा मनसा बिभर्मि। तिरो मा सन्तमायुर्मा प्रहासीज्ज्योतिषा वो वैश्वानरेणोपतिष्ठ इति यद्यनुपस्थाय प्रवसेदेतयैवोपतिष्ठेत। २।

अद्यैवागमिष्यामीति बुद्ध्या राजपुरुषनिर्बन्धादिना यदानुपस्थाय चेत्प्रवसेत्तदा तत्रस्थ एव सन्नेतयैवाग्नीनुपतिष्ठेत। एतयेत्येतदेतं मन्त्रमुक्त्वा भवयेदित्यादिवद्वैचित्र्यार्थम्। एवकारः सर्वेतरमन्त्रव्यावृत्त्यर्थः॥ पूर्वेण सहैकग्रन्थमेके योजयन्ति प्रवसन्काले विहारमभिमुख इहैव सन्नित्येतदग्न्युपस्थानं जपति अनुपस्थाय प्रोषितोऽप्येतयैव प्रवासोपस्थानं कुर्यादिति। बौधायनश्चाह अथेदं परोक्षोपस्थानं भवतीहैव सन्नित्यादि॥

समिधः कृत्वा प्रत्येति। ३।

प्रत्यागमनकाले समिधः पाणौ कृत्वा प्रत्येति॥

यथा ह वा इतं पितरं प्रोषिवांसं पुत्राः प्रत्याधावन्त्येवं ह वा एतमग्नयः प्रत्याधावन्ति। स शकलान्दारूणि वाहरन्नेति यथैव तत्पुत्रेभ्य आहरन्नेति। तादृक्तदिति विज्ञायते। ४।

प्रोषिवांसं प्रोषितवन्तम्। इतं पुनरागतम्। स यजमानः। शकलान् भिन्नानि काष्ठानि। दारूणि तान्येवाभिन्नानि। यथैव तत्पुत्रेभ्य आहरन् यथा तत्र पिता पुत्रेभ्यः फलान्याहरन्नित्यर्थः। अर्थवादप्रदर्शनमादरार्थम्॥

आराद्ग्निभ्यो वाचं यच्छति। ५।

पूर्ववद्व्याख्या॥

यद्येनं राजा पिताचार्यो वान्तरेणाग्नीन्स्याच्छदिर्दर्शे नैनमाद्रियेत। ६।

यावति देशे ऽभ्यगारस्य छर्दिर्दृश्येत तत्रैतमग्नींस्त्वान्तरा यद्यप्यत्यन्तं पूज्या राजादयः संनिहिताः स्युस्तानपि न संभावयितुमाद्रियेत किं पुनरन्यान्। एवमत्र छर्दिर्दर्शे वाग्यमननियमाद्गमनदशायां वाग्विसर्गो ऽप्यच्छर्दिर्दर्श इत्यनुसंधातव्यम् ॥

।वेश्वदत्नीमाभरन्तो ऽनातुरेण मनसा। अग्ने मा ते प्रतिवेशा रिषाम ॥ नमस्ते अस्तु मीढुषे नमस्त उपसद्वने। अग्ने शुम्भस्व तन्वः सं मा रय्या सृजेत्यभ्यैति। ७।

अभ्यागच्छत्यभ्यगारम् ॥

अग्नीन्समाधेहीति। ८।

संप्रेष्यतीति शेषः ॥

ज्वलत उपतिष्ठते। ९।

गतः ॥

पशून्नः शंस्याजूगुपस्तान्नः पुनर्देहीत्याहवनीयमभिप्राण्याग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रमपानाः। त्वं साहस्रस्य राय ईशिषे सहस्रधारस्य पयसः। तस्य नो रास्व तस्य ते भक्षीय तस्य ते वयं भूयिष्ठभाजो भूयास्मेत्याहवनीयम्। १०।

अभिप्राणनमुपर्युच्छ्वासः। उपतिष्ठत इत्यनुषङ्गः ॥

इति पञ्चविंशी कण्डिका।

प्रजां नो नर्याजूगुपस्तां नः पुनर्देहीति गार्हपत्यमभिप्राण्याग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासं सुगृहपातें-र्य. त्वं गृहपतिना भूयाः। शतं हिमा द्वा यू राधांसीत्संपृञ्चानावसंपृञ्चानौ तन्व इति गार्हपत्यम् । १ ।

गतः ॥

अन्नं नो बुभ्न्याजूगुपस्तन्नः पुनर्देहीत्यन्वाहार्यपचनमभिप्राण्यान्तराग्नी तिष्ठञ्जपति यथा प्रवत्स्यदुपस्थाने ।२।

यथा प्रवत्स्यदुपस्थाने तथेमान्नो मित्रावरुणेति जपति ॥

अजूगुपतमभ्यराक्षीदिति मन्त्रं संनमति । ३ ।

तत्र तु गोपायतमभिरक्षतमिति शब्दावजूगुपतमभ्यराक्षीदिति विपरिणमयति ॥

मम नाम तव च जातवेद इति चतसृभिराहवनीयम् । ४ ।

उपतिष्ठत इति शेषः ॥

प्रजां मे नर्याजूगुपस्तां मे पुनर्देहीति गार्हपत्यमभ्यपान्यान्नं मे बुभ्न्याजूगुपस्तन्मे पुनर्देहीत्यन्वाहार्यपचनमभ्यपान्य पशून्मे शंस्याजूगुपस्तान्मे पुनर्देहीत्याहवनीयमभ्यपान्य पूर्ववद्विराट्क्रमैरुपतिष्ठते। अजूगुप इति मन्त्रं संनमति । ५ ।

अध्यपाननमग्नेरुपरि निश्वासः। विराट्क्रमेषु गोपायेत्यस्य अजूगुप इति मन्त्रसंनामः॥

अग्न्युपस्थानव च समिधो दिशां चोपस्थानम्। ६।

अत्रास्मिन्काले अग्न्युपस्थानवदिन्धानास्त्वेत्यादिभिः समिध आदध्यात्। प्राची दिगित्यादिभिर्दिशश्चोपतिष्ठते॥

नवमीं चेदतिप्रवसेन्मित्रो जनान्यातयति प्रजानन्निति मैत्र्योपस्थाय मनो ज्योतिर्जुषतामित्याहुतिं जुहुयात्। ७।

अध्वर्युरिति शेषः जुहोतिचोदनत्वात् तदङ्गत्वाच्चोपस्थानस्य। तथा मनो ज्योतिर्जुषतामित्यध्वर्युराहुतिं जुहोतीत्येव सत्याषाढः। भारद्वाजस्त्वाह प्रोषित आहुतिं जुहोतीति। तथा पवित्रेष्टिं विधायाह सैषा संवत्सरमतिप्रवसत इति॥

समिध आहुतिमुपस्थानमित्येवमनुपूर्वाण्येके समामनन्ति। ८।

समिदाधानदिगुपस्थानयोर्मध्ये मनस्वत्याहुतिरिति शेषः। समानमन्यत्॥

इति षड्विंशी कण्डिका।

तदाहुर्नाग्निरुपस्थेयः कः श्रेयांसं विषुमं बोधयिष्यतीति। अभयंकराभयं मे कुरु स्वस्ति मे ऽस्त्वभयं मे

अस्त्वित्येव ब्रूयात्। प्रवत्स्यदुपस्थानमागतोपस्थानं चाधिकृत्य वाजसनेयिनः समामनन्ति। १।

तत्राहुर्ब्रह्मवादिनः प्रवत्स्यता चागतेन च नैवमग्निसमाधानादिना विधिनाग्निरुपस्थेयः। को हि श्रेयांसं सुप्तं मध्ये बोधयितुमर्हतीति। तस्मादप्रादुष्कृतमेवाग्निं प्रत्यभयंकराभयमित्येतं मन्त्रमेव ब्रूयादित्यध्याहारः। प्रवत्स्यदागतोपस्थाने उभे अप्यधिकृत्य वाजसनेयिनः समामनन्तीत्यर्थः॥ तथा च सत्याषाढः कः श्रेयांसं विषुप्तं बोधयिष्यतीति। प्रादुष्कृतानामेवोपस्थानं स्यादभयंकरेत्यादि। स त्वागतोपस्थाने संनामं च दर्शितवान् यथा अभयंकराभयं मे कार्षीरिति॥ तत्र चोपस्थानमधिकृत्येति वचनादुपस्थानादन्ये गमनप्रत्यागमनधर्मा वाग्यताभिप्रव्रजनसमिदाहरणादयस्तत्रतत्र भवन्त्येव॥ नवरात्रादिप्रवासे तु मनस्वत्याहुतिरागामिनी विहरणकाले भवति प्रादुष्करणप्रतिषेधात्॥

नमो वो ऽस्तु प्रवत्स्यामि नमो वो ऽस्तु प्रावात्स्यमिति बह्वृचाः। २।

बह्वृचास्तु द्वयोः प्रवत्स्यदागतोपस्थानयोर्द्वावेतौ मन्त्रौ समामनन्ति। समानमितरत्पूर्वेण। त्रिष्वपि चैतेषु कल्पेषु प्रवत्स्यदागतोपस्थानयोः सहशिष्टत्वाद्य एव कल्पः प्रवत्स्यदाश्रितः स एवागतेनाप्याश्रयणीय इत्यनुसंधातव्यम्॥

गृहा मा बिभीत मा वेपिध्वमूर्जं बिभ्रत एमसि। ऊर्जं बिभ्रद्वः सुवनिः सुमेधा गृहानैमि मनसा मोद

मानः॥ [illegible]येति प्रवसन्त्येषु सौमनसो बहुः। गृहान् पह्वयामह ते नो जानन्तु जानतः॥ उपहूता भूरिधनाः सखायः स्वादुसंमुदः। अरिष्टाः सर्वपूरुषा गृहा नः सन्तु सर्वदा॥ उपहूता इह गाव उपहूता अजावयः। अथो अन्नस्य कीलाल उपहूतो गृहेषु न इति गृहानभ्येति। ३।

अभ्यगाराद्गृह[illegible]ति यत्र पुत्रदाराः प्रवसन्ति॥

क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोरिति प्रविशति। ४।

गतः॥

ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानागां मनसा मोदमानः। इरां वहन्तो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशामीति प्रविश्य जपति। संविश्य वा। ५।

प्रविष्टमात्रे जपति गृहानागामिति लिङ्गात्। संविशन् निषीदन्वा सुमनाः संविशामीति लिङ्गादिति भावः। सत्याषाढस्त्वाह न तद्हरागतः कलहं करोतीति॥ एवं केवलस्य यजमानस्य प्रयाणमुक्तम्। अथ सपत्नीकस्य वक्ष्यते। पत्न्यास्तु केवलायाः प्रवासो नेष्टः पत्नीवदस्याग्निहोत्रं भवतीति वचनात् यदि यजमानः प्रवसेदित्यादिवत्प्रवासानुज्ञानुपलम्भाच्च। किमिदानीं दैवात्पत्न्याः प्रवाससंभवे लुप्यत एवाग्निहोत्रम्। क एवमाह। गुणस्तु तस्य लुप्यते कर्माङ्गत्वा-

त्पत्न्याः ॥ दर्शितं चैतदस्माभिर्दर्शपूर्णमासयोर्यां वा कश्चिदविद्यमाना-यामित्यत्र। मनुनाप्युक्तोऽयमर्थः यद्विनापि पत्न्याः कदाचिदग्नयो भवन्तीति। यथातिथिलक्षणमधिकृत्योक्तमुपस्थितं गृहे विद्याद्भार्या यत्राग्नयो ऽपि चेति ॥ यदा तु विनाग्निभिरुभौ प्रवसतः पत्नी यजमानश्च तदाग्निहोत्रलोपः पुनराधानं च स्मर्यते। यथा च छन्दोगपरिशिष्टे कात्यायनः

असमक्षं हि दंपत्योर्होतव्यं नर्त्विगादिना ।
द्वयोरप्यसमक्षं हि हुतमप्यहुतं भवेदिति ॥

तथा　विहायाग्निं सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यत इति च ॥

यानि क्वचित्कानिचिद्गृन्थर्ववाक्यानि पठ्यन्ते पत्न्याः प्रवासे नदीतरणे वा पुनराधेयं कार्यमित्येवंजातीयकानि तानि परीक्ष्यमाणानामाकाशपतितत्वादुपेक्षणीयानि ॥

इति सप्तविंशी कण्डिका ।

इति सप्तमः पटलः ॥

सगृहः प्रयास्यन्वास्तोष्पतीयं जुहोति। १ ।

सगृहः सदारः। प्रयास्यन् प्रवासं गमिष्यन् वास्तोष्पतीयं वास्तोष्पतिदेवत्यं होमं जुहोति ॥

अहुते यानेषु भण्डान्यारोपयन्ति। २ ।

भण्डानि भाण्डानि। कुटुम्बार्थेषु द्रव्येषु भाण्डशब्दः प्रसिद्धः। तान्य-

ऊन एव वास्तोष्पतीये यानेषु शकटेष्वारोपयन्ति कर्मकराः यानि नेतुमिच्छन्त इति भावः। यथाह सत्याषाढः सर्वं भाण्डं यानेष्वादधाति यान्यन्वाजिहीर्षतीति ॥

न हीनमन्वाहरेयुः। ३।

यत्तत्र हीनमकृते ऽनारोपितं तद्धोमात्परं नान्वाहरेयुः। हीयेतैव तन्न तु नीयेतेत्यर्थः ॥

यद्यनोवाह्यं स्यात्पूर्वं तं प्रवहेयुरप वोद्धरेयुः। ४।

अथ यद्यनोभिर्वाह्यं भाण्डं नेतव्यं स्यात्तमर्थं यानेष्वारोप्य पूर्वमेव होमाद्गन्तव्यं देशं प्रति पुरुषा वहेयुः अपोद्धरेयुर्वा देशान्तरं गमयित्वा तत्रावस्थापयेयुः पश्चात्प्रस्थापयितुमित्यर्थः॥ अथापरा व्याख्या। तत्रारोपितेषु मध्ये यदि पुरुषादिभिर्दुर्वहमनसैव वाह्यं भाण्डं स्यात्तमर्थं पूर्वमेव प्रवहेयुः अनसा नयेयुः अपोद्धरेयुर्वा॥ यदनोवाह्यादन्यत्पुरुषादिभिरपि शक्यनयनं तत्सर्वं पुरुषादयः सह नयेयुरिति॥

यत्र संहिता रात्रीर्वसेत्पञ्च सप्त नव दश वा तत्प्रयास्यञ्जुहुयात्। ५।

यत्र वास्तुनि वास्त्वन्तरवासेनाव्यवेताः संहिता एव पञ्च रात्रीर्वसेत्तस्माद्वास्तुनः प्रयास्यन्षष्ठीप्रभृति जुहुयात्। न ततो ऽर्वाग्वास इत्यर्थः। एवं सप्तादिरात्रिवासे ऽष्टमीप्रभृतीत्यादि द्रष्टव्यम्॥

नवरात्रवास्तौ वा पुनरेत्यैकामुषित्वा प्रयास्यञ्जुहुयात्। ६।

यस्तु क्वचिद्वास्तुनि नवरात्रमुषित्वा ततो ऽन्यत्र गच्छन्दशरात्रपर्या-श्रयणेनाकृतवास्तोष्पतीयो गत्वा पुनरपि तस्मिन्नेव नवरात्रवास्तुन्या-गत्यैकावरां रात्रिमुषित्वा ततस्तस्मात्प्रयायान्भवति सो ऽपि जुहुया-देव वास्तोष्पतीयम् । दशरात्रोषितत्वात्तत्रेति भावः । पूर्वत्र संहिता इति वचनादप्राप्तो होम इत्यारम्भः ॥ केचित्तु प्रदर्शनार्थमेतदिष्ट्वा पञ्चावरादिकल्पेष्वपि चतूरात्रादिवास्तौ पुनरेत्येत्यादि योजयन्ति । तदयुक्तं प्रदर्शनार्थत्वे प्रमाणाभावात् तथा सत्यष्टरात्रवास्तौ पुनरेत्य द्वे उषित्वेत्यादिप्रदर्शनप्रसङ्गाच्च ॥

दक्षिणो युक्तो भवति सव्यो ऽयुक्तः । अपि वाग्निष्ठस्य दक्षिणो युक्तः सव्यस्य योक्त्रं [illegible] । सर्वेषु वा युक्तेषु । ७ ।

त्रयो ऽमी होमकालविकल्पाः । यदा सर्वेषां भाण्डवाहिनामनसां दक्षिणो वाहो युक्तो भवत्ययुक्तः सव्यस्तदेत्येकः । यदाग्निष्ठस्य अग्नि-वाहिनो ऽनसो दक्षिणं युक्त्वा सव्यस्यापि योक्त्रपरिहरणमात्रं कृतं न तु योगो निर्वृत्तस्तदेति द्वितीयः । सर्वेषामनसां सर्वेषु युक्तेष्विति तृतीयः ॥

वास्तोष्पत इत्यनुद्रुत्योत्तरया गार्हपत्ये जुहोत्युल्मु-काणि संप्रक्षाप्य पृथगरणीष्वग्नीन्समारोपयते ये धार्य-न्ते । ८ ।

अथ वास्तोष्पते प्रति जानीहीत्येतामनुद्रुत्य वास्तोष्पते शग्मयेत्ये-

तया जुहोति द्वाभ्यामेकाहुतिं जुहोतीत्यर्थः॥ नात्राहवनीयः प्रणीयते ऽर्थाभावात्। ततो धार्यमाणानामग्नीनामवक्षाणान्यर्धदग्धानि काष्ठानि संप्रक्षाप्य निःशेषं दाहयित्वा तान्पृथक्पृथगरणीष्वाधानक्रमेण समारोपयते। अध्वर्युरिति शेषः जुहोतीनामाध्वर्यवलादुत्तरविधौ यजमानग्रहणात् प्राजहितं समारोप्य शालामुखीयं द्वितीयं गतश्रिय इति षष्ठीनिर्देशाच्च॥

उपर्यग्नावरणी धारयञ्जपत्ययं ते योनिर्ऋत्विय इति ।९।

प्रत्यग्न्यन्ये अरणी धारयञ्जपति॥

अपि वा यजमान एवात्मन्समारोपयते।१०।

आत्मन् आत्मनि॥

या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां योनिं जातवेदो भुव आजायमानः स क्षय एहीति हस्तं प्रताप्य मुखायाहरते।११।

तूष्णीं हस्तं प्रताप्य मन्त्रेण मुखं प्रत्याहरते यथा तद्गत ऊष्मान्तःप्रविशति आरोहात्मात्मानमिति लिङ्गात्। धार्याग्न्यनेकत्वे ऽत्रापि पूर्ववदेव क्रमः॥

वास उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्। आयुः प्रजां रयिमस्मासु धेह्यजस्रो

तौ रोहितं नो दुरोण इति लौकिके ऽग्नावुपावरोहयति। १२।

वासे रात्रिवासे। अथवा वसतिर्वासो रात्रिरिति पर्यायाः। यथोक्तमाश्वलायनेन द्वयोर्दुग्धेन वासे ऽग्निहोत्रं जुहुयादिति॥ तत्र प्रणयनकाल एवात्मसमारूढाग्नींस्तेनैव क्रमेण लौकिके ऽग्नावुपावरोहयति मुखानिलेनार्पयति। मन्त्रोच्चारणमेवोपावरोहणस्यानुष्ठानार्थं इत्यपरम्॥

अरण्योर्वोपावरोह्य मन्थेत्। १३।

अनेन मन्त्रेण तस्यतस्याग्नेररण्योरुपावरोह्य ततस्ततो मन्थेत्॥

यदरण्योः समारूढः स्यान्निर्वर्तमान एतं मन्त्रं जपेत्। १४।

यदारण्योः समारूढस्तदा मथित्वा जातमात्रे ऽग्नावुपावरोहणमन्त्रं जपेत्। समारूढवचनस्यारणीस्थाग्निप्रदर्शनार्थत्वान्निर्वर्तमानत्वविशेषाच्चारण्योरुपावरूढस्य मन्थने ऽपि भवत्येव निर्वर्तमानजपः॥

इत्यष्टाविंशी कण्डिका।

इदं श्रेयो ऽवसानं यदागां स्योने मे द्यावापृथिवी अभूताम्। अनमीवाः प्रदिशः सन्तु मह्यम्। गोमदृनवदश्ववत्पुरुषवाद्धिरण्यवत्सुवीरवत्स्वाहेत्यवसिते जुहोति। १।

अवसिते मन्त्यदेशप्राप्त्या पुनःस्वदेशप्राप्त्या वा प्रतिष्ठिते यजमाने विहृत्याहवनीयमिदं श्रेय इति जुहोति॥ अत्राध्वन्यग्निहोत्रसमासमाह भारद्वाजः तस्मादाह्यायावरधर्मेणामयाव्यार्तो ऽध्वन्यापत्सु वार्धमासमग्निहोत्रं जुहुयात् प्रतिपदि सायं चतुर्दश चतुर्गृहीतानुन्नयति एका समित्सकृद्धोमः सकृत्पाणिनिमार्जनमेवं प्रातरेतावान्विकारः शेषं प्रकृतिवदग्नीन्समारोपयते धारयते वौपवसथादौपवसथ्ये ऽहनि तु न धारयत्यूर्ध्वं द्वादशाहान्निर्मन्थ्यौपवसथादि कर्म प्रतिपद्यते यदि समारूढा भवन्तीति। तथा जननमरणयोरापत्स्वर्धमासमग्निहोत्रं जुहोतीति च॥

नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्याश्नीयात्। २।

उक्तः प्रवासः। अथाग्रयणमारभ्यते। यत्र नवसस्यानामग्रपाको देवाश्नीयते तदाग्रयणं नाम नित्यं कर्म। तेनानिष्ट्वा सर्वमेव सस्यं नाश्नीयात्। यदप्ययज्ञियं कोद्रवादि तदपि नाश्नीयादेव नवस्येति सामान्यनिर्देशात् नवानां फलानां अनिष्टे ऽपीति लिङ्गाच्च॥ आश्वलायनस्तु प्रागाग्रयणान्नवैर्हुताग्निहोत्रस्याशनमनुजानाति यदाह सस्यं नाश्नीयादग्निहोत्रमहुत्वा यदा वर्षस्य तृप्तः स्यात्तथाग्रयणेन यजेतेति॥

व्रीहीणां यवानां श्यामाकानामित्यग्रपाकस्य यजेत। ३।

यागस्तासामेवौषधीनामग्रपाकेन भवति नान्यासामित्यर्थः। अग्रे पच्यत इत्यग्रपाकः। प्रथमपक्वमन्नमिति यावत्॥

अमावास्यायां पौर्णमास्यां वा। ४।

यजेतेत्यनुषङ्गः। यदिष्ट्यादिविधिसिद्धस्यापि पर्वणो विधानमामावास्यतन्त्रत्वादाग्रयणस्यामावास्यैककालत्वभ्रमनिरासार्थम्। अमावास्यापौर्णमासीशब्दाभ्यां च प्रतिपत्पञ्चदश्योः संधिमानहोरात्र उच्यते तत्रैव तयोर्व्युत्पत्तेः॥ अतः स एव तावदिष्टीनां यागकालः। तास्तु प्रकृतिसंनिपाते तदनुरोधेन नेतव्याः यथोक्तं सत्याषाढभारद्वाजाभ्यां दर्शपूर्णमासयोर्विकृतेश्च संनिपाते तत्र दर्शपूर्णमासौ बलीयांसाविति। तत्रेयं विरोधगतिः यदा संधिमदहरुपवसथं करोति तदा विकृत्येष्ट्वा प्रकृतेरुपवासः यदा यजनीयं तदा प्रकृत्येष्ट्वा विकृत्या याग इति। सत्याषाढस्तु काम्येष्टीः प्रकृत्याह अमावास्यां पौर्णमासीं वा संस्थाप्य यजेतेति॥ ऋतुमप्याग्रयणस्योत्तरत्र विधास्यति तेन च पर्वणोः समुच्चयः॥

आमावास्यं तन्त्रम्। ५।

ऐन्द्राग्नस्य मुख्यत्वादेव सिद्धे पूर्णमासविकाराणां हविषां भूयस्त्वात्पौर्णमासतन्त्रत्वशङ्कापनयनार्थ आरम्भः। तेन च भूयस्त्वान्मुख्यत्वं बलवदिति ज्ञापितं भवति॥

सप्तदश सामिधेन्यः। ६।

गतः॥

निर्वपणकाल आग्नेयमष्टाकपालं निर्वपति पुराणानां व्रीहीणाम्। ७।

व्रीहीणां संबन्धिनं व्रीहिमयमित्यर्थः॥

यथा दान्तेनादान्तं संयुनक्ति तादृक्तदिति विज्ञायते। ८।

यथा दान्तेन बलीवर्देन सहाकृतश्रमं बलीवर्दं योजयति कर्षकः शाकटिको वा तादृगेव नवानां हविषां पुराणेन सह निर्वपणमित्यर्थः। अत एवोपपत्तिवचनाद्दर्शपूर्णमासयोरन्वायात्यमान आग्रयणे पृथगाग्नेयं नेच्छन्ति तत्र दान्तादान्तयोरसंभवात् अनाग्रयणहविष्ट्वाच्चाग्नेयस्य। तत्र च लिङ्गं आग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्य इति। भारद्वाजस्तु स्वतन्त्राग्रयणे ऽप्याह अपि वा नवान्येव निर्वपेन्नाग्नेयमिति॥

येन यज्ञेनेर्त्सेत्कुर्यादेव तत्राग्नेयमष्टाकपालमिति विज्ञायते। ९।

न केवलमाग्रयणे किं तु सर्वत्रैवेष्टिमात्रे येनार्द्धुमिच्छति तत्राग्नेयं मुख्यं समानतन्त्रं च निर्वपेदित्यर्थः॥

नवानामैन्द्राग्नं द्वादशकपालमाग्नेन्द्रं वा वैश्वदेवं पयसि चरुं सौम्यं श्यामाकं चरुं द्यावापृथिव्यमेककपालम्। १०।

श्यामाकमपि नवानामेव॥

पुरस्तात्सौम्याद्द्यावापृथिव्यमेके समामनन्ति। ११।

गतः॥

निरुप्तं हविरुपसन्नमप्रोक्षितं भवति। अथ पञ्चाज्यानीर्जुहोति शतायुधाय शतवीर्यायेति। १२।

निरुप्तं हविरित्यादि गुरुसूत्रकरणमाग्रयणं निरुप्यैता आहुतीर्जुहोतीति ब्राह्मणव्याचिख्यासयेति द्रष्टव्यम्। सूत्रं चैतद्व्याख्यातमाधाने। अग्न्यानयो भद्रान्न इत्यन्ताः ॥

पुरस्ताद्वा स्विष्टकृतः । १३ ।

नारिष्ठेभ्य उपरिष्टाज्जुहोत्यागन्तुत्वात्। आग्रयणं निरुप्येति यागानुवादो ऽयं न निर्वापमात्रस्येति भावः ॥

प्रोक्षादि कर्म प्रतिपद्यते । १४ ।

गतः ॥

एकमुलूखलं मुसलं प्रतिबीजं वा । १५ ।

अत्रोलूखलमुसलमात्रग्रहणाद्द्वयोरेवायं नानात्वविकल्पो नान्येषाम्। अतः शूर्पादीन्येकैकानि भवन्ति। सत्याषाढस्त्वाह एकमुलूखलं मुसलं शूर्पं कृष्णाजिनं चेति। प्रदर्शनार्थमेतदितरेषामित्यन्ये। भारद्वाजस्त्वाह त्रीणि शूर्पाणि प्रयुनक्ति त्रीण्युलूखलानि द्वे दृषदाविति॥ तत्र शूर्पैकत्वे प्रदेशभेदेन निर्वापोद्वापौ विवेकपरापवने तु सामर्थ्यात् पात्रान्तरे चैकैकस्य बीजस्य भवतः। तथा दृषद्यधिवापः पर्यायेण पात्रीकृष्णाजिनयोः प्रस्कन्दनं संवापस्य प्रदेशभेदेनेत्यादि द्रष्टव्यम् ॥ बीजसंस्कारेषु संभवतां तन्त्रत्वमितरेषामावृत्तिश्च यथायथमनुसंधातव्ये। तत्राह भारद्वाजः आ तन्त्रिभावादेकैकं बीजमपवर्जयेदिति ॥

सर्वेषु हविष्कृदवहननमन्त्रः । १६ ।

यदावहननार्थो हविष्कृन्मन्त्रः तदोलूखलैकत्वे च बीजेबीज आवर्तते। यदाह्वानार्थः तदाप्युलूखलैकत्व आवर्तते भिन्नकालत्वात् यथा वक्ष्यति हविष्कृदग्निगुपुरोऽनुवाक्यामनोतस्यावृत्तिर्भिन्नकालेष्विति। भिन्नकालता च तत्र कर्मणः काण्डानुसमयेनैवानुष्ठेयत्वात्। तथा च भारद्वाजः अपि वैकस्मिन्नुलूखले पूर्वापरमवहन्यात् तत्रावपनप्रभृतयो विवेचनान्ता मन्त्रा बीजंबीजमभ्यावर्तेरन्निति। यदा तूलूखलभेदस्तदा न हविष्कृदाह्वानमावर्तते कालाव्यवेतत्वात् कालाव्यवायश्च तत्र कर्मणां समानजातीयन्यायतः प्रवृत्तिसिद्धेः। तथा चैकैकस्मिन्कृष्णाजिने चीण्युलूखलान्यधिवर्तयतीति प्रकृत्य भारद्वाजः सर्वाणि हवींष्योप्य हविष्कृतमाह्वयति सर्वाण्यवहत्य दृषदुपले समाहन्त्यनुपूर्वं सर्वाणि हवींष्युद्वपति [illegible] विविनक्तीति॥

तुषोपवपनम्। १७।

तुषोपवपनमपि सर्वेषु बीजेषु भवत्युलूखलाभेदे भेदे च सर्वेषां तुषाणां प्रतिपाद्यत्वात्। तत्र सर्वे तुषाः समाहृत्यान्ततः प्रतिपादनीयाः विभुत्वात्। भारद्वाजश्चाह सर्वेषामन्ततस्तुषानुपवपतीति॥ प्रक्षालननिनयनमप्येतेनैव व्याख्यातम्॥

उत्तममोप्य वाचं विसृजते। १८।

हविष्कृदावृत्तौ तूत्तमं बीजमोप्य यो हविष्कृत्तेन वाचं विसृजते न पूर्वेणेत्यर्थः। अथ पेषणादीनामपि पूर्ववत्तन्त्रावृत्तिभ्यां प्रवृत्तिः। चरुपुरोडाशधर्माश्च यथायथं प्रत्येतव्याः॥

एषो ऽन्येषां नानाबीजानां समवेतानां कल्पः। १९।

अन्येषामप्येकस्मिंस्तन्त्रे समवेतानां नानाबीजानामेकमुलूखलं मुसल-मित्यादिरेष एव कल्पः प्रयोगः ॥

अलंकरणकाल आज्येनैककपालमभिपूरयति । २० ।

अथोद्वासनकाले पात्र्यां क्रोडं कृत्वा तत्र प्रतिष्ठापितमेककपालमलं-करणकाले ऽलंकरणमन्त्रेणाभिपूरयति । यथा स निमज्जत्याज्ये तथा क्रोडं पूरयतीत्यर्थः ॥

आविःपृष्ठं वा कृत्वासादयति । २१ ।

अथवा तं आविःपृष्ठं प्रकाशपृष्ठं कृत्वानभिपूर्य ततो हवींष्यासादयतीत्यर्थः । तथा च व्यक्तं प्रदेशान्तरे यथा आविःपृष्ठं कृत्वा व्याहृतीभिर्हवींष्यासादयेदिति ॥ अथापरा व्याख्या। उद्वासनकाले पात्रान्तर उद्वासितमेककपालमाज्येनाभिपूर्याविःपृष्ठं वा कृत्वा तेनैव पात्रेण सह साद-यति। तथा च सत्याषाढः अथान्यस्मिन्पात्र एककपालमुद्वास्येत्यादि ॥

प्रचरणकाल उद्धृत्य बर्हिषदं कृत्वा जुह्वामुपस्तीर्याधायाश्रयमन्वानीयाभिघार्योपांशु प्रचरति। २२।

प्रचरणकाले घृतादेककपालमुद्धृत्य बर्हिषि सन्नं कृत्वा ततो जुह्वामु-पस्तीर्य तत्र कृत्स्नं पुरोडाशं तूष्णीं निधाय यस्मिन्घृते आश्रयितस्त-दाश्रयमाज्यं पश्चादानीय सकृदभिघार्य उपांशु प्रचरति । द्विरभि-घारणमित्येके । तदयुक्तं आश्रयेनैव चतुरवत्तत्तासिद्धेः कृत्स्नं वैश्वानर-मवदाय द्विरभिघार्येत्यन्यत्रवचनाच्च ॥

इत्येकोनत्रिंशी कण्डिका ।

सर्वहुतमपर्यावर्तयन्नृजुं प्रतिष्ठितं न हस्तेन जुहुयात्। १।

सर्वहुतमिति विस्पष्टार्थम्। अथवा यथा अस्कन्नः सर्वो हुतो भवति तथेत्यर्थः। अपर्यावर्तयन् यथा हूयमानो हुतश्च न पर्यावर्तेत तथा स्रुक्पार्श्वेन शनैश्च्यावयेत्॥

यदि हुतः पर्यावर्तेत स्रुचोऽग्रेण कल्पयेत्। २।

कल्पयेत् यथास्थानं प्रतिष्ठापयेत्। हुत इति वचनादहुतस्य पर्यावर्तने यद्येककपालः स्कन्देत्पर्यावर्तेतेत्यनेन विधिना कल्पयेत्॥

न पाणिना। ३।

सहकार्यन्तरापेक्षायामपि न पाणिना कल्पयेत्॥

वरे दत्ते कल्पयितव्यः। ४।

कल्पयिष्यमाणे अध्वर्यवे वरो देय इत्यर्थः॥

आधायाभिघार्य पुनर्होतव्य इत्येके। ५।

अथवा नैव कल्पयितव्यः किं तदुद्धृत्य स्रुच्याधायाभिघार्य पुनराश्रावणादिविधिना होतव्यः॥

अपि वा नैककपालं कुर्वीताज्येन द्यावापृथिवी यजेत। ६।

उभयोरपि पक्षयोर्वैशेषिकमेव हुतानुमन्त्रणं न प्राकृतमिति दर्शितं याजमाने॥

ये प्राचीनमेकाष्टकाया वत्सा जायन्ते तेषां प्रथमजं ददाति । वासः श्यामाके । ७ ।

एकाष्टका वक्ष्यते या माघ्याः पौर्णमास्या इति । तस्या अनिवृत्तायाः प्रागेव ये यजमानस्य गोषु वत्सा जाताः पूर्वस्मिन्संवत्सरे तेषां प्रथमजं ददाति । वासः श्यामाके चरौ निमित्तभूते । तयोश्चाभि-मर्शनादावूहः प्रकृतावेव दर्शितः ॥

भद्रान्नः श्रेयः समनैष्ट देवा इति यजमानभागं प्राश्नाति । ८ ।

प्रत्याम्नानात्प्राकृतमन्त्रो निवर्तते ॥

सर्वेषां वा भक्षाणां मन्त्रवतां प्रत्याम्नायः स्यात् । ९ ।

न केवलं यजमानभागमात्रस्यैव किं तु ये यजमानस्यर्त्विजां वा मन्त्रवन्तो भक्षा इडाप्राशित्रादिविषयास्तेषां सर्वेषामपि मन्त्रस्यायं प्रत्याम्नायः स्यात् ॥

अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिरिति श्यामाकानाम् । १० ।

श्यामाकानां यजमानभागं पृथगनेन मन्त्रेण प्राश्नाति । सर्वेषां वेत्यादि पूर्ववत् ॥

सिद्धमिष्टिः संतिष्ठते । ११ ।

गतः ॥

अपि वामावास्यायां पौर्णमास्यां वाग्रयणेष्टिमन्वायातयेत्।१२।

अथापत्स्वनुग्रहार्थमाग्रयणस्यानुकल्पा उपदिश्यन्ते। तेषामुत्तरोत्तरकल्पस्यानुकल्पत्वं आपत्तारतम्यानुसारित्वं च बोद्धव्यम्॥ तत्रानापद्यपि क्वचित्क्वचिद्विषयसामर्थ्याद्व्यवतिष्ठते तंतं विषयविशेषं तत्रतत्र कल्पे प्रदर्शयिष्यामः। तत्र यः कदाचिदसंपदा पृथगाग्रयणेष्टिं निर्वप्तुं न शक्नुयात् स तां दर्शपूर्णमासयोरन्यतरत्रान्वायातयेत्। तदेकतन्त्राण्याग्रयणहवींष्यनुनिर्वपेदित्यर्थः। तत्र चाज्यान्यादि वैशेषिकमप्यविरोधात्कार्यम्। पुराणाग्नेयं तु नेच्छन्ति तच्च दर्शितमेव प्राक्॥ दक्षिणास्तु समुच्चीयन्ते वासः श्यामाके इति लिङ्गात्। भक्षणे तु नवस्य पृथक्कृतस्य भक्षणं मन्त्रभेदात्॥

अपि वामावास्यां पौर्णमासीं वा नवैर्यजेत।१३।

पूर्वकल्पस्याप्यशक्तौ दर्शपूर्णमासयोरन्यतरमेव नवैर्यजेत। तत्र तु सर्वस्यापि वैशेषिकस्य निवृत्तिः॥ अथ यत्राक्रिया दर्शपूर्णमासव्यतिरिक्तेष्टीनां यथा ताभ्यां संवत्सरमिष्ट्वा तत ऊर्ध्वमन्यानि कर्माणि कुरुत इति तत्रायमेव पक्षो व्यवतिष्ठते सामर्थ्यात्॥

अपि वाग्निहोत्रीं व्रीहिस्तम्बं यवस्तम्बं वा ग्रासयित्वा तस्याः पयसा सायंप्रातर्जुहुयात्।१४।

व्रीह्याग्रयणकाले सव्रीहिकं व्रीहिस्तम्बं यवाग्रयणकाले यवस्तम्बं च प्रातरेव गां ग्रासयित्वा भक्षणप्रपीनायास्तस्याः पयसा सायं जुहुयादपरेद्युः प्रातश्च। तत्र व्रीहियवनियमाच्छ्यामाकानां निवृत्तिः॥

अथ यदा दर्शपूर्णमासयोरप्यक्रिया यथा संवत्सरमग्निहोत्रं हुत्वाथ दर्शपूर्णमासावारभत इति तदायं विधिरुत्तरो वा सामर्थ्यात्॥

अपि वा नवानां यवाग्वा सायंप्रातर्जुहुयात्। १५।

पूर्वेणायं पक्षो व्याख्यातः तुल्यविकल्पश्च सर्वत्र॥

अपि वा नवानां गार्हपत्ये स्थालीपाकं श्रपयित्वाहवनीये जुहुयादाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थाभ्यः। १६।

स्विष्टकृच्चतुर्थाभ्य इति वचनाच्छ्यामाकदेवतायाः सोमस्य निवृत्तिः। स्थालीपाक इति वचनाच्च पार्वणप्रकृतिको यजमानकर्तृकश्च। अथ यदा संवत्सरे पवमानहविषामुत्कर्षस्तदायमेव पक्षः सामर्थ्यात्॥

अपि वा नवानां चतुःशरावमोदनं पक्त्वा चतुरो ब्राह्मणान्भोजयेत्। १७।

पुरुषाशनपर्याप्तग्राहिणा महता शरावेण चतुर्वारं निरुप्तमोदनं लौकिकेऽग्नौ पक्त्वा चतसृणामासां देवतानामर्थे चतुरो ब्राह्मणान्भोजयेत्। अथ यदोत्सृष्टाग्निर्यजमानस्तदायमेव पक्षः सामर्थ्यात्॥

एवं यवैर्यजेत। १८।

वसन्ते यवानामग्रपाकेनाप्येवं व्रीह्याग्रयणस्य सानुकल्पस्यावृता यजेत॥ तत्र त्वाह भारद्वाजः न यवानामाग्रयणं विद्यत इत्यौडुलोमिरिति। तथा अपि वाक्रिया यवेष्वित्याश्वलायनः॥

तच्चाग्नेयश्यामाकौ न भवतः। १९।

तत्र यवाग्रयणे पुराणाग्नेयश्यामाकचरू न भवतः ॥

य ऊर्ध्वमेकाष्टकाया वत्सा जायन्ते तेषां प्रथमजं ददाति ॥ एतमु त्यं मधुना संयुतं यवं सरस्वत्या अधि मनावचर्कृषुः। इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति यजमानभागं प्राश्नाति॥ सर्वेषां वा भक्षाणां मन्त्रवतां प्रत्याम्नायः स्यात्। २०।

पूर्ववद्व्याख्या ॥

सिद्धमिष्टिः संतिष्ठते। २१।

गतः ॥

इति त्रिंशी कण्डिका।

यदि नानातन्त्रां श्यामाकेष्टिं कुर्वीत श्यामाकानुद्धर्तवा इति संप्रेष्यति। १।

यो व्रीह्याग्रयणे श्यामाकस्तरुक्तः तं यदि पृथक्तन्त्रं कुर्वीत तदा वर्षासु श्यामाकसस्ये पक्के सति श्यामाकानुद्धर्तवै उद्धार्याहरतेति कर्मकरान्यजमानः संप्रेष्यति। श्यामाकसस्य इत्यपि संप्रैषावयव इति न भ्रमितव्यं विपर्ययस्यैवोत्तरत्रव्यक्तत्वात् यथा वेणुयवेषु पक्केषु वेणुयवानुद्धर्तवा इति संप्रेष्यतीति ॥

तस्याः सप्तदश सामिधेन्यः। २।

सामदम्यवचनमज्यान्यादेः सर्वस्यापि विशेषस्य प्रदर्शनार्थम्। तच्च त्वस्याः पौर्णमास्यं अग्नीषोमीयविकारत्वात् ॥

सद्वन्तावाज्यभागौ। विराजौ संयाज्ये। ३।

सद्वन्तौ अस्तिधातुमन्तौ ॥

त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः। त्वया यज्ञं वितन्वते। सोम यास्ते मयोभुव इति सद्वन्तौ। प्रेद्धो अग्न इमो अग्न इति विराजौ। ४।

गतः ॥

वासो दक्षिणा दधिमन्थो मधुमन्थो मधुपर्को मधुग्लुन्थो बभ्रुर्वा पिङ्गलः। ५।

वाससः पुनरुपादानमुत्तरैर्विकल्पार्थम्। सर्पिरादिसंयुक्ताः सक्तवो मन्थः। स दध्ना संयुक्तो दधिमन्थः मधुना मधुमन्थः। मधुपर्कं गृह्ये व्याख्यास्यति। अनिश्चोतितमधुर्मधुकोशो मधुग्लुन्थः। मधुमिश्रं गुडमित्यन्ये। बभ्रुः कपिलः। पिङ्गलः पिङ्गाक्षः। एवं द्विरूपो गौर्वेत्यर्थः ॥

सिद्धमिष्टिः संतिष्ठते। ६।

गतः ॥

हरितयवशाकशमीधान्यानां नवानां फलानामनिष्टेऽपि प्राशने याथाकामी। ७।

पूर्वत्रानिष्ट्वाग्रयणेनेत्यनेन प्रागाग्रयणात्सर्वस्यापि नवस्याशनं प्रतिषि-

द्भुम्। तच्च केषांचिदश्नमनेनाभ्यनुज्ञायते। हरितयवा नाम सस्य-विशेषाः तथा शाकाः शमीधान्यानि कोशीधान्यानि। तेषां जम्ब्वा-दिफलानां च नवानामनिष्टे ऽप्याग्रयणे यथाकाम्यं भक्षणे भवति॥

वेणुयवानामि।ष्टमेके समामनन्ति।८।

वेणुयवैरप्याग्रयणं कैश्चिद्विधीयते॥

वेणुयवे_ऽ पक्वेषु वेणुयवानुद्धरतवा इति संप्रेष्यति।९।

श्यामाकसंप्रैषेणायं व्याख्यातः॥

तस्या एतदेव तन्त्रमेषा देवता।१०।

यच्छ्यामाकेष्ट्यामुक्तं सप्तदशसामिधेन्यादि तदेवास्यास्तन्त्रं देवतापि। तत्रत्यः सोम एवेत्यर्थः॥

आग्नेयी मैत्रावरुणी प्राजापत्या वा।११।

इष्टिरिति शेषः॥ अथ सर्वस्यैवाग्रयणस्य हौत्रे विकारमाह॥

स प्रत्नवदिति द्वे धाय्ये चतस्र आज्यभागयोर्दश हविषां द्वे स्विष्टकृतः।१२।

स प्रत्नवदिति पारुचुद्रस्यानुवाकस्यादितो द्वे धाय्ये भवतः। ततः परास्चतस्रो व्रीहियवाग्रयणयोराज्यभागार्था अनुवाक्यास्तास्वादितो द्वे आग्नेयस्य परे द्वे सौम्यस्य। श्यामाकेष्ट्यां तु सद्वन्तावित्युक्तं याज्यास्तु जुषाणवत्य एवं सर्वत्र। परास्तु दश प्रधानहविषां याज्यानुवाक्याः ताश्च यथालिङ्गं गृह्यन्ते न तु क्रमशः सौम्ययोः प्राथम्यात्। ततः परे द्वे संयाज्ये॥

व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेता यवेभ्यो दर्शपूर्ण-मासावेवं यवैरा व्रीहिभ्यो ऽपि वा व्रीहिभिरेवोभयत्रैते ह वै सूपचरतमा भवन्तीति बह्वृचब्राह्मणम्। १३।

दर्शपूर्णमासयोर्व्रीहीन्यवान्वेति व्रीहियवयोः सर्वकालं विकल्प उक्तः। इदानीं शाखान्तरीयो विनिवेशः पक्षे यवबाधश्च प्रदर्श्यते। व्रीह्या-ग्रयणेनेष्ट्वा व्रीहिभिरेव दर्शपूर्णमासौ यजेतायवाग्रयणात्। एवं यवाग्रयणादारभ्या व्रीह्याग्रयणाद्यवैः। अपि वा व्रीहिभिरेव यजे-तोभयोः कालयोः। यत एते सूपचरतमाः सुखेनावहन्यन्ते पिष्यन्ते च न यववत् दुःखेन तस्माद्व्रीहिभिरेव नित्यं यजेत। दर्शपूर्णमासा-विति वचनान्नाग्निहोत्रार्थेषु तण्डुलेष्वयं नियमः। दर्शपूर्णमासा-भ्यामेव तद्विकाराश्च व्याख्याताः॥

वर्षासु श्यामाकैर्यजेत शरदि व्रीहिभिर्वसन्ते यवैर्य-थर्तु वेणुयवैरिति विज्ञायत इति विज्ञायते। १४।

यदि नानातन्त्रा श्यामाकेष्टिस्तदानया वर्षासु यजेत। ततः शरदि केवलैर्व्रीहिभिः। समानतन्त्रत्वे तूभयैः शरदि। ततो वसन्ते यवैः। वेणुयवैस्तु यथर्तु यजेत। ते ह्यनियतकालनिष्पत्तयः यस्मिन्नेवर्तौ निष्पद्यन्ते तस्मिन्नेव यजेतेत्यर्थः॥

इत्येकत्रिंशी कण्डिका।

इति श्रीभट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायाम-ष्टमः पटलः।

इति षष्ठः प्रश्नः॥

ओम् ॥

सर्वांल्लोकान्पशुबन्धयाज्यभिजयति । १ ।

अथ नित्यः पशुरारभ्यते । यस्मिन्कर्मणि यज्ञार्थं पशुर्बध्यते स पशुबन्धः तेनेष्टवान् पशुबन्धयाजी सर्वांल्लोकाञ्जयति । सर्वकामो दर्शपूर्णमासाविति वदाहारपृथक्त्वाभिप्रायं सर्वाभिजयवचनम् । सर्वेष्वपि लोकेषु यंयमेव लोकं प्रयोगभेदेन कामयते तंतमेवाभिजयति न कुतश्चित्प्रतिहन्यत इत्यर्थः । नित्यस्य चायं फलविधिः दर्शपूर्णमासवदेव वेदितव्यः । फलार्थवादो वा कर्मेरश्रवणात् यथोक्तं हिरण्यकेशिना क्रतावर्थं श्रूयमाणं यजमानः कामयते यानि कामयति आवर्येदिति तथार्थवादो इतर इति च ॥

तेन यक्ष्यमाणो ऽमावास्यायां पौर्णमास्यां वा षड्ढोतारं मनसानुद्रुत्याहवनीये सग्रहं जुहोति सूर्यं ते चक्षुरिति । २ ।

अमावास्यायां पौर्णमास्यां वा तेन यक्ष्यमाण इत्यन्वयः यदीष्ट्यादिविधिना तयोरेव यागविधानात् । तेन ह्यहकालले पशोस्तुर्दश्यां हूयते षड्ढोता । तच्च प्रकृत्यविरोधगतिराश्रयण एव दर्शिता ॥ नन्वेवं यदीष्ट्यादिविधिनैव सिद्धेः किमर्थं पर्वणोर्वचनम् । परमतनिरासार्थमिति ब्रूयात् यथाह बौधायनः आमावास्येन हविषेष्ट्वा नक्षत्रे वेति ।

अथवा सांनाय्यविकारत्वात्पशोरमावास्यामेवास्य कालं मा मंस्तेत्यारम्भः। सांनाय्यविकारत्वमेव पशोः। कस्मादिति चेत्। एतदेव पृष्ठोक्तं भारद्वाजेन समानयोनित्वं पयसः पशोश्च दर्शयतीति। श्रुतिरिति शेषः। कथं दर्शयतीति चेत्। तदप्युदाहृतं यद्देवो वर्षति अथौषधयो जायन्त ओषधीर्जग्ध्वापः पीत्वा पयः संभवतीति तथा यद्देव इत्याद्यपः पीत्वेत्यन्तं पुनः पठित्वा रेतः संभवतीति च। बौधायनो ऽप्याह दधिपयआमिक्षापशवः सांनाय्यविकारा इति। तत्र कतरस्य सांनाय्यस्य पशुर्विकार इति चेत्। तदप्याह सत्याषाढः पशुः प्रातर्दोहविकारः कालसामान्यादिति। तथा पयोधर्माः पशाविति भारद्वाजः। सूत्रे चात्र लिङ्गानि भवन्ति यथा उदक् पवित्रे कुम्भ्यां दक्षिणस्यां वेदिश्रोण्यामासाद्य आज्येन पशुं यस्त आत्मा पशुषु प्रविष्ट इत्यादि। तस्मात्सिद्धं पशुः प्रातर्दोहविकार इति॥ षड्ढोतारं मनसानुद्रुत्येत्यादि व्याख्यातं तच्च षड्ढोतृहवित्वात् सूर्यं ते चक्षुरिति विशेषप्रदर्शनं तच्चोदवसाय जुहोति उपयज्य मनुष्याः प्रयान्तीति लिङ्गात्। तथोदवसाय षड्ढोतारं हुत्वेत्येव बौधायनः। तथा ग्रहकाले पशौ विशेषमाह अजस्रैरग्निभिरुदवसायेति॥

आग्नावैष्णवमेकादशकपालं निर्वपति। ३।

अथान्यमाहवनीयं प्रणीयाग्नावैष्णवं निर्वपति। तस्य चाङ्गत्वादवहिस्तन्त्रवर्तित्वाच्च नान्वाहार्यं दृश्यते॥ सत्याषाढस्त्वत्रानुग्रहमाह अपि वा चतुर्गृहीतमाज्यमाग्नावैष्णव्यर्चाहवनीये जुहोतीति। तथा पशुबन्धे ऽग्नाविष्णुभ्यामिति चतुर्गृहीतं स्यादिति भारद्वाजः॥

अग्न्यन्वाधानस्य प्रत्याम्नायो भवति ।४।

अतो ऽग्न्यन्वाधानं निवर्तते ॥

[illegible]ः संतिष्ठते । ५ ।

गतः ॥

धारयत्याहवनीयम् । ६ ।

इष्टेरपवर्गादग्नेरपवर्गो मा विज्ञायीत्यारम्भः। इदमेव धारणवचनं ज्ञापकं तन्त्रान्तरशेषभूता अपि बर्हिस्तन्त्रवर्तिन इष्टिदर्विहोमाः पृथगग्नयो भवन्तीति। दर्शितं चैतदस्माभिरन्वारम्भणीयायाम् ॥

उरु विष्णो विक्रमस्वेति स्रुवेणाहवनीये यूपाहुतिं जुहोति । ७ ।

अथ शाखामाहृत्य निधाय यूपाहुतिं जुहोति। वक्ष्यमाणनिर्मथ्यविकल्पार्थमाहवनीयग्रहणम्। यूपाहुतिसमाख्यानाद्यूपाभावे निवर्तते परिधौ पशून्नियुञ्जन्तीत्यादौ ॥

स्रुचा वा चतुर्गृहीतेन । ८ ।

स्रुचा वा जुहोति। तदा चतुर्गृहीतेन ॥

न दीक्षितस्य जुहुयात् । ९ ।

गतः ॥

वैष्णवीम्[illegible]नूच्याच्छे[illegible]ः । १० ।

तस्य तु यथैव वैष्णव्या होम उक्तः तामुक्त्वा यूपो ऽच्छेत्यः आगन्तव्यः ॥

जुहुयाद्वा। ११।

गतः॥

यूपसकाशे वाग्निं मथित्वा तस्मिञ्जुहुयात्। १२।

स्रुवेण स्रुचा वा पूर्ववत्॥

स्रुवमाज्यशेषं चाध्वर्युरादत्ते। तक्षा शस्त्रम्। १३।

शस्त्रं वाशी तत्ता हस्तेन वाश्येति लिङ्गात्। येन चान्येनार्थी भवति तदप्यन्यो हरति॥

यत्र यूपस्तद्यन्ति। १४।

यत्र यूपश्छेद्यस्तत्र व्रजन्ति ब्रह्मयजमानाध्वर्यवस्तक्षा च॥

यूप्या वृक्षाः पलाशखदिरबिल्वरौहीतकाः। १५।

यूप्याः यूपभावार्हाः। रौहीतको नाम वटावान्तरजातीयः॥

पालाशं तेजस्कामो यज्ञकामो वा। खादिरं स्वर्गकामो वीर्यकामो वा। बैल्वमन्नाद्यकामो ब्रह्मवर्चसकामो वा। रौहीतकं प्रजाकामश्चक्षुष्कामो वा। १६।

यूपं कुर्वीतेति शेषः। नित्येष्वमीष्वेवामी कामाः ततोऽन्यस्य यूपस्याभावात्॥

समे जातमशाखाजं बहुपर्णशाखमप्रतिशुष्काग्रमसुषिरमव्यावृत्तमघूर्णमृजुमूर्ध्वमूर्ध्वशकलमग्र ईषदुपावनतं प्रागुदक् प्रत्यग्वोपनतम्। १७।

समे जातं समस्थले जातम्। अशाखाजं भूमेरेव रूढम्। अव्यावृत्तं अवलिताग्रम्। अघूर्णं अघूर्णितयष्टिम्। ऋजुं अवक्रम्। ऊर्ध्वं अतिर्यङ्नतम्। ऊर्ध्वशकलं शकलैरप्यूर्ध्वैरेवोपेतम्। अग्रे किंचिदवनतं दक्षिणेतरासु दिक्षु प्रक्तं च यूपं वृश्चेत्। तथा सुषिरत्वादयो ऽपि यूपदोषाः परिहर्तव्याः ॥

यं कामयेताप्रतिष्ठितः स्यादित्युक्तम्। १८।

यं कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै वृश्चेदित्यादिब्राह्मण एवं यूपस्य गुणदोषास्तत्फलानि चोक्तानि तत्सर्वं तत्रैवानुसंधातव्यमित्यर्थः। आरोहमिति वृक्षात् न भूमेरिति आरोहः शाखाजः। आरोहमिति पांसुलस्त इति केचित्। तदयुक्तं एष वै वनस्पतीनामप्रतिष्ठित इति लिङ्गात् तथा प्रतिष्ठितं वृश्चेत्प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै स्वाद्योने रूढ इति च लिङ्गात् स्वरवशाच्च। अत एव चोक्तं सूत्रकृता समे जातमशाखाजमिति ॥

अतिक्रम्य यूप्यान्यं जोषयते तमभिमन्त्रयते। १९।

इति प्रथमा कण्डिका।

अत्यन्यानगामिति। १।

प्रथमप्राप्तांस्त्यवरान्यूप्यान्वृक्षानतिक्रम्य ततो यं जोषयते यत्र प्रीतो भवति तमभिमन्त्रयते अत्यन्यानगामिति लिङ्गादिति भावः ॥

अथैनमुपस्पृशति तं त्वा जुषे वैष्णवं देवयज्याया इति। २।

गतः ॥

देवस्त्वा सविता मध्वानक्त्विति स्रुवेण सर्वतो मूलं पर्यणक्ति। ३।

सर्वं मूलभागं परितोऽनक्ति ॥

ओषधे त्रायस्वैनमित्यूर्ध्वाग्रं दर्भमन्तर्धाय स्वधिते मैनं हिंसीरिति स्वधितिना प्रहरति। ४।

स्वधितिः क्षुरः तेन प्रहरति। तक्ष्णः शस्त्रमेवात्र स्वधितिर्विवक्षित इत्यन्ये ॥

प्रथमपरापातिनं शकलमाहरति। ५।

गतः ॥

गुल्फदघ्ने वृश्चेज्जानुदघ्नेऽनक्षसङ्गं वा। ६।

गुल्फः चरणग्रन्थिः। अनक्षसङ्गं यथा शकटस्य गच्छतोऽक्षस्थाणौ न सज्यते तथेत्यर्थः ॥

दिवमग्रेण मा लेखीरिति प्राञ्चं पातयत्युदञ्चं प्राञ्च-मुदञ्चं वा। ७।

गतः ॥

वनस्पते शतवल्शो विरोहेत्याव्रश्चने जुहोति। ८।

यतो वृक्णो यूपः तद्वृक्षमूलमाव्रश्चनम् ॥

सहस्रवल्शा वि वयं रुहेमेत्यात्मानं प्रत्यभिमृश्य यं त्वायं स्वधितिरित्यन्वग्रमङ्गांश्छिनत्ति। ९।

अन्वग्रं मूलादारभ्याग्रात्। अङ्गाः शाखाग्रन्थयः ॥

अच्छिन्नो रायः सुवीर इत्यग्रं परिवासयति। १०।

परिवासयति छिनत्ति ॥

पञ्चारत्निमिति काम्याः। ११।

पञ्चारत्निं तस्मै वृश्चेदित्यादयः काम्या यूपपरिमाणकल्पाः यथाब्राह्मणमेवानुसंधातव्या इत्यर्थः ॥

एकारत्निप्रभृत्या त्रयस्त्रिंशदरत्नेरव्यवायेनैके समामनन्ति। १२।

अव्यवायेनेति एतासां संख्यानां मध्ये न काचिदपि हेयास्ति। सर्वा एव मिथो विकल्पन्त इत्यर्थः। तत्रारत्निसंख्या यूपस्य सहोपरेणेति भारद्वाजसत्याषाढौ ॥

यावान्यजमान ऊर्ध्वबाहुस्तावान्। १३।

सहोपरेण तावान्भवति ऊर्ध्वं निखाताद्यजमानसंमितेत्यौदुम्बर्या वचनात् ॥

यावान्वा रथे तिष्ठन्। १४।

अनूर्ध्वबाहुरिति शेषः ॥

ऊर्ध्वबाहुर्वा । १५ ।

रथे तिष्ठन्नित्येव ॥

पुरुषमात्री त्वेतस्यावमा मात्रा । अथ ततो वर्षीयान् । वर्षीयानेव कार्य इत्येके । १६ ।

यूपस्यापकृष्टा मात्रा पुरुषमात्री पुरुषमात्रया संमिता । अतस्तावन्मापकृष्यते ततः परं तु यथालाभं वर्षीयानेव कार्य इत्येके शाखिनः ॥

त्र्यरत्निश्चतुररत्निर्वा पालाशो निरूढपशुबन्ध्यः स्यादन्यः सौम्यस्याध्वरस्येति वाजसनेयकम् । १७ ।

सोमाद्धविर्यः स्वतन्त्रः क्रियते स निरूढपशुबन्धः । तस्य पालाशस्त्रिचतुररत्निश्च यूपः स्यात् वृक्षान्तराणि परिमाणान्तराणि च सौमिकस्य यूपस्येति विनिवेशो वाजसनेयिनामित्यर्थः ॥

इति द्वितीया कण्डिका ।

मूलतो ऽतष्टमुपरम् । १ ।

मूलभागे यदुपरं निखातव्यो ऽंशः तदतष्टं भवति शेषस्त्वेवं तष्टव्य इत्याह ॥

अष्टाश्रिरनुपूर्वो ऽग्रतो ऽणीयान्प्रज्ञाताग्निष्ठाश्रिर्स्थूलो ऽनणुः । २ ।

अनुपूर्वः मूलादारभ्याग्रात् क्रमेण तनुरग्रतस्त्वणीयान् अणुतरः । याग्नेरार्जवेन तिष्ठति साग्निष्ठाश्रिः सा स्फुटा भवत्यन्याभ्यः ॥

अवतक्षणानां स्वरुरधिमन्थनश्च शकलः। ३।

तक्षणप्रभवाः शकला अवतक्षणास्तेषां मध्ये कश्चित्स्वरुर्भवति अन्यो ऽधिमन्थनः। यस्योपरि मथ्यते ऽग्निः सो ऽधिमन्थनः॥

अग्रात्चषालं यमाचमष्टाश्रिमध्ये संनतम्। ४।

यूपस्याग्रिमो ऽवयवश्चषालं तत्परिवासितादग्रादपच्छिद्य कार्यम्। पृथक्त्वयोद्व्यङ्गुलमिति बौधायनः। संनतं तत्कृतं निष्ठुब्धं च भवति यूपे प्रतिमोच्यमानत्वात्॥

यं कामयेतान्यो ऽस्य लोकमभ्यारोहेदिति तस्यान्यवृक्षस्य स्वरुचषाले कुर्यात्। ५।

एवं निन्दितत्वाद्वर्जनीयो ऽन्यवृक्ष इति भावः। अपि वान्यस्य तज्जातीयस्य वृक्षस्य कुर्यादिति बौधायनः॥

यावदुत्तममङ्गुलिकाण्डं तावदूर्ध्वं चषालाद्यूपस्यातिरिक्तं द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वा। ६।

अङ्गुलिकाण्डमङ्गुलिपर्व॥

रथमात्री निरूढपशुबन्धस्य वेदिः। ७।

एतदेव व्याकरोति॥

अक्षसंमिता पश्चात्तिर्यगीषया प्राची विपथयुगेन पुरस्ताद्यावता वा बाह्ये छिद्रे। ८।

पश्चात्तिर्यगक्षसंमिता। ईषासंमिता प्राची। पुरस्तात्तिरश्ची तु

विपर्ययुगेन संमिता। तस्यैव वा युगस्य बाह्ययोश्छिद्रयोर्यावदन्तरं तावता संमिता॥ अन्यादिप्रमाणानि शुल्बे वक्ष्यति अष्टाशीतिशतमीषेति॥

अरत्निभिर्वा चतुर्भिः पश्चात् षड्भिः प्राची त्रिभिः पुरस्तात्। ९।

गतः॥

तां वेदं कृत्वा दर्शपूर्णमासवत्संनमनवर्जं प्रागुत्तरात्परिग्राहात्कृत्वापरेण यूपावटदेशं संचरं शिष्ट्वा वेद्यामुत्तरवेदिं दशपदां सोमे करोति। १०।

तां एवं विमितां सतीं कृत्वा कथं नाम कृत्वा वेदं कृत्वा दर्शपूर्णमासवदोत्तरपरिग्राहात्कृत्वा तस्यामेव वेद्यामुत्तरवेदिं करोति। कुत्र प्रदेशे। पश्चाद्यूपावटदेशस्य संचरं शिष्ट्वानन्तरदेशे तां सोमे दशपदां करोति सर्वतश्च दशपदां अविशेषात्। तथा सर्वतो दशपदामित्येव भारद्वाजः। तथा च चैत्रतः शतपदेत्युक्तं भवति। सौमिक्यास्त्विह वचनं प्रासङ्गिकं पाशुबन्धिक्याश्च प्रमाणमनन्तरमेव प्रवक्ष्यते॥

अंहीयसीं पुरस्तादित्येके। ११।

अंहीयसीति तनीयसी पुरस्तात् अर्थादेव प्रथीयसी पश्चात् न तु सर्वतो दशपदा शतपदैव तु चैत्रतः॥

तां युगेन यजमानस्य वा पदैर्विमाय शम्यया परिमिमीते। १२।

युगेन वा विमायेति वचनाद्युगमात्रीत्यपि सिद्धं भवति। यजमानग्रहणाच्च यजमानस्याध्वर्योर्वेति विकल्पो निवृत्तः। तथा युगमात्रीं यजमानदशपदां सोम इति कात्यायनः॥ तत्र यदा पदमाना वेदिस्तदा युगमात्रैवेष्यते न दशपदा अन्यथा सदोहविर्धानादिप्रसङ्गात्। शम्यामानं तूत्तरवेदिसंस्कारार्थमुभयत्र समुच्चीयते॥

शम्यामात्री निरूढपशुबन्धस्योत्तरवेदिः। १३।

शम्याप्रमाणं तु दर्शितमेव दर्शपूर्णमासयोः॥

शम्यां पुरस्तादुदगग्रां निधाय स्फ्येनोदीचीनभ्यन्तरमुपलिखति वित्तायनी मे ऽसीति। एवं दक्षिणतः प्राचीं तिक्तायनी मे ऽसीति। पश्चादुदीचीमवतान्मा नाथितमिति। उत्तरतः प्राचीमवतान्मा व्यथितमिति। १४।

पुरस्तात्सौमिक्याः पाशुक्याश्चोत्तरवेदेः पूर्वसीम्नीत्यर्थः। उदगग्रामुदीचीनकुम्बां तथा पेषणे व्यक्तत्वात्। अभ्यन्तरं शम्यायाः अन्तरतः। उपलिखति तस्याः समीपे लिखति॥

इति तृतीया कण्डिका।

इति प्रथमः पटलः॥

उत्तरस्माद्वेद्यंसादुदक्प्रक्रमे चात्वालः। १।

उत्तरवेदिपांसवो ऽवटश्चात्वालः॥

त‍्तरवदिवत्तू ग्नीं शम्यया परिमित्य देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादाय परिलिखितं रक्षः परिलिखिता अरातय इति त्रिः प्रदक्षिणं परिलिख्य तूष्णीं चतुरस्रं त्रिवितस्तं वा खात्वोत्तरवेद्यर्थान्पांसून्हरति विदेरिति । २ ।

चात्वालप्रमाणमुत्तरवेद्या व्याख्यातम् । अभ्रिः खनित्रम् । प्रदक्षिणवचनमविस्मरणार्थम् । वितस्तिः कनिष्ठाङ्गुष्ठयोरायामः ॥

सिंहीरसीत्युत्तरवेद्यां निवपति । ३ ।

गतः ॥

एतेनैव यो द्वितीयस्यामिति द्वितीयं यस्तृतीयस्यामिति तृतीयम् । ४ ।

एतेनैव विदेरिति मन्त्रेण यो द्वितीयस्यामित्येवं विकृतेन द्वितीयं हरति । एवं तृतीयम् ॥

तूष्णीं चतुर्थं हृत्वोरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति प्रथयित्वा ध्रुवासीति शम्यया संहत्य देवेभ्यः कल्पस्वेत्यभिमन्त्र्य देवेभ्यः शुन्धस्वेत्यद्भिरवोक्ष्य देवेभ्यः शुम्भस्वेति सिकताभिरवकीर्य प्रोक्षणीशेषमुत्तरत उत्तरवेद्यै निनीयापो रिप्रं निर्वहतेति स्फ्येनोदीचीमेकस्फ्यां निःसार्य विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपताव-

विश्रुतम्। वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विराजतीत्युत्तरवेद्या अन्तान्कल्पयति । ५ ।

चतुर्थे सर्वान्पांसून्हरति तैरेवोत्तरवेदिसमुच्छ्रयो व्याख्यातः । संहत्य लोष्टानि विमृद्य । प्रोक्षणीशेषं अवोक्षणशेषम् । उत्तरवेद्या इति षष्ठ्यर्थे चतुर्थी । स्फ्यहस्तैकरेखैकस्फ्या तां निःसार्य तयोदकं गमयित्वा । अन्तान्कल्पयति मृत्तोयैर्दृढयति यथा न विशीर्येरन् ॥

संमृशतीतरे । ६ ।

तूष्णीं वा कल्पयित्वा मन्त्रेण संमृशति ॥

इति चतुर्थी कण्डिका ।

अथास्या मध्ये प्रादेशमात्रीं गोपदमात्रीमश्वशफमात्रीं वोत्तरनाभिं चतुःस्रक्तिं कृत्वा चतुःशिखण्डे युवती कनीने घृतप्रतीके भुवनस्य मध्ये। तयोर्देवा अधिसंवसन्त उत्तमे नाक इह मादयन्तामित्युभे अभिमन्त्र्येन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वित्येतैर्यथालिङ्गमुत्तरवेदिं प्रोक्षति । १ ।

नाभिरिव मध्ये भवति । उत्तरनाभिं चतुःस्रक्तिं चतुष्कोणाम् । यथालिङ्गं यस्मिन्मन्त्रे यस्या दिशो लिङ्गं तेन तं दिग्भागं प्रोक्षति ॥

त्वष्टा त्वा रूपैरुपरिष्टात्पात्विति मध्यम् । २ ।

अव्यक्तलिङ्गत्वादारम्भः ॥

प्रोक्षणीशेषं दक्षिणत उत्तरवेद्यै निनयेच्छुचा त्वार्प-यामीति द्वेष्यं मनसा ध्यायन् । ३ ।

शुचा त्वार्पयामीति द्वेष्यध्यानप्रकारः । निनयनं तु पूर्ववत्तूष्णीमेव लिङ्गानुगुण्यात् ॥

पूर्ववदेकस्फ्यां दक्षिणतो निःसार्य जुह्वां पञ्चगृहीतं गृहीत्वा सर्वत्र हिरण्यं प्रास्यन्नक्ष्णयोत्तरवेदिमुत्तर-नाभिं वा व्याघारयति । ४ ।

यथाज्यं हिरण्ये पतेत्तथा तदग्रतो नयन्कोणदिशः प्रति दीर्घां धारां करोति ॥

दक्षिणमंसमुत्तरां श्रोणिं दक्षिणामुत्तरमंसं मध्य-मिति सिंहीरसीत्येतैः प्रतिमन्त्रम् । ५ ।

एवंक्रमकान्दक्षिणांसादीन् सिंहीरसीत्येतैः प्रतिमन्त्रं व्याघारयति ॥

भूतेभ्यस्त्वेति स्रुचमुद्गृह्य पौतुद्रवैः परिधिभिरुत्तरवेदिं परिदधाति विश्वायुरसीति मध्यमं ध्रुवक्षिदसीति दक्षिणमच्युतक्षिदसीत्युत्तरम् । ६ ।

पूतुद्रुर्देवदारुः ॥

परिधिसंधिना सर्वाहुतीर्जुहोति । ७ ।

परिधिसंधिना प्रपद्य जुहोति । केन । दक्षिणेन दक्षिणा आहुतीरु-त्तरेणोत्तरा इति विवेकः ॥

इति पञ्चमी कण्डिका ।

अग्नेर्भस्मासीत्युत्तरवेद्यां संभारान्निवपति गुल्गुलु सुगन्धितेजनं श्वेतामूर्णास्तुकां पेत्वस्यान्तराशृङ्गीयां लूनस्यालूनपूर्वं च वा। १।

सर्वान्संभारानेकीकृत्य निवपति। पुरीषमसीत्यन्तो मन्त्रः अग्नेः पुरीषमसीत्याहाग्नेर्ह्येतत्पुरीषं यत्संभारा इति लिङ्गात् अग्नेर्भस्मासीति सिकता निवपतीत्यत्रापि तथादर्शनाच्च। सुगन्धितेजनस्तृणविशेषः यः सुगन्धितेजनस्य जाठराग्नेर्भवति। ऊर्णास्तुका लोमकलापः सा तु पेत्वस्य शृङ्गान्तरोद्भवा भवति। पेत्वो वृष्णिः। वृष्णेः स्तुका इत्येव कात्यायनः। लूनस्य लूनलोमस्य तदभावे त्वलूनस्य॥

व्याघारणप्रभृति संभारनिवपनान्तमुत्तरवेद्याः पर्यग्नौ धार्यमाण एके समामनन्ति। २।

औत्तरवेदिको ऽग्निरुपर्युत्तरवेदेरन्येन धार्यते। ततो जुह्वां पञ्चगृहीतमित्याद्यध्वर्युः॥

प्रोक्षान्तां कृत्वोदुम्बरशाखाभिः प्लक्षशाखाभिर्वा प्रच्छाद्य वसति यद्यसद्यस्कालः पशुर्भवति। ३।

यद्यसद्यस्काल इत्यनुवादः। द्व्यहकालस्यापि विधिरनुमीयते। बौधायनस्त्वाह इष्टिपशुबन्धाः सोपवसथाः सद्योयज्ञा वेति॥ तदा तु दक्षिणतो निःसारणान्तामुत्तरवेदिं कृत्वा प्रच्छाद्य विरमति। व्याघारणान्युत्तरेद्युरेव क्रियन्ते॥

आहवनीये प्र[illegible]यनीयमिध्ममादीप्य सिकताभिरुप-[illegible] प्रणीयमानायानुब्रूहीति संप्रेष्यति। प्रणीय-मानायानुब्रूहीति वा। ४।

प्रणयनीयमिध्ममादीप्य प्रणयनार्थमिन्धनं ज्वलयित्वा सिकताभिरु-पयम्येति यस्मिन्पात्रे ऽग्निरुद्ध्रियते तस्याधस्तादुपयमनानुगुणाः सिकताः कल्पयित्वेत्यर्थः दीप्तस्यानुद्यतस्योपयमनासंभवादुत्तरत्रोद्य-मनवचनाच्च। व्यक्तोक्तं चैतदग्न्याधेये यथा प्रणयनीयमिध्ममादी-पयति सिकतास्वोपयमनीरुपकल्पयते तमुद्यच्छतीति॥

उद्यम्याग्निमाहवनीय उद्यतहोमं जुहोति यत्ते पावक चकृमा कच्चिदागः पूर्वो यत्सन्नपरो भवासि। घृतेन त्वं तन्वं वर्धयस्व मा मा हिंसीरधिगतं पुरस्ता-त्स्वाहेति। ५।

उद्यम्याग्निं आदीप्तमिध्ममाहवनीयादुद्धृत्येत्यर्थः। केचित्तु अनन्तरो-क्तेनादीपनेनोद्धरणं लक्षयित्वात्रोद्यम्येति तस्यैवाग्नेरुत्क्षेपणमात्रमुक्त-मित्याचक्षते। तदयुक्तं मुख्यार्थोपपत्तौ जघन्यवृत्त्याश्रयणायोगात् उद्यतहोमसमाख्यानाच्च। तस्य ह्याहवनीयादौत्तरवेदिकोद्धरणं नि-मित्तं न तूत्क्षेपणं पूर्वो यत्सन्नपरो भवासीति लिङ्गात्। तस्माद्य-थोक्त एव सूत्रार्थः॥

प्रथमायां [illegible]मुपयमनीभिरुपयम्य हरति। ६।

उपयमनीभिः सिकताभिरुद्यतमग्निम्॥

ऊर्णावन्तं प्रथमः सीद ये निमिते होतुरभिन्नायाग्ने बाधस्व विमृधो नुदस्वापामीवा अप रक्षांसि सेध । अस्मात्समुद्राद्बृहतो दिवो नो ऽपां भूमानमुप नः सृजेह ॥ यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आ त्वा वसूनि पुरुधा विशन्तु । दीर्घमायुर्यजमानाय कृण्वन्नथामृतेन जरितारमङ्ग्धीह यज्ञः प्रत्यष्ठादिति संभारेषु प्रतिष्ठाप्य । ७ ।

इति षष्ठी कण्डिका ।

अग्नेः पुरीषवानसीत्युपयमनीर्न्युप्य मनुष्वत्त्वा निधीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान्देवायते यजेत्युपसमिध्य द्वादशगृहीतेन स्रुचं पूरयित्वा सप्त ते अग्ने समिधः सप्त जिह्वा इति सप्तवत्या पूर्णाहुतिं जुहोति । १ ।

गतः ॥

अग्निर्वायुरादित्यो विष्णुर्यज्ञं नयतु प्रजानन्नेनं यज्ञहनो विदन्देवेभ्यो यज्ञं प्रब्रूतात्प्र यज्ञपतिं तिर स्वाहेति चतस्रो ऽतिमुक्तीर्जुहोति । २ ।

यज्ञं नयत्वित्यादेरनुषङ्गः सर्वत्र ॥

एष पशुबन्धस्याहवनीयो यतः प्रणयति स गार्ह-पत्यः । ३ ।

अतः परमस्मिन्नेवाहवनीयकर्माणि क्रियन्ते । तद्योनौ त्वाहवनीये गार्हपत्यकर्माणि ॥

प्रणीते चेदग्निहोत्रकाल एतस्मिन्नेवाग्निहोत्रं जुहु-यात् । ४ ।

एष पशुबन्धस्याहवनीय इति वचनान्मा निवृत्तमस्मिन्नग्निहोत्रमि-त्यारम्भः नौत्तरवेदिके ऽग्निहोत्रं विद्यत इति कल्पान्तरकारमतनि-रासार्थश्च ॥ प्रणीते सत्यौत्तरवेदिके यद्यग्निहोत्रं प्राप्तकालं स्यात्तदे-तस्मिन्नौत्तरवेदिक एव जुहुयात् । अपयेच्छालामुखीये यतः प्रणय-ति स गार्हपत्य इत्यत्रात एव न्यायात् ॥

एवमन्यत्र विप्रक्रान्ते तन्त्रे । ५ ।

एवमन्यस्मिन्नपीष्ट्यादितन्त्रे विप्रक्रान्ते प्रक्रम्यापरिसमाप्ते प्राप्तकाल-मग्निहोत्रं तस्यतस्याहवनीय एव जुहुयात् । भारद्वाजस्त्वत्राह विप्र-क्रान्ते कर्मण्यग्निहोत्रकाल आगच्छेत्संस्थाप्य जुहुयादित्याश्मरथ्यः काल एव जुहुयादित्यालेखन इति ॥

इध्माबर्हिराहरति । ६ ।

अथ बर्हिराहरणादि प्रतिपद्यते समानमा कुम्भ्यालेपनात् । त-वेदो वेदिश्च प्रागेव कृतौ । शाखापवित्रानुमन्त्रणे तु पशुं हव्यमि-त्यूहः तथास्येमौ पर्णं चेति । निधानं प्रकृतावेव व्याख्यातम् ॥

त्रयोविंशतिर्दारुरश्च आश्ववालः प्रस्तर ऐक्षवी विधृती कार्ष्मर्यमयाः परिधयः। ७।

आश्ववालः काशमयः। ऐक्षवी इक्षुशलाके इति भारद्वाजः॥

इति सप्तमी कण्डिका।

इति द्वितीयः पटलः॥

अग्नीन्परिस्तीर्य पाणिप्रक्षालनादि कर्म प्रतिपद्यते। १।

गतः॥

यथार्थं पात्राणि प्रयुनक्ति। २।

यथार्थं यैरर्थः प्राकृतेषु यैश्चान्यैरागन्तुभिरित्यर्थः॥

स्फ्यमग्निहोत्रहवणीं वसाहोमहवनीं द्वितीयां जुहूं पृषदाज्यधानीं द्वितीयामुपभृतं द्वे आज्यस्थाल्यौ हृदयशूलमसिं कुम्भीं प्लक्षशाखां शाकपवित्रं कार्ष्मर्यमय्यौ वपाश्रपण्यौ द्विशूलामेकशूलां चौदुम्बरं मैत्रावरुणदण्डमास्यदघ्नं चुबुकदघ्नं वा रशने च। ३।

स्फ्याग्निहोत्रहवणीग्रहणं प्रदर्शनार्थं द्वयं तावदपरत्रार्थवशात्प्रयोज्यम्। एवं स्रुवाद्यपि पूर्वत्रेति। तत्र वसाहोमहवन्यादीनां जुह्वादिसमाख्यानादूचनियमस्तावद्व्याख्यातः। तथा प्राकृतैर्जुह्वादिभिरेकवत्करणेनैषां द्वन्द्वप्रयोग इति सिद्धं भवति। हृदयशूलादीनां पाठक्रमेणैव

द्रष्टता। दर्शितं च तत्सर्वं दर्शपूर्णमासयोः। निखातमयं शूलमित्युच्यते हृदयश्रपणार्थं शूलं यस्य काष्ठस्य तद्धृदयशूलम्। असिः स्वधितिः स च द्विधारः स्वधितेरन्यतरां धारामिति लिङ्गात्। द्वे शूले यस्याः सा द्विशूला। चुबुकमास्याधोभागः। रशने रज्जौ ये वक्ष्यति द्विगुणा द्विव्यायामेत्यादिना ॥

पवित्रे कृत्वा यजमान वाचं यच्छेति संप्रेष्यति। ४।

सोमविधे पशाविति भावः। इष्टिविधे तु पवित्रे कृत्वा प्रणीताप्रणयनं वक्ष्यति ॥

वाग्यतः पात्राणि संमृश्य प्रोक्षणीः संस्कृत्य ब्राह्मणमामन्त्र्य पात्राणि प्रोक्षत्यत्र वाचं विसृजते। स्फ्यमादायोत्तरं परिग्राहं परिगृह्य दर्शपूर्णमासवत्संप्रेष्यति। आज्येन दधोदेहीति संप्रैषान्तं नमति। ५।

ऐष्टिकैः पदार्थान्तरैरसंस्कारार्थमनुमन्त्रणम्। तत्र स्फ्याग्निहोत्रहवणीसंमर्शने स्फ्यप्रोक्षणे च संमर्शनप्रोक्षणमन्त्रयोर्द्विवदेकवदेवोहः प्रकृतावेव व्याख्यातः। तूष्णीं स्फ्यमादाय उत्तरपरिग्राहादि। संप्रैषं तु केचित्स्रुवं च स्वधितिं चेत्यपि कुर्वन्ति स्वधितेरपि संमार्गवचनात् स्रुवस्थानापन्नत्वाच्च। तदयुक्तं दर्शपूर्णमासवत्संप्रेष्यतीत्यतिदिश्य संप्रैषान्तं नमतीति वचनात् चातुर्मास्येषु पशुवत्संप्रैष इत्यतिदेशात् प्राशित्रहरणवदसंप्रेषितस्यापि संमार्गवचनोपपत्तेश्च ॥

स्रुचां संमार्जनकाले स्रुवं संमृज्य तस्यावृता स्वधितिम्। ६।

स्वधितिरप्यवदानार्थत्वात्स्रुववत्संस्कारमर्हतीति भावः ॥

जुहूवदसाहोमहवनीः पञ्चवत्पृषदाज्यधानीम्। आज्यं निरुप्य दधि निर्वपति। ७।

गताः ॥

अधिश्रयणवर्जं दधनि क्रियते। ८।

अधिश्रयणप्रतिषेधात्पर्यग्निकरणमपि निवर्तते अमेध्यं वा एतत्करोति यत्पर्यग्नि करोति गार्हपत्ये ऽधिश्रयति मेध्यत्वायेति लिङ्गात्। भारद्वाजस्त्वाह न पर्यग्निकरणमधिश्रयणप्रतिषेधादिति ॥ तत्र च दध्याज्ययोरुत्पूतयोः स्रुवेणादानं अदिती स्थो ऽच्छिद्रपत्त्रे इति। तथाज्यमसीत्यादेराज्यं दधि स्थ इत्यसमासेनैवोहः आज्येन दध्नोदेहीति लिङ्गात् ॥

नैतस्य दध्नः संस्कारो विद्यत इत्यपरम्। ९।

अस्मिंस्तु पक्षे दर्शपूर्णमासवदेवाविकृतं सर्वम्। लौकिक एव तु दध्नि संस्कृतमाज्यमानीयते ॥

इत्यष्टमी कण्डिका।

आज्यग्रहणकाले चतुर्जुह्वां गृह्णाति चतुरुपभृति। १।

जुह्वां पञ्चगृहीतस्य निवृत्त्यर्थं चतुर्गृहीतवचनमुपभृत्यष्टगृहीतदशगृहीतयोः ॥

दधन्याज्यमानीय महीनां पयो ऽसीति पृषदाज्यधान्यां पञ्चगृहीतं पृषदाज्यं ज्योतिरसि विश्वरूपं विश्वेषां देवानां समिदिति वा। २।

दुग्धमिति प्रथममन्त्रान्तः प्रैषस्य दधिघर्मे विनियोगात्। तत्रैक-मन्त्राणि कर्माणीति न्यायेन सकृन्मन्त्र इति केचित्। तदयुक्तं द्रव्यपृथक्त्वात् यथोक्तं भारद्वाजेन द्रव्यपृथक्त्वे ऽभ्यावर्तते यथाज्यग्रहणे लवने स्तरणे चेति॥

चतुर्ध्रुवायाम्। ३।

जुह्वद्व्याख्या॥

सादनकाल आज्यानि सादयति। ४।

स्तरणकाले सर्वां वेदिं स्तृणाति विशेषावचनात् अपरेणोत्तरवेदिं स्तृणातीति सौमिक्यां विशेषवचनात् दक्षिणस्यां वेदिश्रोण्यां बर्हिषीति लिङ्गाच्च। स्रुक्सादनकाले त्वाज्यवतीरेव सादयति न त्वनाज्यां वपाहोमहवनीं आज्यानीति वचनात्॥

उपभृद्वत्पृषदाज्यधानीम्। ५।

उपभृदुपभृदसीति मन्त्रेण सादयति। तथा स्रुवमन्त्रेण स्वधितिं तत्स्थानापन्नत्वात् तस्यावृता स्वधितिमिति लिङ्गात् स्रुवधर्माः स्वधि-ताविति कल्पान्तरकारवचनाच्च। याजमाने त्वयं स्वधितिरभिजि-हर्तीत्यूहः॥ स्रुवस्वधित्योः संभवाद्युगपत्सादनमित्येके। तदा तु द्विवदूहो मन्त्राणाम्। दधिस्थाल्यां तु दध्नः पूर्णेत्यूहः॥

पूर्ववदाज्यान्यभिमन्त्र्याग्रेणाहवनीयं यूपावटं परि-लिखत्यर्धमन्तर्वेद्यर्धं बहिर्वेदि। ६।

पूर्ववद्दिवष्टुनि त्वेत्यभिमन्त्र्य परिलिखत्यवटं यथा पृष्ठ्यान्त्यः शङ्कुर्मध्ये भवति ॥

पूर्ववदभ्रेरादानं परिलेखनश्च । ७ ।

पूर्ववत्सावित्रेणादानं परिलेखनस्य मन्त्रः परिलिखितमिति ॥

अथ खनति यथा नाविरूपरं भविष्यतीति । ८ ।

यथा निखातस्य यूपस्य नाविर्भविष्यत्युपरमिति मन्यते तावन्तमवटं खनति ॥

अग्रेणावटं प्राञ्चं यूपं निधाय यत्ते शिक्वः परावधीत्तक्षा हस्तेन वास्या। आपस्तत्सर्वं जीवलाः शुन्धन्तु शुचयः शुचिमिति यूपं प्रक्षाल्याथैनं यवमतीभिः प्रोक्षति। पृथिव्यै त्वेति मूलमन्तरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रम् । ९ ।

यासु यवा भवन्ति ता यवमत्यः ॥

शुन्धतां लोकः पितृषदन इति प्रोक्षणीशेषमवटेऽवनीय यवोऽसीति यवमवास्य पितॄणां सदनमसीति बर्हिषावस्तीर्य स्वावेशोऽसीति प्रथमपरापातिनं शकलमवास्य घृतेन द्यावापृथिवी आपृणेथामिति स्रुवेण शकले हुत्वा । १० ।

इति नवमी कण्डिका ॥

उपाय्यमानायानुब्रूहीति संप्रेष्यत्यज्यमानायानु-ब्रूह्यञ्जमो यूपमनुब्रूहीति वा। १।

अवनयनावस्तरणे पित्रर्थे मन्त्रलिङ्गात् पितॄणां निखातमिति लिङ्गाच्च॥ अतः प्राचीनावीतिना क्रियते। व्यापृतायां स्रुवेणेत्येव सिद्धे स्रुववचनाज्ज्ञानीमो नर्ते वचनात्स्रुवेण होमः पश्वाविति। तेन प्रहृत्य स्रुवेणाभिजुहोति स्रुवेण वपामभिजुहोतीत्यादिविषयेच न स्रुवस्योदितस्तत्र वसाहोमहवन्या होम इष्यते जुहूसमाख्यानात्॥

अथैनमसंस्कृतनाज्येन यजमानो ऽग्रतः शकलेना-नक्ति। २।

एनं यूपमग्रत आरभ्या मूलात्। अनक्तमुपरमिति तु सत्याषाढः। असंस्कृतेनेति वचनाच्छकलाभिहोमादन्यत्सर्वं संस्कृतेनेति सिद्धं भवति। भारद्वाजस्त्वाह अप्रोक्षता आज्ञतय आज्यनिर्वापणादूर्ध्व-माज्यस्थाल्या इत्याग्नरथ्यो लौकिकाज्यादित्यालेखनो ध्रौवादित्या-लेखनिरिति॥

ऐन्द्रमसीति चषालमक्त्वा सुपिप्पलाभ्यस्त्वौषधीभ्य इति प्रतिमुच्य देवस्त्वा सविता मध्वानक्त्विति स्रुवेण संततमविच्छिन्दन्नग्निष्ठामाश्रमनक्त्योपरात्। ३।

अध्वर्युरिति शेषः यदग्निष्ठामश्रिमनक्ति यजमानमेव तेजसानक्तीति श्रुतेः उत्तरत्र यजमानग्रहणाच्च। प्रतिमुच्य यूपाग्रे क्षिप्त्वा संततं संततधारमविच्छिन्दन्नग्निष्ठामिति शेषः॥

रशनादेशे चिः सर्वतो यूपं संमृशति। ४।

यत्र रशनाभङ्क्ष्यते तत्र संमृशति ॥

रशनादि यूपं यजमानो नोत्सृजत्या परिव्ययणात्। ५।

परिव्ययणं परिव्याणम्। अभिविधावाकारः ॥

यूपायोच्छ्रीयमाणायानुब्रूहीति संप्रेष्यत्युच्छ्रीयमाणायानुब्रूहीति वा। ६।

गतः ॥

उद्दिवं स्तभानान्तरिक्षं पृणेत्युच्छ्रयति। ७।

उच्छ्रयति उत्थापयति ॥

ते ते धामानीत्यवटेऽवदधाति। ८।

गतः ॥

विष्णोः कर्माणि पश्यतेति द्वाभ्यामाहवनीयेनाग्निष्ठां संमिनोति। ९।

आहवनीयेन संमिनोति तस्यार्जवेन स्थापयति ॥

यं कामयेत तेजसैनमित्युक्तम्। १०।

अग्निष्ठाया यथोक्तात्प्रकारादन्यथावस्थापने दोषः। तथात्वे गुणश्च ब्राह्मणे दर्शितः। स तत्रैवानुसंधेय इत्यर्थः ॥

अग्रमाहवनीयमुपनतं यूपस्यावनतं मूलम्। ११।

यूपस्याग्रमाहवनीयं प्रति प्रह्वं भवति मूलं तु ततः [illegible]तम् ॥

अनाविरूपरं कृत्वा ब्रह्मवनिं त्वा क्षत्रवनिमिति प्रदक्षिणं पांसुभिः पर्यूह्य ब्रह्म दृंह क्षत्रं दृंहेति मैत्रावरुणदण्डेन समं भूमिपरिदृंहणं कृत्वा । १२ ।

इति दशमी कण्डिका ।

उन्नम्भय पृथिवीमित्यद्भिः परिषिञ्चति । १ ।

अनाविरूपरं कृत्वा अनाविष्कृतोपरं यूपं कृत्वा। पर्यूह्य वेष्टयित्वा। समं यथा समीपभूमिसममवटस्थलं भवति। तथा परिदृंहणं कुट्टनं कृत्वा परिषिञ्चति परितः सिञ्चति ॥

दर्भमय्यौ रशने भवतः। द्विगुणा द्विव्यायामा पशुरशना त्रिगुणा त्रिव्यायामा यूपस्य। २ ।

व्यायामश्चतुररत्निः ॥

देवस्य त्वा सवितुः प्रसव इति रशनामादाय विष्णोः कर्माणि पश्यतेति सरशनेन पाणिना यूपमुन्मार्ष्टि। ३ ।

रशनां यूपरशनाम् ॥

तद्विष्णोः परमं पदमित्यग्रं प्रेक्षते। यूपाय परिवी-

यमाणायानुब्रूहीति संप्रेष्यति। परिवीयमाणायानुब्रूहीति वा। ४।

मताः॥

परिवीरसीति नाभिदघ्ने रशनया त्रिः प्रदक्षिणं यूपं परिव्ययति मध्यदेशे वा। ५।

तत्र रशनां त्रिः संभुज्य मध्यमेन गुणेन परिव्ययतीति बौधायनः॥

यं कामयेतोर्जैनमित्युक्तम्। ६।

एवं परिवीताया रशनायाः कामवशादूर्ध्वमधो वा सारणमुक्तं ब्राह्मणे तदप्यनुसंधातव्यमित्यर्थः॥

अधो दूरं परिव्ययेद्वृष्टिकामस्योपरि दूरमवृष्टिकामस्येत्येके। ७।

शाखान्तरे तु वृष्ट्यवृष्टिकामयोः परिव्याणमेवाधस्ताद्दूरमुपरिष्टाद्दूरं चोक्तम्। तत्त्वस्मद्ब्राह्मणवन्नाभिदघ्ने परिवीतायाः साधारणमित्यर्थः॥

यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषज्य न प्रवेष्टयेत्। ८।

यौ बन्धविशिष्टौ रशनाखण्डौ तावुपान्ते तयोः समीपे व्यतिषज्य मिथः संबध्य मुञ्चेत् न वेष्टयेत्। एवं कृते स्त्र्यस्य जायेत। अतो न तथा कुर्यादिति भावः॥

यं कामयेत पुमानस्य जायेतेत्यान्तं तस्य प्रवेष्ट्या-

मिति स्वावम[illegible]वीय दिवः सूनुरसीति स्वरुमादाया-न्तरिक्षस्य त्वा सानाववगूहामीत्युत्तरेणाग्निं मध्यमे रशनागुणेऽवगूहति। ९।

रशनाखण्डौ बन्धनादारभ्यान्ताद्वेष्टयित्वा तयोरग्रन्ते स्थूलमन्तं छित्वा बन्धने यो मध्यगुणस्तस्मिन्स्वरुमवगूहति ॥

उत्तमे सर्वेषु वा। द्वयोरधरयोरिति वाजसनेयकम्। १०।

गताः ॥

इत्येकादशी कण्डिका।

इति तृतीयः पटलः ॥

पशुं स्नपयन्ति कूटकर्णकाणखण्डबण्डस्रोणसप्तशफ-वर्जम्। १।

पशुः छागः इन्द्राग्निभ्यां छागस्येति लिङ्गात्। कूटो भग्नशृङ्गः। कर्णः कर्णेन विकलः काणश्चक्षुषा खण्डो दन्तैः बण्डः पुच्छेन स्रोणः पादेन। तथा बण्डस्तु छिन्नपुच्छः स्यात्स्रोणः पङ्गुरित्यादि नैघण्टुकाः। सप्तशफः सप्तखुरः एकेन पादेनैकशफ इति यावत् ॥ अत्रानुग्रहमाह भारद्वाजः यद्यङ्गहीनः स्याद्रूपतो वा वृद्धः संपद्येत वैष्णवीं सारस्वतीं वायव्यामिति हुत्वा सर्वप्रायश्चित्तानि जुहुयात् ॥

यद्यङ्गहीनः स्यादङ्गतो वा विरुज्येत। २।

अङ्गहीनः जनन एव विकलाङ्ग इति यावत्। अङ्गतो वा विरुज्येत रोगादिनैवं चेदङ्गहीनः पशुः कूटादिवर्जमेव पशुं स्नपयन्तीति पूर्वेण संबन्धो बोध्यः। इदं विस्पष्टार्थं तदतिरिक्तस्य वैकल्यस्याप्रयोजकत्वात्॥ कूटादिविशिष्टमप्यङ्गीकृत्याह॥

अथैकेषां वैष्णवीमाग्नावैष्णवीं सारस्वतीं बार्हस्पत्यामिति च हुत्वा प्रयोजयेत्। ३।

वैष्णव्याद्याः प्रसिद्धा याः काश्चन ग्राह्याः सामान्यतो निर्देशात्। अत्र बौधायनः रूपतो वा वर्णतो वा यद्यङ्गहीनः पशुरिति प्रकृत्य आग्नेयीमित्याद्युक्तवान्॥

यो ऽपन्नदन्मलं तत्पशूनामिति विज्ञायते। ४।

यो ऽपन्नदन्पतितोत्थितदन्तो न भवति पशूनां मध्ये तन्मलं वर्जनीयमित्यर्थः। तथा च बह्वृचाः यदा वै पशोर्दन्ताः पुनर्जायन्ते ऽथ स मेध्यो भवतीति। एवं च प्रतिनिधिरप्ययं न कर्तव्यो भवति प्रतिषेधाच्च प्रतिनिधिर्निवृत्त इति न्यायात्॥ साङ्गसजातीयालाभे तु व्यङ्गो ऽपि विजातीयात्प्रतिनिधेः श्रेयानित्यपरम्। यथाह भारद्वाजः आम्नातप्रतिषेधे प्रतिनिधेरङ्गं बलीयः यथाल्पगावो यथापन्नदन्पशुरिति॥

इषे त्वेति बर्हिषी आदत्ते। उपवीरसीति प्लक्षशाखां बहुपर्णशाखामप्रतिशुष्काग्रामसुषिराम्। ५।

दृषे लेयाकृ्ति[illegible]नात् ॥

यं कामयतापशुः स्यादित्यपर्णया तस्य शुष्काग्रयो-पाकुर्यात् । ६ ।

गतः ॥

तृणेनोपाकरोतीत्येके । ७ ।

यदि तृणेन तदा तस्यैव विभागः पशुसंज्ञपनवपान्तर्धानयोः ॥

बर्हिर्भ्यां प्लक्षशाखया च पुरस्तात्प्रत्यञ्चं पशुमुपा-करोति । उपो देवान्दैवीर्विशः प्रजापतेर्जायमाना इति चैताभ्यामुपस्पृशन्निन्द्राग्निभ्यां त्वा जुष्टमुपाकरोमीति ।८।

पुरस्तादाहवनीयस्य प्रत्यङ्मुखमवस्थितं पशुं बर्हिर्भ्यां प्लक्षशाखया चोपस्पृशन्नुपाकरोति । देवतार्थत्वेन संकल्पनमुपाकरणम् । उपो देवानिति यजुर्द्वयं चोपाकरणार्थं नोपस्पर्शनार्थं यदेताभ्यामुपा-करोतीति लिङ्गात् ॥

पञ्चकृत्वो देवतोपदेशनमुपाकरणे नियोजने प्रोक्षणे वपाया उद्धरणे हृदयस्याभिघारण इति । ९ ।

पुनरुपाकरणग्रहणं दृष्टान्तार्थं यथोपाकरणे तथा दृष्टान्तेन यजुषा सर्वत्र देवतोपदेशनमिति ॥

प्रजानन्तः प्रतिगृह्णन्ति पूर्व इति पञ्च हुत्वाग्निं मन्थति । १० ।

गतः ॥

अपि वाग्निं मथित्वोपाकुर्यात्। ११।

अस्मिंस्तु पक्षे प्रजानन्त इति पश्चाद्धुतयो ऽप्युत्कृष्यन्ते उपाकृत्य पशुं जुहोतीति श्रुतेः ॥

अग्नेर्जनित्रमसीत्यधिमन्थनं शकलं निदधाति। वृषणौ स्थ इति प्राञ्चौ दर्भौ। १२।

उक्तो ऽधिमन्थनः ॥

उर्वश्यसीत्यधरारणिमादत्ते। पुरूरवा इत्युत्तरारणिम्। १३।

अरणी अग्न्याधेयिकावन्ये वा अविशेषात्। तयोर्गार्हपत्यैकयोनित्वादन्ये एवेत्यन्ये ॥

देवो वां सविता मध्वानक्त्वित्याज्यस्थाल्या बिले ऽङ्क्त्वा घृतेनाक्ते वृषणं दधाथामित्युभे अभिमन्त्र्यायुरसीति समवधाय। १४।

इति द्वादशी कण्डिका।

अग्नये मथ्यमानायानुब्रूहीति संप्रेष्यति। मथ्यमानायानुब्रूहीति वा। १।

बिले ऽङ्क्त्वेति वचनान्न स्रुवादिनाज्यमादायानक्ति ॥

प्रथमायां त्रिरनूक्तायां त्रिः प्रदक्षिणमग्निं मन्थति। गायत्रं छन्दोऽनु प्रजायस्वेति प्रथमं त्रैष्टुभमिति द्वितीयं जागतमिति तृतीयम्। २।

गतौ ॥

ततो यथा प्राशु मन्थति। ३।

यथा प्राशु शीघ्रतरं भवति तथा मन्थति ॥

यदि मथ्यमानो न जायेत राक्षोघ्नीरनुब्रूयात्। ४।

राक्षोघ्नीः कृणुष्वपाजीयाः। भारद्वाजस्त्वत्रानुग्रहमाह यदि निर्मन्थ्यो मथ्यमानो न जायेत तस्य स्थाने हिरण्यशकलं व्याहृतीभिर्जुहुयादिति ॥

जातायानुब्रूहीति जाते संप्रेष्यति। प्रह्रियमाणायेति प्रहरन्। ५।

गतः ॥

भवतं नः समनसावित्यग्रेणोत्तरं परिधिमाहवनीये प्रहरति संधिना वा। ६।

संधिना परिधिसंधिनोत्तरेण ॥

अग्नावग्निश्चरति प्रविष्ट इति प्रहृत्य स्रुवेणाभिजुहोति। ७।

प्रहृत्येति ब्राह्मणानुकरणार्थं वैचित्र्यार्थं वा। अभिजुहोति उपरि जुहोति निर्मन्थ्यस्य ॥

सावित्रेण रशनामादाय पशोर्दक्षिणे बाहौ परिवीयोर्ध्वमुत्कृष्यर्तस्य त्वा देवहविः पाशेनारभ इति दक्षिणेऽर्धशिरसि पाशेनाक्ष्णया प्रतिमुच्य धर्षा मानुषानित्युत्तरतो यूपस्य नियुनक्ति। ८।

प्रत्यङ्मुखस्य पशोरुत्तरो बाहुर्दक्षिणो भवति। तथा दक्षिणमर्धशिरः पाशेन प्रतिमुच्य यथा शिरसो न गलति तथा वशीकृत्य बद्ध्वा नियुनक्ति रशनाशेषेण यूपे बध्नाति। पूर्ववद्देवतोपदेशनमिन्द्राग्निभ्यां त्वा जुष्टं नियुनज्मीति ॥

दक्षिणत ऐकादशिनान्। ९।

लाघवार्थमेषामिह वचनम् ॥

अद्भ्यस्त्वौषधीभ्यः प्रोक्षामीति प्रोक्षति। १०।

अत्र तु मन्त्रगतादेवाख्यातात्पूर्वं देवतोपदेशनप्रक्षेपेण मन्त्ररूपमुदाजह्रतुर्बौधायनभारद्वाजौ यथा अद्भ्यस्त्वौषधीभ्य इन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामीति ॥

अपां पेरुरसीति पाययति। ११।

अपिबन्तमपि बलात्पाययति यद्युपपाय्यमान इति विधिना ॥

स्वात्तं चित्सदेवं हव्यमापो देवीः स्वदतैनमित्युपरिष्टादधस्तात्सर्वतश्च प्रोक्ष्य वेदं निधाय सामिधेनीभ्यः प्रतिपद्यते। १२।

सर्वत इत्येव सिद्धे क्रमार्थमुक्तमुपरिष्टादधस्तादिति। वेदं निधाय सामिधेनीभ्य इति वचनाद्वेद्यन्तपरिस्तरणहोतृषदनकल्पने न स्त इति केचित् ॥

इति त्रयोदशी कण्डिका।

इति चतुर्थः पटलः ॥

स्रुच्यमाघार्य प्रत्याक्रम्य जुह्वा पशुं समनक्ति।१।

प्रत्याक्रम्येति वचनात्स्रुच्यमाघार्य न दक्षिणतो गत्वा समनक्ति ॥

सं ते प्राणो वायुना गच्छतामिति शिरसि। सं यजत्रैरङ्गानीत्यंसोच्चलयोः। सं यज्ञपतिराशिषेति श्रोण्याम्।२।

अंसोच्चलयोरंसकोट्योः तयोश्चावृत्तिर्मन्त्रस्य ॥

ध्रुवासमञ्जनादि कर्म प्रतिपद्यते समानमा प्रवरात्।३।

गतः ॥

षडृत्विजः।४।

असमासार्थं वचनं ब्राह्मणानुकरणार्थं वा। शमितुर्ऋत्विक्त्वशङ्कानिरासार्थमित्यपरम् ॥

दैवं च मानुषं च होतारौ वृत्वा पुनराश्राव्य मैत्रावरुणं प्रवृणीते मित्रावरुणौ प्रशास्तारौ प्रशास्तादिति। ५।

अग्निर्दैवो होतेति दैवमसौ मानुष इति मानुषं च वृत्वा मैत्रावरुणमप्यसौ मानुष इत्यनेन वृणीते होतृविकारत्वात् सौमिके च तथादर्शनात् व्यक्तपाठाच्च कल्पान्तरेषु ॥

तिष्ठति पशावेकादश प्रयाजान्यजति। ६।

एकादश प्रयाजान्यजति तांश्च तिष्ठति पशौ यजति। तत्र त्वसंभवपर्युदस्तत्वादेकादशे दशस्वेव पशोः स्थाननियमः। निषण्णं तु पशुं यद्यु वै निषीदेदिति विधिनोत्थापयेत् ॥

समिद्भ्यः प्रेष्येति प्रथमं संप्रेष्यति। प्रेष्य प्रेष्येतीतरान्। ७।

प्रथमं संप्रेष्यति प्रथमं प्रयाजं प्रति मैत्रावरुणं संप्रेष्यति ॥

चतुर्थाष्टमयोः प्रातिसमनीय दशेष्वैकादशायाज्यमवशिनष्टि। ८।

चतुर्थप्रभृतयस्त्वारो बर्हिषो विकाराः अष्टमप्रभृतयः स्वाहाकारस्य। बर्हिःस्वाहाकारार्थं च प्रकृतौ चतुर्थे समानयनम्। अतश्चतुर्थ एव सर्वानयने प्राप्ते विभागार्थमुक्तं चतुर्थाष्टमयोरिति ॥

तान्यजमानः प्राकृतैरादितश्चतुर्भिश्चतुरोऽनुमन्त्र्य चतुर्थस्यानुमन्त्रणेन दुरःप्रभृतींस्त्रीनुत्तमेन शेषम्। ९।

[illegible]स्यतस्य मन्त्रेणानुमन्त्रयत इति भावः। अत एव न्यायात्तत्तदूह्यत्वमपि तत्तद्विकाराणां द्रष्टव्यम् ॥

प्रत्याक्रम्य जुह्वा स्वरुस्वधिती अनक्ति। त्रिः स्वरुं सकृत्स्वधितेरन्यतरां धाराम्। १०।

गताः ॥

स्वरुमन्तर्धाय स्वधितिना पशुं समनक्ति घृतेनाक्तौ पशुं त्रायेथामिति शिरसि। ११।

स्वधितेरधस्तात्स्वरुं कृत्वोभाभ्यां शिरस्यनक्ति ॥

न वा स्वधितिना स्वरुणैव। १२।

अनक्तीत्यन्वयः। तदा तु घृतेनाक्तः पशुं त्रायस्वेत्यूहः ॥

अक्तया शृतस्यावद्यति पशुमितरया विशास्ति।१३।

अक्तया स्वधितेर्धारया पक्वस्य पशोरङ्गान्यवद्यति। इतरया त्वनक्तया पशुं विशास्ति शमिता ॥

शमित्रे स्वधितिं प्रयच्छन्न[illegible] शमितरेषा तेऽस्त्रिः स्पष्टास्त्विति। १४।

एषाक्तावदानार्था धारा स्फुटा विदितास्तु तया विशसनं परिहरणीयमित्यर्थः ॥

इति चतुर्दशी कण्डिका।

पर्यग्नये क्रियमाणायानुब्रूहीति संप्रेष्यति । पर्यग्नये ऽनुब्रूहीति वा । १ ।

परितो ऽग्निर्यस्य स पर्यग्निः । तथा क्रियमाणाय पशव इत्यर्थः न तु परितः क्रियमाणायाग्नय इति । यथा चैतदेवं तथैकादशिनेषु व्यङ्क्ष्यामः ॥

आहवनीयादुल्मुकमादायाग्नीध्रः परि वाजपतिः कविरिति त्रिः प्रदक्षिणं पर्यग्नि करोति पशुं यूपमाहवनीयं शामित्रदेशं चात्वालम् । आज्यानि चेत्येके । २ ।

पर्यग्नीति क्रियाविशेषणम् । यथा पर्यग्निर्भवति पशुस्तथा करोतीत्यर्थः ॥ तत्र चात्वालान्तमपच्छिद्य पश्वादीनि पञ्च पर्यग्नि करोतीति प्रथमः कल्पः । आज्यानि चेत्येके इत्याज्यसमुच्चयेन द्वितीय इति योज्यम् । तथा च सत्याषाढः पञ्च पर्यग्नि करोति पशुं शामित्रदेशं चात्वालं यूपमाहवनीयं च त्रिः परिद्रवत्याज्यानि चेत्येक इति । पर्यग्नि करोति पशुमिति वापच्छिद्य ततो यूपादिपञ्चसमुच्चयेन द्वितीयः कल्पः । तथा च बौधायनभारद्वाजौ पशुमेव पर्यग्नि करोतीत्येकेषामिति । प्रथमा योजनैव तु सूत्रानुगता त्रिः प्रतिपर्येतीत्यभिपर्यग्निकृते देश इति च नित्यवद्वचनात् ॥

प्रत्यपिसृज्योल्मुकं त्रिः प्रतिपर्येति । ३ ।

पशोरेव पर्यग्निकरणमिच्छतामुल्मुकप्रत्यपिसर्ग एव न प्रतिपरिगमनं परिगमनस्यैवाभावात् । एकत्र स्थितेनापि स शक्यः पर्यग्निकर्तुमिति ॥

प्रजानन्तः प्रतिगृह्णन्ति पूर्व इति पर्यग्नौ क्रियमाणे ऽपाव्यानि जुहोत्येकं द्वे त्रीणि चत्वारि वा। ४।

गतः ॥

पशुपतेः पशवो विरूपाः सदृशा उत। तेषां यं वव्रिरे देवास्तं स्वराडनुमन्यतामिति द्वितीयाम्। ५।

द्विप्रभृतिषु कल्पेष्वेव द्वितीयाहुतिर्नियता ॥

ये बध्यमानमिति प्रमुच्यमाने। प्रमुञ्चमाना इति प्रणीयमाने। ६।

शमित्रा यूपात्प्रमुच्यमाने नीयमाने च पशौ जुहोत्यध्वर्युः ॥

रेवतीर्यज्ञपतिं प्रियधा विशतेति वपाश्रपणीभ्यां पशुमन्वारभेते अध्वर्युर्यजमानश्च। आश्राव्य प्रत्याश्राविते संप्रेष्यत्युपप्रेष्य होतर्हव्या देवेभ्य इति। ७।

गतौ ॥

प्रास्मा अग्निं भरत स्तृणीत बर्हिरिति होतुरभिज्ञायाहवनीयादुल्मुकमादायाग्नीध्रः पूर्वः प्रतिपद्यते। ८।

पूर्वः प्रतिपद्यते पुरस्तात्पशोर्गच्छति ॥

शमिता पशुं नयति। ९।

शमिता यूपात्पशुं प्रमुच्य गमनाय कर्षति। तत्र त्वध्वर्युराहुती जुहोति ये बध्यमानं प्रमुञ्चमाना इति ॥

सो ऽग्निर्निरूढपशोः शामित्रः। अपशौ शमितृसंबन्धात् पशुश्रपणार्थो ऽग्निः शामित्र इति समाख्यायते ॥

तं दक्षिणेन प्रत्यञ्चं पशुमवस्थाप्य पृथिव्याः संपृचः पाहीति तस्यामन्तर्बर्हिरुपास्यत्युपाकरणयोरन्यतरत् । ४ ।

उपाकृतः पशुर्याभ्यां ते उपाकरणे ॥

तस्मिन्संज्ञपयन्ति प्रत्यक्शिरसमुदीचीनपादम् । ५ ।

शमितार इति शेषः। अहतस्य मारणं संज्ञपनम् ॥

अमायुं कृण्वन्तं संज्ञपयतेत्युक्त्वा पराङावर्तते ऽध्वर्युः । ६ ।

मायुः शब्दः तमकुर्वन्तमित्यर्थः ॥

स्वर्विदसि स्वर्वित्त्वा स्वरिहि स्वर्मह्यं स्वः पशुभ्यः। लोकविदसि लोकं वित्त्वा लोकमिहि लोकं मह्यं लोकं पशुभ्यः। गातुविदसि गातुं वित्त्वा गातुमिहि गातुं मह्यं गातुं पशुभ्यः। नाथविदसि नाथं वित्त्वा नाथमिहि नाथं मह्यं नाथं पशुभ्यः॥ न वा उवेतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः। यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु॥ आशानां त्वाशापालेभ्य इत्येषा। विश्वा आशा मधुना संसृजाम्यनमीवा आप ओषधयो भवन्तु। अयं यजमानो मृधो व्यस्यताम्। अगृभीताः पशवः सन्तु सर्वे

इत्युक्त्वा परावर्तते यजमानः॥ नाना प्राणो यजमानस्य पशुनेत्यध्वर्युर्जपति। ७।

इति षोडशी कण्डिका।

यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च। ता नः सन्तु पयस्वतीरस्मिन्गोष्ठे वयोवृधः॥ इह पशवो विश्वरूपा रमन्तामस्मिन्यज्ञे विश्वविदो घृताचीः। अग्निं कुलायमभिसंवसाना अस्माँ अवन्तु पयसा घृतेनेति पृषदाज्यमवेक्षमाणौ वाग्यतावासाते अध्वर्युर्यजमानश्च। १।

गताः॥

इन्द्रस्य भागः सुविते दधातनेमं यज्ञं यजमानं च सूरौ। यो नो द्वेष्ट्यनु तं रभस्वानागसो यजमानस्य वीरा इति च वाश्यमाने ऽवेक्षेते। २।

वाश्यमाने पशौ तमेव पशुमवेक्षेते इत्यर्थः मन्त्रलिङ्गात्। तथा पशुमभिमन्त्रयते यदि रूरोदेत्येव सत्याषाढः। चकारो वाग्यतासनसमुच्चयार्थः॥

यत्पशुर्मायुमकृतेति संज्ञप्ते संज्ञप्तहोमं जुहोति। ३।

संज्ञप्तिमात्रनिमित्तो होमो न तु मान्त्रवर्णिकमायुकरणादिनिमित्तः तेन नित्य इति ज्ञापयितुमुक्तं संज्ञप्ते संज्ञप्तहोममिति॥

श्रामेत। उपेतनेति वपाश्रपणीभ्यां पशुमुपैतोऽध्वर्युर्यजमानश्च। ४।

वपाश्रपणीभ्यां संगच्छतस्ते तु सह प्लक्षशाखया निष्टप्तमित्याहवनीये प्रतितप्येमां साधारणार्थत्वेन कुम्भीधर्मत्वात्तासाम्। तथा धर्मा इत्यधिकृत्य भारद्वाजः ये सांनाय्योखायां पशुश्रपण्यां वपाश्रपण्योर्हृदयशूले प्लक्षशाखायामिति क्रियेरन्निति॥

पशोः पाशं प्रमुञ्चत्यदितिः पाशं प्रमुमोक्त्वेतमिति। ५।

पशोः पशुतः। पाशं रशनाम्॥

संवेष्ट्य रशनां ग्रीवासु निधायैकशूलयोपसज्य चात्वाल उदस्यत्यरातीयन्तमधरं करोमीति। ६।

कर्णस्था धमन्यो ग्रीवा इत्युच्यन्ते। एकशूलयोपसज्य तत्सक्तं कृत्वा॥

यद्यभिचरेदरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रतिमुञ्चामि पाशमिति तया वृक्षं स्थाणुं स्तम्भं वापिदध्यात्। ७।

अभिचरतस्त्वनेन स्वशाखास्थेन मन्त्रेण तया रशनया वृक्षादिं बध्नीयात् न तु चात्वाल उदस्येत्। स्थाणुरशाखं तरुप्रकाण्डम्। स्तम्भः स्थूणा॥

इति सप्तदशी कण्डिका।

इति पञ्चमः पटलः॥

ततः प्रतिप्रस्थाता पत्नीमुदानयति। १।

स्वायतनाद्वेदिसमीपं नयति ॥

नमस्त आतानेति पत्न्यादित्यमुपतिष्ठते। २।

अनेकाश्चेत्सर्वा युगपदुपतिष्ठन्ते ॥

अनर्वा प्रेहीति प्राचीमुदानयत्यनुमन्त्रयत इत्येके।३।

ततश्चात्वालं प्रति प्राचीं नयति नीयमानां चानुमन्त्रयते। बह्वीश्चे-कैकां नयति प्रेहीत्येकवचनात् ॥

आपो देवीः शुद्धायुव इति चात्वाले पत्न्यपो ऽवमृ-शत्यृत्विजो यजमानश्च। ४।

स्पृशन्त्यपः सर्वाः पत्न्यः ॥

न पत्नीत्येके। ५।

गतः ॥

अद्भिः पशोः सर्वान्प्राणानाप्याययति। ६।

प्राणाप्यायनमेव व्याकरोति ॥

सर्वाण्यङ्गान्यध्वर्युरभिषिञ्चति पत्न्याप्याययति। ए-तद्वा विपरीतम्। वाक्त आप्यायतामित्येतैर्यथालिङ्गम्। ७।

यद्यल्लिङ्गो मन्त्रस्तत्तदङ्गमध्वर्युपत्न्योरन्यतरो ऽभिषिञ्चति तत्तदेवेतर आप्याययति तेनतेनाप्यायनलिङ्गमन्त्रेणाभिमृशतीत्यर्थः। पत्न्यनेकत्वे ऽप्येकैवाप्याययति। पशुसंस्कारत्वात्तच्च चक्षुःश्रोत्रघ्राणेष्वावृत्तिः अधि-

ष्ठानाभिधानात् तद्भेदाच्च । न चाभिगु[illegible]धानोपपत्तिः पश्वोर्मृतत्वात् ॥

या ते प्राण[illegible]जगामेति हृदयदेशम् । ८ ।

हृदयलिङ्गाभावाद्वचनम् ॥

मेढ्रं त आप्यायतामिति मेढ्रम् । ९ ।

आगन्तुत्वे ऽपि पादमन्त्रात्पूर्वमस्य प्रयोगः तथाविनियोगात् ॥

शुद्धाश्चरित्रा इति पादान् । १० ।

चरित्रशब्दस्य पादे प्रयोगमान्द्येनाव्यक्तलिङ्गत्वाद्वचनम् । बहुवचनाच्च युगपदाप्यायनं पदानाम् । तथा संप्रश्नस्य पद इत्येव बौधायनः ॥

एकैकमाप्याय्य जपति शमद्भ्य इति पुरा स्तोकानां भूमेः प्रापणात् । ११ ।

अङ्गमङ्गमाप्याय्य तावदेव जपति शमद्भ्य इति यावदाप्यायनानामपां बिन्दवो भूमिं न प्राप्नुवन्ति ॥

शमोषधीभ्यः शं पृथिव्या इति भूम्यां शेषं निनीयौषधे त्रायस्वैनमित्युपाकर[illegible] दक्षिणेन नाभिमन्तर्धाय स्वधिते मैनं हिंसीरिति स्वधितिना पार्श्वतस्तिर्यगाच्छ्यति । १२ ।

दक्षिणेन नाभिं भूमिमध्ये बर्हिर्निधाय तस्योपरि तिर्यगवस्थितेन स्वधितिना पार्श्वप्रदेश एव छिनत्ति ॥

बर्हिषो ऽग्रं सव्येन पाणिनादत्ते। १३।

गतः ॥

अथ मध्यं यत आच्छ्यति तदुभयतो लोहितेनाङ्क्त्वा रक्षसां भागो ऽसीत्युत्तरमवान्तरदेशं निरस्यैनत्सव्येन पदाभितिष्ठतीदमहं रक्षो ऽवबाध इदमहं रक्षो ऽधमं तमो नयामीति। १४।

आलवनस्थमूलापेक्षया बर्हिषः खण्डान्तरमिह मध्यमभिप्रेतं तृतीयखण्डाभावात्। तन्मध्यमुभयोरन्तयोरङ्क्त्वा निरस्याभितिष्ठति उपरि तिष्ठति द्वाभ्यां यजुर्भ्याम्। तत्रेदमहं रक्षो ऽधममित्यादि इदमेनमधमं तमो नयामीत्यन्तं द्वितीयम् ॥

इत्यष्टादशी कण्डिका।

इषे त्वेति वपामुत्खिद्य घृतेन द्यावापृथिवी प्रोर्ण्वाथामिति वपया द्विशूलां प्रच्छाद्योर्जे त्वेति तनिष्ठे ऽन्तत एकशूलयापतृणत्ति। १।

उत्खिद्य उत्पाद्य। तनिष्ठे ऽन्ततः तनुतमे वपान्ते। उपतृणत्ति भिनत्ति शूलप्रोतं करोतीति यावत् ॥

देवेभ्यः कल्पस्वेत्यभिमन्त्र्य देवेभ्यः शुन्धस्वेत्यद्भिरवोक्ष्य देवेभ्यः शुम्भस्वेति स्वधितिना वपां निमृज्या-

च्छिन्नो रायः सुवीर इन्द्राग्निभ्यां त्वा जुष्टामुत्कृन्तामी-
त्युत्कृन्तति।२।

निमृज्य यदन्यद्वपायास्तन्निर्णुद्य। उत्कृन्तति छिनत्ति। जुष्टामुत्कृन्ता-
मीति विशिष्टप्रयोगदर्शनार्थं पुनर्देवतोपदेशनवचनम् ॥

मुष्टिना शमिता वपोद्धरणमपिधायास्त आ वपाया
होमात्।३।

यतो वपोद्धृता तद्बिवरं वपोद्धरणम् ॥

प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति शामित्रे वपां
प्रतितप्य नमः सूर्यस्य संदृश इत्यादित्यमुपस्थायोर्वन्त-
रिक्षमन्विहीत्यभिप्रव्रजति।४।

गतः ॥

उल्मुकैकदेशमादायाग्नीध्रः पूर्वः प्रतिपद्यते।५।

उल्मुकस्य शामित्रार्थस्यैकदेशं पुरस्तान्नयति ॥

वपाश्रपणी पुनरन्वारभते यजमानः।६।

पुनरन्वारभत इति ब्राह्मणानुकरणार्थम्। यथा पशौ नीयमाने तथा
वपायामपि नीयमानायामित्यर्थः ॥

उल्मुकैकदेशमाहवनीये प्रत्यपिसृजति।७।

गतः ॥

निर्दग्धं रक्षो निर्दग्धा अरातय इत्याहवनीयस्यान्तमे ऽङ्गारे वपां निकुक्ष्यान्तरा यूपमाहवनीयं च दक्षिणातिहृत्य प्रतिप्रस्थात्रे प्रयच्छति। ८।

अन्तमे प्रथमप्राप्ते निकुक्ष्य। कुक्षयतिर्दाहकर्मा। अतिहृत्य स्वयं यूपाद्बहिर्गच्छन्यूपाहवनीययोर्मध्येन हृत्वेत्यर्थः॥

तां दक्षिणत आसीनः प्रतिप्रस्थाता वनीये अपयति। ९।

गतः॥

इत्येकोनविंशी कण्डिका।

वायो वीहि स्तोकानामिति बर्हिषो ऽग्रमधस्ताद्वपाया उपास्यति। १।

वपाया अधस्ताद्भागे तया सहोपश्लेषयति। अधस्ताद्वपाया अग्नौ क्षिपतीति केचित्। तदयुक्तं प्रहरतीत्यवचनात् विपर्ययस्यैव ब्राह्मणे व्यक्तत्वाच्च यथा अग्रं वा एतत्पशूनां यद्वपाग्रमोषधीनां बर्हिरग्रेणैवाग्रं समर्धयत्यथो ओषधीष्वेव पशून्प्रतिष्ठापयतीति॥

त्वामु ते दधिरे हव्यवाहमिति स्रुवेण वपामभिजुहोति। २।

गतः॥

प्रादुर्भूतेषु स्तोकेषु स्तोकेभ्यो ऽनुब्रूहीति संप्रेष्यति। ३।

अग्निसंयोगाद्ये मेदसो बिन्दवश्च्योतन्ते स्तोकाः ॥

अलोहिनीं सुशृतां कृत्वा सुपिप्पला ओषधीः कृधीति दक्षिणस्यां वेदिश्रोण्यां बर्हिषि प्लक्षशाखायां च साद्य प्रयुता द्वेषांसीति वपाश्रपणी प्रवृह्य निधाय घृतवति शब्दे जुहूपभृतावादाय अतिक्रम्याश्राव्य प्रत्याश्राविते संप्रेष्यति स्वाहाकृतीभ्यः प्रेष्य स्वाहाकृतिभ्यः प्रेष्येति वा। ४।

यथा न लोहिता भवति तथाज्येनाञ्जन् सुशृतां कृत्वा प्रातर्दोहवदभिघार्योद्वास्य बर्हिषि प्लक्षशाखायां च सह सादयति। तथा च भारद्वाजः सांनाय्यवदभिघार्य तथोद्वास्य बर्हिषि प्लक्षशाखायां प्रतिष्ठापयतीति। वपाश्रपण्योः प्रवर्हणे मन्त्रस्तूष्णीं निधानं मन्त्रलिङ्गात् ॥ अथासन्नाभिमर्शने प्रातर्दोहमन्त्रगतानामिदंतदामूहः स्त्रीलिङ्गेन। घृतशब्दस्य स्थाने वपाशब्दः ॥

वषट्कृते हुत्वा प्रत्याक्रम्य शेषेण ध्रुवामभिघार्य पृषदाज्यमभिघारयत्यथ वपाम्। एतद्वा विपरीतम्। ५।

यत्र वषट्कृते जुहोति यत्नस्तत्र वषट्कृत एव जुहोति न वषट्कारेण। पृषदाज्यमुभयमभिघारयति स्रुग्गतं स्थालीगतं च स्थालीगतस्यापि वनस्पतीज्यार्थत्वात् प्रयाजानिष्ट्वा हवींष्यभिघारयतीति श्रुतेश्च ॥

नोपभृतम्। ६।

रिक्तत्वादिति भावः॥

आज्यभागौ यजति। ७।

स्वनधिकाराणां अनुवादः॥

तौ न पशौ करोति। न सोम इत्येके। ८।

तौ न तावत्स्वतन्त्रे पशौ करोति। तथा सोमे यः पशुर्न तत्रापीत्यर्थः। सोमे ये इष्टिपशवो न तत्रेत्यन्ये॥

स्वाहा देवेभ्य इति पूर्वं परिवप्यं हुत्वा जुह्वामुपस्तीर्य हिरण्यशकलमवधाय कृत्स्नां वपामवदाय हिरण्यशकलमुपरिष्टात्कृत्वाभिघारयति। ९।

परितो वपां हूयेते इति परिवप्यौ नाम होमौ॥ तत्रेदं वक्तव्यं स्वाहा देवेभ्य इति मन्त्रस्यान्ते ऽपि स्वाहाकारेण भवितव्यं न वेति। नेति ब्रूयात् आदिगतस्यापि देवतापदमात्रेण व्यवेतस्य प्रदानार्थत्वात्। तत्र च लिङ्गम्। स्वाहाकारान्तेषु पठ्यमानेषु स्वाहा पित्र इति पाठः। तथाश्वलायनके ऽपि पठ्यते स्वाहा वाचे स्वाहा वाचस्पतये स्वाहा सरस्वत्या इति। यत्र तु पदादधिकेन व्यवायः स्वाहा त्वा सुभवः सूर्यायेत्यादौ तत्र भवितव्यमेवान्ते स्वाहाकारेण। तत्र च लिङ्गं स्वाहाधिमाधीताय स्वाहा स्वाहाधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहेत्यादि॥ न तु सर्वस्यैवादिगतस्य स्वाहाकारस्य प्रदानार्थत्वं दर्शितं श्रुतौ पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उप-

रिष्टात्स्वाहाकृतयो ऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपां जुहोति तानेवोभयान्प्रीणातीति। तत्किं व्यवायाव्यवायनिबन्धेन। नैवमनया दर्शितं तत्समानार्थे वाक्यान्तरे श्रुतेरेतदर्थनिर्णयात् यथा पुरस्तात्स्वाहाकारा वा अन्ये देवा उपरिष्टात्स्वाहाकारा अन्ये यद्वपां महिम्नोभयतः परियजति तानेवोभयान्प्रीणातीति। नहि तत्र यः प्राणतो य आत्मदा इत्यनयोर्महिम्नोरादिमतः स्वाहाकारो ऽस्ति येनैवमर्थः स्यात्। कस्तर्हि श्रुतेरर्थः। श्रूयताम्। स्वाहाकारेण तावद्धोमो लक्ष्यते। तदयमर्थः। प्रधानेज्यायाः पुरस्ताद्धोमभाजः केचिदुपरिष्टाद्धोमभाजो ऽन्ये तानुभयानुभयतो हुताभ्यामाहुतिभ्यां प्रीणातीति॥ किं च। अस्यामेव व्याख्यायामभितो वपां जुहोतीति विधेरयमर्थवादो घटते न व्याख्यान्तरे। तदा यत्र क्वचित्काले ऽप्युभयत्र मन्त्रहुताभ्यामाहुतिभ्यामुभयप्रीणनसिद्धेस्तस्माद्यथोक्त एवार्थो ऽवदातः॥ अथ हिरण्यशकले ऽनुग्रह उक्तो भारद्वाजेन यदि हिरण्यं न स्यादाज्यात्प्रत्यवद्येदिति। बौधायनस्त्वाह आज्यस्रावं वा हिरण्यशकलं वा द्वितीये चतुर्थे चेति॥ सांनाय्यविकारत्वे ऽपि वपाया हस्तेनैवावदानं न स्रुवेण स्रुवहस्तस्वधितीनां द्रवाद्यवदेयेषु योग्यतया व्यवस्थानात्। बौधायनस्त्वाह स्रुवेण वपां समवलुम्पन्नाहेन्द्राग्निभ्यां छागस्येति। नात्रावदानमन्त्रः खण्डनाभावात्॥

एवं प[ञ्चा]वत्ता भवति। १०।

एवं हिरण्यशकलाभ्यां सह पञ्चावत्ता वपा भवति॥

चरुरवत्तिना ऽपि पञ्चावत्तैव स्यात् । ११ ।

गतः ॥

इति विंशी कण्डिका ।

इन्द्राग्निभ्यां छागस्य वपाया मेदसो ऽनुब्रू[illegible]ग्निभ्यां छागस्य वपाया मेदसः प्रेष्येति संप्रैषौ । १ ।

संप्रैषावेवं भवतः । संप्रैषकालस्तु प्रकृतावेवोक्तो ऽवद्यन्नमुष्मा अनुब्रूहीति ॥

जातवेदो वपया गच्छ देवानिति वषट्कृते हुत्वा प्रत्याक्रम्य देवेभ्यः स्वाहेत्युत्तरं परिवप्यं हुत्वा वपोद्धरणमभिघारयत्युत्तरतस्तिष्ठन् । २ ।

हुते सांनाय्यवद्धुतानुमन्त्रणम् । वपोद्धरणमुत्तरतस्तिष्ठन्नभिघारयति । तथा पश्वभिघारणे ऽपि वक्ष्यत्युत्तरतः परिक्रम्येति ॥

प्रतिप्रस्थाताहवनीये वपाश्रपणी प्रहरति स्वाहोर्ध्वनभसं मारुतं गच्छतमिति प्राचीं द्विशूलां प्रतीचीमेकशूलाम् । एतद्वा विपरीतम् । ३ ।

उभे व्यत्यस्ताग्रे कृत्वा सह प्रहरति गच्छतमिति लिङ्गात् ॥

अथैने अध्वर्युः संस्रावेणाभिजुहोति । ४ ।

गतः ॥

अत्र यजमानो वरं ददात्यनड्वाहं तिस्रो वा धेनूस्तिस्रो वा दक्षिणाः । ५ ।

अनड्वाहं वरमिति सामानाधिकरण्ये वरग्रहणानर्थक्यादुद्देन योजनीयम्। वरं गोजातीयमात्रं वा दद्यादनड्वाहं धुर्यमेव वा वरं धेनूः पयस्विनीर्वा तिस्रः दक्षिणा याः कास्विद्वा गास्तिस्र इति॥

समुत्क्रम्य सहपत्नीकाः पञ्चभिश्चात्वाले मार्जयन्ते॥ आपो हि ष्ठा मयोभुव इति तिस्रः॥ इदमापः प्रवहतावद्यं च मलं च यत्। यद्वाभिदुद्रोहानृतं यद्वा शेपे अभीरुणम्॥ आपो मा तस्मादेनसो विश्वान्मुञ्चन्त्वंहसः। निर्मा मुञ्चामि शपथान्निर्मा वरुणादधि। निर्मा यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषादथो मनुष्यकिल्बिषादिति। ६।

दक्षिणां विधिवत्प्रतिगृह्य सर्वे समुत्क्रम्य सह गत्वा मार्जयन्ते। व्याख्यातं मार्जनम्॥

इत्येकविंशी कण्डिका।

इति षष्ठः पटलः॥

पशुपुरोडाशस्य पात्रसंसादनादि कर्म प्रतिपद्यते। १।

पश्वर्थः पुरोडाशः पशुपुरोडाशः तस्य पात्रप्रयोगप्रभृति तन्त्रमारभते॥

यथार्थं पात्रयोगः। २।

येऽर्थाः पुरोडाशस्य तानि प्रयुनक्ति। पात्रान्तराणि तु पश्वर्थमेव प्रयुक्तान्यस्यापि प्रसङ्गेनोपकुर्वन्ति ॥

निर्वपणकाले व्रीहिमयं पशुपुरोडाशं निर्वपत्येकादशकपालं द्वादशकपालं वा। ३।

पवित्रे कृत्वा पात्राणि संमृश्य निर्वपणम्। न प्रणीता भवन्ति। पश्वर्थानामेवोपजीवनादिष्टिविधे सोमविधे तूक्तमन्या वा यजुषोत्पूयेति। भारद्वाजस्त्वाह यजुरुत्पूताभिः पिष्टानि अपयतीति। बौधायनस्त्वाह प्रोक्षणीशेषेण पिष्टानि संयुयादिति॥ पुनःपशुपुरोडाशवचनात्पशुपुरोडाशः सर्वो व्रीहिमयो भवति न यवमयः। कपालसंख्याप्येषैव सर्वत्र॥

यद्देवतः पशुस्तद्देवतो भवति। ४।

इदमपि सार्वत्रिकं वेदितव्यम्॥

हविष्कृता वाचं विसृज्य पशुं विशास्ति। ५।

हविष्कृता सह विसृष्टवाचोरध्वर्युयजमानयोः पशुं विशास्ति शमितेति शेषः शमितरेषा ते ऽग्निः स्पष्टास्त्विति लिङ्गात्॥

हृदयं जिह्वा वक्षो यकृद्वृक्कौ सव्यं दोरुभे पार्श्वे दक्षिणा श्रोणिर्गुदतृतीयमिति दैवतानि। दक्षिणं दोः सव्या श्रोणिर्गुदतृतीयमिति सौविष्टकृतानि। क्लोमानं प्लीहानं पुरीततं वनिष्ठुमध्यूध्नीं* मेदो जाघनीमित्युद्धरति। ६।

* This word has been corrected whenever it occurs; all MSS. read always अध्युद्धि instead of अध्यूध्नी.

यकृत् कालखण्डं नाम सदीयो मांसम् । वृक्यौ पार्श्वगतौ पिण्डौ । गुदं त्वविभक्तमेवोद्धरति विभागस्त्वस्य परस्ताद्भविष्यति । क्लोमादीना-मिडाद्यर्थं उद्धारः । क्लोमा नाम यकृत्सदृशं तिलकाख्यं मांसम् । प्लीहा गुल्मः । पुरीतत् अन्त्रम् । वनिष्ठुः स्थविष्ठान्त्रम् । अध्यूध्नी ऊधःस्थानीयं मांसम् । मेदः चर्म हृदयस्य वृक्ययोश्च । जाघनी पुच्छम् ॥

गुदं मा निर्लेषीरिति संप्रेष्यति । ७ ।

शमितारं संप्रेष्यत्यध्वर्युः । तत्र निर्लेषीरिति को ऽर्थः । तमाह ॥

मा विपर्यास्त* इत्यर्थो भवति । ८ ।

गुदं च वनिष्ठुं च मा विपर्यास्थाः तयोः सदृशाकृत्योर्मिथो विपर्यासं मा कृथा इत्यर्थः । तयोः सुषिरविपरिवर्तनं विपर्यास इत्यन्ये ॥ विप-र्यास्त इति तु पठतां प्रामादिकस्तकारः ॥

उदक् पवित्रे कुम्भ्यां पशुमवधाय शूले प्रणीय हृदयं शामित्रे श्रपयति । ९ ।

कुम्भ्यादीनां प्रतितपनादि पवित्रनिधानान्तं कर्म शामित्रे कृत्वोदक्-पवित्रायां कुम्भ्यां कृत्स्नमुद्धृतं पशुं दुग्धसेचनमन्त्रेण युगपदवधाय श्रपयति । हृदयं तु हृदयशूलप्रोतं कृत्वा प्रत्यक्षेण श्रपयति । श्रपणं तु शमितृकर्म शृतं हवीः शमितरिति लिङ्गात् अग्नेः शामित्रस-माख्यानाच्च ॥

---

* Thus all MSS.

अवहननादि कर्म प्रतिपद्यते । १० ।

अवहननादि प्रतिपद्याप्येभ्यो निनीय लौकिकैर्दर्भैः प्राशित्रं संमार्ष्टि । ऊहेनादाय ततः प्रस्तरे पवित्रे अपिसृज्य पुरोडाशमुद्वास्यासादयति ॥

वपया प्रचर्य पुरोडाशेन प्रचरति । सृते वा पशौ । ११ ।

व्यवस्थितविकल्पार्थो वाशब्दः । एवं वपाप्रचारानन्तरं पुरोडाशं निरुप्यासाद्य सृते पशौ तेन प्रचरति । यदा पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमालभते वपया प्रचर्य पुरोडाशेन प्रचरतीति ब्राह्मणानुसारेण पशुसंज्ञपनानन्तरमेव पुरोडाशं निरुप्य वपाप्रचारानन्तरं तेन प्रचरतीत्यर्थः । तथा च भारद्वाजः पशुमालभ्य पुरोडाशं निर्वपतीति विज्ञायते ऽनन्तरवादो ऽभिप्रेतो वपया प्रचर्य पुरोडाशेन प्रचरतीति । बौधायनस्त्वाह पशुमालभ्य पुरोडाशं निर्वपेदिति शालीकिरिति ॥

इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति संप्रैषौ ॥ इन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रूहीन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति वा । १२ ।

पूर्ववद्व्याख्या ॥

अग्नये ऽनुब्रूह्यग्नये प्रेष्येति स्विष्टकृतः संप्रैषौ । १३ ।

नात्र नारिष्ठाः न चान्तःपरिध्यपां निनयनम् । पश्वर्थानामेव प्रसङ्गाद्धुतानुमन्त्रणे ऽप्यग्नेरहमिति विकारः ॥

इति द्वाविंशी कण्डिका ।

प्राशित्रमवद्यति न यजमानभागम्।१।

अवद्यतीति विपरिणामेनान्वयः। तेषां प्राशित्रेडमेवावद्यति न तत्स-मसमयं यजमानभागमित्यर्थः॥

हविराहुतिप्रभृतीडान्तः संतिष्ठते।२।

यदतोऽङ्गजातं प्रयाजानुयाजादि तत्सर्वं पश्वर्थमेवानुष्ठितं प्रसङ्गेनो-पकरोतीति भावः। एवं च तत्रालब्धप्रसङ्गं यद्वैशेषिकमङ्गं पुरोडा-शस्य यथा फलीकरणहोमः। कपालविमोचनं चेति तत्रैव कर्तव्य-मित्युक्तं भवति। तत्र च लिङ्गं सवनीयानामिडान्ते वैशेषिकाणामनु-क्रमणम्। भारद्वाजसत्याषाढौ चाहतुः अत्र पशुपुरोडाशस्य पिष्ट-लेपफलीकरणहोमौ जुहोति कपालविमोचनं चेति। स्वकाले कार्याणीत्यपरं उत्कर्षेदित्यपरमिति लिङ्गात्॥ यजमानभागस्य तु वाचनिको निषेधः। केचित्तु वाचनिकमिडान्तत्वमिष्ट्वा नान्यदपि प्रतिषेधन्ति। तेषां यजमानभागावदानप्रतिषेधोऽनर्थकः स्यात् प्राशनाभावादेवावदाननिवृत्तेः॥

उपहूतां मैत्रावरुणषष्ठां भक्षयित्वा पूर्ववत्प्रस्तरे मार्जयित्वा स्रुवेण पृषदाज्यस्योपहत्य वेदेनोपयम्य चिः पृच्छति शृतं हवीः३ शमितरिति।३।

भक्षणवचनं मैत्रावरुणाय विधानार्थम्। तस्य चाप्राकृतस्यापि अनु-वाक्याप्रैषयोर्वक्तृत्वेन होत्रध्वर्युविकारत्वाद्भक्षणप्राप्तिरिति भावः। मार्जनवचनं तु भक्षणशेषत्वं मार्जनस्य ख्यापयितुम्। अतो यद्यदि-

शान्तमुक्तं तन्मार्जनान्तं भवति। पृषदाज्यग्रहणं स्थालीगतस्येष्टं स्रुगगतस्यानुयाजार्थत्वात्। उपहत्य गृहीत्वा॥

शृतमितीतरः प्रत्याह। ४।

शमिता तु सुपरीक्षितपाकः प्रत्याह। यो ऽशृतं शृतमाह स एनसेति दोषः श्रूयते॥

अर्धाध्वे द्वितीयं प्राप्य तृतीयम्। ५।

द्वितीयं तृतीयं पृच्छतीत्यन्वयः॥

पूषा मा पशुपाः पात्विति प्रथमे ऽभिप्रव्रजति। पूषा मा पथिपाः पात्विति द्वितीये। पूषा माधिपाः पात्विति तृतीये। ६।

प्रथमे द्वितीय इति प्रतिप्रश्ने कृत इति शेषः। तथा पृष्ट्वाभिक्रामेत्पूषा मेति द्वितीयं पृष्ट्वापक्रामेत्पूषा मेत्येव बौधायनः॥

शूलात्प्रवृह्य हृदयं कुम्भ्यामवधाय सं ते मनसा मन इति पृषदाज्येन हृदयमभिघारयत्युत्तरतः परिक्रम्य। ७।

तृतीयेन गमनमन्त्रेणोत्तरतः परिक्रम्य हृदयमभिघारयति। न चात्रोत्तरतः परिक्रम्येत्यस्योत्तरसूत्रेण सह योजना शङ्कनीया त्रिभिः प्रश्नैस्त्रिभिर्मन्त्रैस्त्रिभिश्चाध्वनो ऽवच्छेदैर्विशिष्टस्य गमनस्योभयोरपि हृदयपश्वभिघारणयोरङ्गत्वात् तस्य चानिवृत्तत्वात् व्यक्तोक्तत्वाच्च भार-

दाजमत्याषाढाभ्याम्। उत्तरतः परीत्य पृषदाज्येन हृदयमभिघारयतीत्यर्थः॥

आज्येन पशुं यस्त आत्मा पशुषु प्रविष्ट इति। ८।

पशुमाज्येनाज्यस्थाल्या आनीतेनाभिघारयति उत्तरत एव स्थितः॥

स्वाहोष्मणो व्यथिष्या इत्युद्यन्तमूष्माणमनुमन्त्रयते। ९।

उद्यन्तं ऊर्ध्वं यन्तम्॥

पशुं हरन्पार्श्वतो हृदयशूलं धारयत्यनुपस्पृशन्नात्मानमितरांश्च। १०।

सांनाय्यवत्पशुमुद्वास्य हरन् कुम्भ्याः पार्श्वतो हृदयशूलं धारयति न च तेन हस्तधृतेनोपस्पृशत्यङ्गान्तरमन्यांश्च। धारणमपि तस्य रज्ज्वादिना बद्धा न साक्षाद्धस्तेनेत्येके॥

अन्तरा यूपमाहवनीयं च दक्षिणातिहृत्य पञ्चहोत्रा षड्ढोत्रा वा दक्षिणस्यां वेदिश्रोण्यामासाद्य ...स्तृणीते जुहूपभृतावसाहोमहवन्यां समवत्तधान्यामिति। ११।

अतिहरणं व्याख्यातम्। समवत्तधानी इडापात्रम्॥ तत्रेदमिन्द्रियमित्यासन्नाभिमर्शनमन्त्रे हविर्मयि श्रयतामिति संनामः। तत्र च लिङ्गानि छागस्य हविषो ऽनुब्रूहि मनोतायै हविषो ऽवदीयमानस्य

अथ हविषा प्रचरति यदि वपा हविरवदानं वेत्यादीनि। आश्वलायनस्त्वाह वपा पुरोडाशो हविरिति पशोः प्रदानानीति ॥

जुह्वामुपस्तीर्य हिरण्यशकलमवधाय बर्हिषि प्लक्षशाखायामवदानान्यवद्यन्संप्रेष्यति । १२ ।

इति त्रयोविंशी कण्डिका ।

मनोतायै हविषोऽवदीयमानस्यानुब्रूहीति । १ ।

बर्हिःप्लक्षशाखयोस्तत्तदङ्गं निधाय स्वधितेरन्यया धारयावदानमन्त्रेण छिनत्ति । प्रक्रान्ते चावदाने मनोतायै संप्रैषः ॥

हृदयस्याग्रेऽवद्यति। अथ जिह्वाया अथ वक्षसो याथाकामीतरेषाम्। २ ।

त्रयाणामेवैतेषां क्रमनियमो याथाकाम्यमितरेषामङ्गानाम् ॥

मध्यतो गुदस्यावद्यतीत्युक्तम्। ३ ।

उक्तमिदं ब्राह्मणे मध्यतो गुदस्यावद्यति मध्यतो हि प्राण उत्तमस्यावद्यतीति। तेन दैवतानामवदानानां मध्यतोऽन्ततो वा गुदावदानमित्यर्थः ॥

यथोद्धृतं वा । ४ ।

यः प्रथम उद्धरणे क्रम उक्तः स एवावदानेऽप्यस्तु ॥

दैवतानां द्विर्द्विरवदाय जुह्वामवदधाति। उपभृति सौविष्टकृतानां सकृत्सकृत्। ५।

दैवतसौविष्टकृतविभागः प्रागेव दर्शितः॥ तत्र दैवतानि सर्वाण्यव-दाय ततः सौविष्टकृतान्यवद्यति। तत्राह भारद्वाजः प्रत्यभिघार्य अङ्गाणि स्विष्टकृते सकृदिति। पञ्चावत्तिनस्तु त्रिस्त्रिर्दैवतेभ्यो द्विर्द्विः सौविष्टकृतेभ्य इति द्रष्टव्यं पञ्चावत्तं सर्वत्रेति नियमात् स्वधितिना धारां छिनत्ति द्विः पञ्चावत्तिन इति लिङ्गाच्च॥

गुदं त्रैधं विभज्य स्थविमदुपयड्भ्यो निधाय मध्यमं द्वैधं विभज्य दैवतेष्ववदधाति। अणिमत्सौविष्टकृतेषु। ६।

गुदस्यावदानकालः प्रागेवोक्तः। तस्यैवेदानीं विभागप्रकार उच्यते। यदा दैवतार्थं गुदादवद्यते तद्दैवतं त्रेधा विषमं विभज्य स्थूलखण्ड-मुपयड्ढोमार्थं निधाय मध्यमपरिमाणं खण्डमवदानमन्त्रेण द्वेधा छित्त्वा दैवतेष्ववदधाति। अणु तु खण्डं स्वकाले सौविष्टकृतेषु॥ पञ्चावत्तिनस्त्वत्रापि त्रेधा द्वेधा च विभागः पूर्ववत्॥

अपि वा द्वैधं विभज्य स्थविमदुपयड्भ्यो निधायेत-रत्त्रैधं विभज्य मध्यमं द्वैधं विभज्य दैवतेष्ववदधाति। अणिमत्सौविष्टकृतेषु स्थविष्ठमिडायाम्। ७।

गुदादपीडावदानमिच्छतोऽयं विभागः॥

त्रेधा मेदोऽवद्यति द्विभागं स्रुचोस्तृतीयं समवत्तधान्याम्। ८।

अवत्तेषु सौविष्टकृतेषु मेदस्त्रेधा विभज्य तृतीयमिडार्थं निधायेतरौ भागौ स्रुचोः क्षिपति ॥

यूषे मेदोऽवधाय मेदसा स्रुचौ प्रावृत्य हिरण्यशकलावुपर्यवधाय । यातं । ९ ।

यूषे पशुरसे मेदो मज्जयित्वा तेन स्रुग्गतान्यङ्गानि प्रच्छादयति ॥

समवत्तधान्यां षडाद्यानीडामवद्यति वनिष्ठुं सप्तमम् । षड्भ्यो वा वनिष्ठोः सप्तमात् । १० ।

अवशिष्टानामङ्गानां मध्ये यथोद्धृतं षडाद्यानि कृत्स्नानीडामवद्यति वनिष्ठुं च सप्तमम् । अत एव नावदानमन्त्रः न च यजमानभागः । यदा तु षड्भ्यः तदा सर्वं प्रकृतिवत् ॥

अनस्थिभिरिडां वर्धयति । ११ ।

शिष्टेष्वङ्गेषु यान्यनस्थीनि तैरिडां वर्धयति । कानि पुनस्तानि ॥

क्लोमानं प्लीहानं पुरीततमित्यन्ववधाय यूष्णोपसिच्याभिघारयति । १२ ।

इतिकरणोऽध्यूध्नीमेदस्तृतीययोः प्रदर्शनार्थः । तत्र मेदः पूर्वमवदाय ततः क्लोमादीनीत्यपरे ॥

इति चतुर्विंशी कण्डिका ।

इति सप्तमः पटलः ॥

अपां त्वौषधीनां रसं गृह्णामीति वसा [illegible] वन्यां वसाहोमं [illegible]। १।

वसा पशुरसः। स एव होमस्तत्साधनत्वादभिप्रेतः तं वसाहोमं गृह्णाति। श्रुतिप्रसिद्ध्या तु तथा निर्देशः॥

स्वधितिना धारां छिनत्ति। २।

दक्षिणेन गृह्णन्सव्येन छिनत्ति॥

द्विः प[illegible]वात्तनः। ३।

गतः॥

श्रीरसीति पार्श्वेन वसाहोमं प्रयौति। ४।

प्रयौति लोडयति॥

वातस्य त्वा ध्रज्या इति तेनैवापिदधाति। स्वधितिना वा प्रयौति। स्वधितिनापिदधातीत्येके। ५।

गताः॥

अथ यन्न शीर्ष्णो ऽवद्यति नांसयोर्नाणूकस्य नापरसक्थ्योरनवद[illegible]यानि। ६।

अंसौ स्कन्धौ तावन्तरास्थिविशेषो ऽणूकः। श्रोण्योरुपरिदेशावपरसक्थिनी। एतेभ्यो ऽङ्गेभ्यो यन्नावद्यत्यनुद्धरणात् तेनैतान्यनवदानीयानीत्याख्यायन्ते यथा सुराग्रहांश्चानवदानीयानि च वाजसन्न इत्यादौ।

स्वयं च वक्ष्यति मास्त्या अनवदानीयानीति। अस्त्वेवं किं तैरिदानीम्॥

तानि शृतैः संनिधाय संमृशत्यैन्द्रः प्राणो अङ्गेअङ्ग इति। ७।

तान्यनवदानीयानि शृतैर्दैवतसौविष्टकृतैडैः सह निधायोभयानि संमृशतीत्यर्थः। तथा शृतमशृतं च पशुं संनिधाय संमृशतीति सत्याषाढः॥

अथ हविषा प्रचरति। ८।

हविःशब्दो ऽङ्गावदानेषु प्रसिद्धः॥

इन्द्राग्निभ्यां छागस्य हविषो ऽनुब्रूहीन्द्राग्निभ्यां छागस्य हविषः प्रेष्येति संप्रैषौ। ९।

गतः॥

याज्याया अर्धर्चे प्रतिप्रस्थाता वसाहोमं जुहोति घृतं घृतपावानः पिबतेति। १०।

मन्त्रमध्यगस्वाहाकारो न प्रदानार्थः मध्यमे स्वाहाकार इति लिङ्गात्। तेनान्ते स्वाहाकारेण जुहोति॥

उद्रेकेण दिशः प्रदिश इति प्रतिदिशं जुहोति। मध्ये पञ्चमेन। ११।

उद्रेकः शेषः। पञ्चमेन मन्त्रेण॥

प्राञ्च-ताम संस्थाप्य नमो दिग्भ्य इत्युपतिष्ठते। १२।

षष्ठं होमं मध्यादारभ्य प्राञ्चं समाप्य ता एव दिश उपतिष्ठते मन्त्रलिङ्गात् ॥

वषट्कृते जुहोति। १३।

हविरिति शेषः। सांनाय्यवद्धुतानुमन्त्रणम् ॥

अत्र वा दिशः प्रति यजेत्। उपरिष्टाद्वा वनस्पतेः स्विष्टकृतो वा। १४।

अत्र कृते हविषि दृष्टे वा वनस्पताविष्टे वा स्विष्टकृति दिशां यागः। वसाहोमस्तु सर्वत्र याज्याया अर्धर्च एव ॥

प्रत्याक्रम्य जुह्वामुपस्तीर्य सकृत्पृषदाज्यस्योपहत्य द्विरभिघार्य वनस्पतयेऽनुब्रूहि वनस्पतये प्रेष्येति संप्रैषौ। वषट्कृते जुहोति। १५।

प्रत्याक्रम्य कृत्वा नारिष्ठान्पृषदाज्यं गृह्णाति स्थाल्याः स्रुग्गतस्यानुयाजार्थत्वात्। द्विस्तु पञ्चावत्तिनः ॥

स्विष्टकृद्वद्यजमानोऽनुमन्त्रयते। १६।

यथा वनस्पतेरहं देवयज्ययायुष्मानित्यादि ॥

उपर्याहवनीये जुह्वामौपभृतानि विपर्यस्यन्नाहाग्नये स्विष्टकृतेऽनुब्रूह्यग्नये स्विष्टकृते प्रेष्येति संप्रैषौ। १७।

दक्षिणतः स्थित एवौपभृतानि जुह्वां गमयन्नाह्वानुवाक्यासंप्रैषं ततो याज्याया इत्यर्थः ॥

वषट्कृते हुत्वा प्रत्याक्रम्यायतने स्रुचौ सादयति ।१८।

उत्तरविधानार्थो ऽनुवादः ॥

इति पञ्चविंशी कण्डिका ।

अथेडाया [illegible]मेके समामनन्ति ।१।

अत्र स्रुक्सादनानन्तरं प्राकृत एव काल इति भावः। निरवदानं पृथक्करणम् ॥

अवान्तरेडामवद्यति ।२।

उत्तरविवक्षयानुवादः ॥

मेद उपस्तीर्य मेदसाभिघारयति ।३।

गतः ॥

यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा इत्युक्तम् ।४।

तस्मादादर्तव्यं मेद इति भावः ॥

उपहूतां मैत्रावरुणषष्ठा भक्षयन्ति। प्रतिप्रस्थाता सप्तमः ।५।

पशुपुरोडाशादवशिष्टमेव षस्यां भक्षणम्। प्रतिप्रस्थाताप्यत्राधिकः तस्यापि पश्वङ्गभूतवपाश्रपणात्मकप्राकृतकार्यान्वयादिति भावः॥

वनिष्ठुमग्नीधे षडवत्तं संपादयति। ६।

यदा कृत्स्नो वनिष्ठुरिडायामवत्तस्तदा तमिडांशेन सहाग्नीधे प्रयच्छति स चेडावद्भक्षयति। यदा वनिष्ठोरेकदेशो ऽवत्तस्तदावत्तशिष्टं मार्जनान्ते प्रयच्छति स त्वाग्नीध्रभागवद्भक्षयति॥

अध्यूध्नीं होत्रे हरति। ७।

अध्यूध्नी अपीडायामेवाधिकांशो होतुर्नियम्यते अनस्थित्वात॥

अग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीत्परिधींश्चाग्निं च सकृत्सकृत्संमृड्ढीति संप्रेष्यति। ८।

उपयजो नाम वक्ष्यमाणा होमाः तदर्था औपयजाः तेषां होतोपयष्टा। व्याख्यातः शेषः॥ नन्वेते ऽङ्गाराः कुत्राहर्तव्याः कुत्र चोपयष्टोपसीदति कस्यासौ। तत्सर्वं क्रमादाह॥

आग्नीध्रादौपयजानङ्गारानाहरति। होत्रीय उपयजति। ९।

सौमिके पशाविति शेषः। लाघवार्थमिह वचनम्॥

शामित्रान्निरूढपशुबन्ध उत्तरस्यां वेदिश्रोण्याम्। १०।

आमिचादाहरति श्रोणामुपयजतीत्यर्थः। बौधायनेन त्वचोक्तं अतो ह स्माह बौधायनः आहवनीयादेवोदीचो ऽङ्गारान्निर्वर्त्य तेषूपयष्टोपयजेदिति। तेन पशुश्रपणादूर्ध्वं आमिचानुगतौ उपयजामप्रयोजकत्वे ऽप्याहवनीयाङ्गारेषूपयागो युक्तः। न तु गुदहोमलोप इति द्रष्टव्यम् ॥

गुदकाण्डमेकादशधा तिर्यक् छित्त्वासंभिन्दन्नपर्यावर्तयन्ननूयाजानां वषट्कृतेवषट्कृत एकैकं गुदकाण्डं प्रतिप्रास्थाता हस्तेन जुहोति समुद्रं गच्छ स्वाहेत्येतैः प्रतिमन्त्रम्। ११।

संभेदः संकरो दारणं वा। सुख्यभ्यन्तरभागस्य बहिःपरिवर्तनं पर्यावर्तनम् ॥

सर्वाणि हुत्वाद्भ्यस्त्वौषधीभ्य इति बर्हिषि लेपं निमृज्य मनो मे हार्दि यच्छेति जपति। पृषदाज्यं जुह्वामानीय पृषदाज्यधानीमुपभृतं कृत्वा तेनैकादशानूयाजान्यजति। १२।

गतौ ॥

देवेभ्यः प्रेष्येति प्रथमं संप्रेष्यति। प्रेष्य प्रेष्येतीतरान् । १३।

प्रथममनूयाजं प्रति देवेभ्यः प्रेष्येति प्रशास्तारं संप्रेष्यति। केवलं प्रेष्येतीतराननूयाजान् ॥

तान्यजमानः प्राकृतैरनुमन्त्रयत। १४।

प्राकृतैर्ऋतानुमन्त्रणमन्त्रैरिति शेषः॥

इति षड्विंशी कण्डिका।

प्रथमेनाद्यांश्चतुरो दशमं च। द्वितीयेन प्राग्वनस्पतेः। उत्तमेन शेषम्। १।

आद्याश्चत्वारो दशमश्च प्रथमविकाराः ततः परे चत्वारो द्वितीयस्य नवमैकादशावुत्तमस्य। अतस्तेनतेन मन्त्रेण तांस्ताननुमन्त्रयते। यथा बर्हिषो ऽहं देवयज्यया प्रजावान् द्वारामहं देवयज्यया प्रजावान् बर्हिषो वारितीनामित्यादि तयोर्जाङ्गत्योरहं देवयज्यया पशुमान् दैव्ययोर्होत्रोरहं तिसृणां देवीनामहमित्यादि तथा वनस्पतेरहं देवयज्ययायुष्मानित्यादि। तथा तत्तद्विकाराणां तत्तद्देशत्वमप्यनुसंधातव्यम्॥

उत्तरयोर्विकारेषूभौ होतारं चोदयतो ऽध्वर्युमैत्रावरुणश्च यजेति। २।

दर्शितमेतत्प्रकृतौ यदुत्तरावनूयाजौ द्वियजाविति। इदानीं तद्विकाराणामपि संपाद्यत इति वेदितव्यम्॥

अत्र स्वरोरञ्जनमेके समामनन्ति। ३।

द्वितीयमत्राञ्जनं स्वरोः पत्रे विधीयते न तु पूर्वस्यैवाञ्जनस्य कालविकल्पमात्रं तस्य पशुसंस्कारार्थत्वेन तत्रैव नित्यत्वात्। तथा च

मन्त्रवर्णः घृतेनाक्तौ पशुं त्रायेथामिति। व्यक्तं चैतद्भारद्वाजीयादौ नित्यवदुभयत्राञ्जनवचनात्॥

प्रत्याक्रम्य जुह्वां स्वरुमवधायानूयाजान्ते जुहोति द्यां ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्मना पृणस्व स्वाहेति। ४।

अनूयाजान्त इति वैचित्र्यार्थम्। अनूयाजसमाप्तिदेश इत्येके॥

समानमा प्रत्याश्रावणात्। ५।

तत्राह भारद्वाजः सर्वा जुह्वप्रभृतो वाजवतीभ्यां व्यूहति सर्वासु स्रुचु प्रस्तरमनक्तीति॥

सूक्तवाकप्रैषे विक्रियते। ६।

विक्रियते कर्हतो मन्त्रतश्च। कथम्॥

तं मैत्रावरुणो ब्रूयादग्निमद्य होतारमवृणीतेति। ७।

इषिता दैव्या इत्याध्वर्यवप्रैषो निवर्तते॥

ध्रुवावर्जं चतसृभिः परिधीनभिजुहोति। ८।

अतिरिक्तत्वाद्ध्रुवायाः प्राकृते परिध्यभिहोमेऽनन्वयाच्च सिद्धस्यैव ध्रुवावर्जनस्य वचनमसंदेहार्थम्॥

दक्षिणेन विहारं जाघनीं हृत्वा तया पत्नीः संयाजयन्ति। ९।

पूर्वस्मिन्गार्हपत्ये पत्नीसंयाजाः। तत्र पाष्ण्योरपि स्रुचोः कस्तम्भ्यां सादनं विमोचनार्थत्वात्। तथा च भारद्वाजः सर्वाः स्रुचः कस्तम्भ्यां सादयतीति। सादनमन्त्रस्य तूहः प्रकृतावेव दर्शितः॥

आज्येन सोमत्वष्टाराविष्ट्वोत्तानायै जाघन्यै देवानां पत्नीभ्यो ऽवद्यति। नीच्या अग्नये गृहपतये। १०।

यत्र न सन्ति लोमानि स उत्तानो भागः इतरो ऽन्यः। सर्वाण्यवदानानि जाघन्या एव भवन्ति आज्यस्थानापन्नत्वात्। तथा जाघनीं प्रकृत्याह भारद्वाजः चतुःकृत्वश्चतुरवदानस्य पञ्चकृत्वः पञ्चावदानस्य नात्रोपस्तरणाभिघारणानि भवन्तीति॥

उत्तानायै होत्र इडामवद्यति नीच्या अग्नीधे। ११।

इडाम्नानित्यनुमन्त्रणे घृतशब्दस्यानूहः प्रकृतावेव दर्शितः॥

तां पत्न्यै प्रयच्छति तां साध्वर्यवे ऽन्यस्मै वा ब्राह्मणाय। १२।

गतौ॥

बाहुं शमित्रे। १३।

बाहुर्दोः। स लेको हविःशेषभक्षणदशायामभक्षितस्तिष्ठति॥

तं स ब्राह्मणाय यद्यब्राह्मणो भवति। १४।

अत एव च जिह्वादिष्टमिष्टं मांसं ब्राह्मणाय देयं भक्ष्यं चास्येति सिद्धं भवति॥

यज्ञ यज्ञं गच्छेति चीणि समिष्टयजूंषि हुत्वानुपस्पृशन्हृदयशूलमुदङ् परेत्यासंचरेऽप उपनिनीय शुष्कार्द्रयोः संधावुद्वासयति शुगसीति द्वेष्यं मनसा ध्यायन्। १५।

संपत्नीयादि समानमा समिष्टयजुषः। तत्र पिष्टलेपफलीकरणहोमौ पशुपुरोडाश एव व्याख्यातौ। ततस्त्रीणि समिष्टयजूंषि हुत्वा प्राकृत एव स्थाने बर्हिरनुप्रहृत्य ततः प्रातर्दोहवद्यजमानभागप्राशनं यदा षड्भ्य इडा भवति। ततो वेद्यभिस्तरणादि आध्वर्यवशेषं संस्थाप्य पूर्ववदनुपस्पृशन्हृदयशूलं हृत्वा द्विपदां चतुष्पदां च पशूनामसंचरेऽपास्यति॥ तत्र च शुगसि तमभिशोचेत्येव मन्त्रः। न तु शत्रोर्नामग्रहणं अनदःशब्दात् मनसा ध्यायन्निति वचनाच्च॥

सुमित्रा न आप ओषधय इति तस्मिंश्चात्वाले वा सहपत्नीका मार्जयित्वा धाम्नोधाम्नो राजन्नुदुत्तममित्यादित्यमुपस्थायैधो ऽस्येधिषीमहीत्याहवनीये समिध आधायापो अन्वचारिषमित्युपतिष्ठन्ते। १६।

व्याख्यातं मार्जनम्। तत्तस्मिन्हृदयशूले कुर्वन्ति। तथा चाश्वलायनः तस्योपरिष्टादप उपस्पृशन्तीति॥ समिधामेकैकस्येनाधानं मन्त्रलिङ्गात्। समिदसीत्येतावान्द्वितीयो मन्त्रः॥ पत्न्यास्तूपस्थानमन्त्रे पयस्वत्यग्न आगमं तां मेति विकारः॥ अथ प्रणीतामार्जनविष्णुक्रमेषु याजमानक्रमप्राप्तेषु तेषां प्रवृत्ति विकल्पं शाखान्तरोक्तं दर्शयति॥

इति सप्तविंशी कण्डिका।

इष्टिविधो वा अन्यः पशुबन्धः सोमविधो ऽन्यः। स यत्रैतदपः प्रणयति पूर्णपात्रं निनयति विष्णुक्रमा-न्क्रामति स इष्टिविधो ऽतो ऽन्यः सोमविध इति वाज-सनेयकम्। १।

इष्टेरिव विधा यस्य स इष्टिविधः। तथा सोमविधः। के पुनस्ते विधे। सो ऽयं कर्ता यत्रैतद्यथाप्रसिद्धं पश्वर्थमपः प्रणयति तास्तान्ते ऽन्तर्वेदि निनयति विष्णुक्रमांश्च क्रामति स इष्टिविधः। यत्रैतत्त्रयं न करोति स सोमविधः। एतदुक्तं भवति त्रयमेव तत्पशौ कर्तव्यं वा न वेति॥ तत्र यदा दृष्टार्थाः प्रणीतास्तदार्थलुप्तत्वादासां दृष्टा-र्थपक्षे प्रणयनमुच्यते। यदा त्वदृष्टार्थास्तदा नित्यप्राप्तौ पक्षे निव-र्त्यन्ते। विष्णुक्रमाणां तु नित्यप्राप्तानामेव पक्षे निवृत्तिर्वचनादिति द्रष्टव्यम्॥

यूपं यजमान उपतिष्ठते नमः स्वरुभ्यः सन्नान्माव-गातापश्चाद्दघ्वान्नं भूयासम्॥ श्र[redacted]णां संद-दृश्रिरे चषालवन्तः स्वरवः पृथिव्याम्। ते देवासः स्वरवस्तस्थिवांसो नमः सखिभ्यः सन्नान्मावगात॥ आशासानः सुवीर्यमिति च। २।

यत्प्राग्यज्ञ शं च म इति जपात्तत्सलोपतिष्ठते। तथा चोत्तरसूत्रे ऽपि वक्ष्यति॥

उपस्थाय यज्ञ शं च म इति जपति। ३।

यूपमुपस्थाय ततो यज्ञ शं च म इति जपति। सोमेन पशुना वेष्ट्वा जपतीत्यनेनैव जपस्य सिद्धत्वात्क्रमार्थमिदं वचनम्॥ अथ यूपप्रसङ्गात् संस्थिते कर्मणि यूपस्पर्शने प्रायश्चित्तमाह॥

आहुत्यै वा एतं वनस्पतिभ्यः प्रच्यावयन्त्युपयज्य मनुष्याः प्रयान्ति। यूपो वै यज्ञस्य दुरिष्टमामुञ्चते। यद्यूपमुपस्पृशेद्दुरिष्टं यज्ञस्यामुञ्चेत्तमभिमन्त्रयेत वायवेष ते वायवित्येकम्। वायवेतौ ते वायविति द्वौ। वायवेते ते वायविति बहून्। ४।

आहुत्यै आहुत्यर्थं वनस्पतीज्ययास्योपकर्तुमेनं यूपं वनस्पतिसकाशा-द्यज्ञार्थं निर्वहन्ति मनुष्याः तेनोपयज्य पश्विज्यां कृत्वा गृहान्प्रयान्ति च। अत एव लिङ्गादवगतं उदवसाय पशुना यष्टव्यमिति। उपय-ज्येति यजेश्छान्दसः संप्रसारणाभावः॥ एवमाहुत्या परिक्रीतो यूपो यद्यज्ञस्य दुरिष्टं तदात्मन्यारोपयति। तमेतमामुक्तकिल्बिषं यूपं यदि कश्चिदुपस्पृशेत्तत्किल्बिषमात्मनि संक्रमयेत्। अतस्तन्निबर्हणार्थं तमेव यूपमभिमन्त्रयेत वायवेष त इति। तत्र यूपैकादशिन्यादौ द्विबहूनां युगपत्काले स्पर्शने द्वितीयतृतीयाभ्यामभिमन्त्रणं न त्वाद्य-स्यावृत्तिः तयोराम्नानसामर्थ्यात्॥ एष सर्वार्थो विधिर्न केवलं यजमानस्य। कस्मात्। संस्थिते कर्मणि सर्वेषामेव यूपस्पृष्टौ दोषस्म-रणात् हिरण्यकेशिना सर्वाधिकारेण गृह्यकाण्डे तद्वचनाच्च॥

ऐन्द्राग्नो निरूढपशुबन्धः सौर्यः प्राजापत्यो वा। ५।

एतास्तिस्रो देवता निरूढे पशौ विकल्प्यन्ते॥

तेन संवत्सरेसंवत्सरे यजेत। षट्सुषट्सु मासेष्वित्येके। ६।

तेन प्रतिसंवत्सरं सकृद्यजेत षट्सुषट्सु वा मासेषु। किं तत्रानियतः कालः। नेत्याह॥

ऋतुव्यावृत्तौ सुयवस आवृत्तिमुखआवृत्तिमुखे वा। ७।

ऋतुव्यावृत्तिः ऋत्वन्तः। नवसलिलसंवृद्धाः शोभना यवसाः शष्पाणि यस्मिन्काले स सुयवसः प्रावृडिति यावत्। आवृत्तिमुखमित्ययनाख्या। तदयमर्थः। यदा सकृत्संवत्सरेज्या तदा यस्य कस्यचिदृतोर्व्यावृत्तौ सुयवसे यजेत। यदा तु षट्सु मासेषु तदावृत्तिमुखयोरिति॥ तथा च कात्यायनः पश्विज्या संवत्सरेसंवत्सरे प्रावृट्यावृत्तिमुखयोर्वेति। केचित्पुनर्ऋतुव्यावृत्तावित्यनेन षट्स्वप्यृतुव्यावृत्तिषु षट्कृत्वः संवत्सरस्य यागमुक्तं मन्यन्ते। तदयुक्तं मन्यन्त आवृत्तिमुखवदनभ्यासादेकवचनाच्च। एवं सकृद्द्विर्वा संवत्सरस्य पश्विज्या कार्येत्युक्तम्॥ इदानीं सकृदपि तदक्रियायां न केवलमदृष्ट एव प्रत्यवायः किं तु दृष्टो ऽपि। तस्मान्नानिष्टपशुनातिक्रमितव्यः संवत्सर इति दर्शयन्नादरविशेषार्थं श्रुतिमेव तत्रोदाहरति॥

मांसीयन्ति ह वा अग्नयो ऽजुह्वतो यजमानस्य। ते यजमानमेव ध्यायन्ति। यजमानं संकल्पयन्ति। पचन्ति ह वा अन्येष्वग्निषु वृथामांसम्। अथैतेषां

नान्या मां[illegible] विद्यते। यस्यो चैते भवन्ति नं ततो नानीजानं पशुना संवत्सरो ऽतीयात्। आयुष्यो ह वा अस्यैष आत्मानं[illegible]यण इति व[illegible] भवति भवति। ८।

मांसमनुकृतो यजमानस्याग्नयो मांसीयन्ति मांसमात्मन इच्छन्ति ते यजमानमेव ध्यायन्ति कदा खिन्नो मांसं दास्यतीति। ततस्ते नमदित्सन्तं संकल्पयन्ति इममेव यजमानाधमं भक्षयिष्याम इति। कथमेवं मांसमभिमंस्यन्त इति चेत् किमत्र नृशंसम्। लौकिकेषु ह्यग्निषु वृथामांसं लौकिकमांसं मनुष्याः पचन्ते अश्नन्ति च तत्प-च्यमानमग्नयः॥ अथैतेषां यजमाननियन्त्रितानामग्नीनामन्तरेण पशिज्यां न मांसान्तराप्राप्तिः। तस्मात्कारणाद्यस्य खल्वेते ऽग्नयो भवन्ति स आहिताग्निरिति यावत् तं पशुनानीजानमनिष्टवन्तं न कश्चित्संवत्सरो ऽतीयात् तत्रैव संवत्सरे यजेत। आयुषे हितो ह्यस्य यजमानस्यैष पशुः यदग्निभ्यो विभक्षयिषद्भ्य आत्मानं निष्क्रीणाति। तस्मान्नैवेनमतिपा[illegible]दिति॥

इत्यष्टाविंशी कण्डिका।

इति श्रीभट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायामष्टमः पटलः।

इति सप्तमः प्रश्नः॥